दादुत्पन्नस्य शृङ्गाररसस्य 'शृङ्गारो विष्णुदैवतः' इति स्मरणात्सम्यग्वर्णनचर्वणादिभिः कविसहृदयजनपरमपुरुषार्थप्राप्तिरवश्यं स्यादेवेति तात्पर्यम्। शृङ्गाररस्य सामवेदादुत्पत्तिरुक्ता। 'सामर्ग्यजूरथर्वेभ्यश्चत्वारः प्रथमाः क्रमात्। जाता हास्यादयस्तेभ्यश्शान्तस्तूपनिषद्व्रजात्' इति। 'विष्णुः शक्रो महाकालो रुद्रो गणपतिर्विधिः। कालो यमः परं ज्योतिरित्येषामधिदेवताः॥' इति नवानामपि रसानां देवताश्चोक्ताः। तन्नायकलक्षणन्तु 'स्थिरानुरागः कुशलः कलासु सुभगाकृतिः। निपुणः कामतन्त्रेषु शृङ्गाररसनायकः॥' इति। स चतुर्विधः 'अनुकूलो दक्षिणश्च शठो धृष्टः इति क्रमात्।' एतद्दशनायकगुणसद्भावोऽन्येष्वपि दृष्टश्रुतचरः। किमु वक्तव्यं कृष्णस्य तद्वत्त्वमिति भावः। ईदृशशृङ्गारवर्णनासमुचिता कैशिकी वृत्तिः, 'शृङ्गारे कैशिकी वृत्तिर्नियता समुदीरिता' इति वचनात्। 'या श्लक्ष्णनेपथ्यविशेषयुक्ता सुसंयुता या बहुनृत्तगीतैः। कामोपभोगप्रचुरा च या स्यात्तां कैशिकीं नाम वदन्ति वृत्तिम्॥' इति तल्लक्षणम्। "नर्म च नर्मस्फीतो नर्मस्फोटश्च नर्मगर्भश्च। कैशिक्याः खलु वृत्तेरुक्तान्यङ्गानि चत्वारि॥' इत्युक्तभेदचतुरङ्गा कैशिकी वृत्तिरत्र कविना स्वप्रबन्धे सम्यगेव गृहीता। पाकोऽत्र द्राक्षापाकः। 'द्राक्षापाकः स विज्ञेयो बहिरन्तः स्फुरद्रसः' इति तल्लक्षणम्। सर्वमेतत् प्रबन्धाभिव्याप्ति बोध्यम्। अत्राद्यश्लोके तु राधामाधवरहःकेळिविषया रतिः प्रीतिर्भावध्वनिः। 'रतिर्देवादिविषया भाव इत्यभिधीयते' इति तल्लक्षणात्। पूर्वार्धे मम्बरादेर्मेघैर्मेदुरत्वादीनां वाक्यार्थानां राधाकर्तृककृष्णकर्मकगृहप्रापणरूपस्य वाक्यार्थस्य हेतुत्वप्रतिपादनाद्वाक्यार्थहेतुकं काव्यलिङ्गमलङ्कारः। 'हेतोर्वाक्यपदार्थत्वे काव्यलिङ्गमुदाहृतम्' इति तल्लक्षणात्। उत्तरार्धे रहःकेळिस्थानत्वेन समृद्धिमद्यमुनाकूलस्य प्रतिपादनादुदात्तालङ्कारः। 'तदुदात्तं भवेद्यत्र समृद्धं वस्तु वर्ण्यते' इति तल्लक्षणात्। इमं गृहं प्रापयेति, रहः केळयो जयन्तीति च वाक्यद्वये एकस्मिन्नेव कृष्णे प्रतीयमानयोर्बालत्वप्रौढत्वयोः परस्परविरोधस्य आपाततो भासमानस्य भगवतः कृष्णस्याचिन्त्यमहिमत्वादिना समाधानाद्विरोधालङ्कारः। 'आभासत्वे विरोधस्य विरोधालङ्कृतिर्मता' इति तल्लक्षणात्। वर्णावृत्तिलक्षणवृत्त्यनुप्रासश्च शब्दालङ्कारः। उक्तं हि काव्यप्रकाशे, 'वर्णसाम्यमनुप्रासश्छेकवृत्तिगतो द्विधा। सोऽनेकस्य सकृत् पूर्व एकस्याप्यसकृत्परः॥' इति। एतेषामिह संसृष्टिः। 'तिलतण्डुलसंश्लेषन्यायाद्यत्र परस्परम्। संश्लिष्येयुरलङ्काराः संसृष्टिः सा

निगद्यते' इति लक्षणात्। वृत्तं शार्दूलविक्रीडितम्। 'सूर्याश्वैर्मसजस्ततास-गुरवः शार्दूलविक्रीडितम्' इति तल्लक्षणम् ॥ १ ॥

अथ कविः स्वकविताया बीजशुद्धिं सूचयन् चिकीर्षितं प्रतिजानीते—

वाग्देवतेति ॥- जयदेवकविः एतं प्रबन्धं तनोतीत्यन्वयः[1]। जयदेवो नाम कविः एतं वक्ष्यमाणं प्रबन्धं काव्यविशेषं तनोति करोति। जयदेवकविः कीदृश इत्याकाङ्क्षायामाह — वाग्देवताचरितचित्रितचित्तसद्मा। वागभिमानिनी देवता वाङ्मयी देवता वा वाग्देवता वाणी। तस्याश्चरितं सञ्चरणम्। भावे क्तः। तेन चित्रितं सञ्जातचित्रम्। तारकादिभ्यः इतच्। अथवा चित्रवत् कृतम्। चित्रशब्दादर्श आद्यजन्तात्तत्करोतीति णिचि कर्मणि क्तः। तादृशं चित्तसद्म चेतोरूपं मन्दिरं यस्य स तथोक्तः। निरन्तरसरस्वतीस्वैरसञ्चारमणिगृहायमाण-मानस इत्यर्थः) यथा लोके कयाचित् कामिन्या स्वस्याः स्वैरविहाराद्यर्थं विविध-मार्जनालङ्करणादिभिश्चित्रितं गृहं प्रविशज्जनानन्दकरं भवति, तथा प्रकृतेऽपि परिचितसहृदयजनहृदयानन्ददायिप्रतिभत्वं द्योत्यम्। तेन च वक्ष्यमाणप्रबन्ध-निर्माणसमुचितसरस्वतीप्रसादसम्पत्तिरूपा बीजशुद्धिः कवितायाः प्रतिपादिता। पद्मावती नाम जयदेवकवेः सहधर्मचारिणी। तस्याश्चरणयोश्चारणं नृत्तचारिविशेष-प्रचारणम्। तच्चक्रं तत्समूहः। तद्वर्तयति प्रवर्तयतीति तथा। भगवद्भक्ताग्रणीः जयदेवः प्रतिदिनं प्रतिमागतं श्रीकृष्णं बहुभिरुपहारैः प्रतिपूज्य तदन्ते स्वकान्तां भगवतःपुरो नर्तयतीत्यनुसन्धेयम्। एतादृशो जयदेवकविः श्रिया युक्तो यो वासुदेवः वसुदेवस्यापत्यं पुमान् वासुदेवः भूभारहरणाय वसुदेवपुत्रत्वेनावतीर्णो भगवान् लक्ष्मीपतिः। 'तस्यापत्यम्' इत्यण्। अत इञ् न भवति, 'ऋष्यन्धकवृष्णि-कुरुभ्यश्च' इति निषेधात्। अथवा, वसन्त्यस्मिन् जगन्तीति वासुः। 'वस-तेरुणादयो बहुलम्' इत्युण्। वासुश्चासौ देवश्चेति वासुदेवः। श्रीग्रहणेन तदवि-रहितत्वं देवस्य व्यज्यते। एतादृशस्य वासुदेवस्य या रतिकेळयः शृङ्गार-चेष्टाः तासां कथा प्रबन्धारूढत्वेन प्रख्यापनं तया समेतं सम्यगा समन्तात् इतं प्राप्तम्। श्रीश्च वासुदेवश्च श्रीवसुदेवौ। तयोः या रतिकेळयः तत्कथा तद्वर्णनं तत्समेतमिति वा। एतत् 'पद्मापयोधरतटीपरिरम्भलग्नकाश्मीरमुद्रितमुरो मधुसूदनस्य' इत्यादौ, 'श्रितकमलाकुचमण्डल' इत्यादावपि स्पष्टम्। श्रीशब्देन

1 एतन्तनोतीति व्याख्यातृपाठः।

तत्परा राधा वा कथ्यते। तस्या लक्ष्म्यवतारत्वेन प्रसिद्धिरस्ति। अनेन प्रबन्धस्य साफल्यं सूचितम्। तदुक्तं हरिभक्तिसुधोदये—'सपङ्काऽपि हरेर्वाणी हरिनाम्ाङ्किता यदि। सा वाणी सफला ज्ञेया निष्फलान्यसमाश्रया॥' इति। एतादृशं प्रबन्धं तनोति करोति। तनु करणे। करोति। 'वर्तमानसामीप्ये वर्तमानवद्वा' इति भविष्यति लट्। निर्मास्यतीत्यर्थः। अथवा, एतस्यापि पद्यस्य प्रबन्धान्तर्गतत्वादारब्धत्वमपरिसमाप्तत्वञ्च। ततो वर्तमाननिर्देशः। प्रथमपुरुषनिर्देशश्च 'रामः करोति' इतिवत् कमप्यतिशयमाह। स चातिशयः प्रबन्धं गद्यगीतात्मकं प्रबन्धं रचयितुं जयदेवादृते नान्यः समर्थ इति पर्यवस्यति। तनोतीति परस्मैपदप्रयोगश्च 'यत्करोषि यदश्नासि यज्जुहोषि ददासि यत्। यत्तपस्यसि कौन्तेय तत्कुरुष्व मदर्पणम्॥' इदि भगवद्वचनानुरोधेन क्रियाफलस्याकर्तृगामित्वमीश्वराधीनत्वञ्च सूचयितुमिति ध्येयम्। अत्र छेकानुप्रासोऽलङ्कारः। वसन्ततिलकं वृत्तम्, 'उक्तं वसन्ततिलकं तभजं जगौगम्' इति लक्षणात् ॥ २ ॥

अथ कविः स्ववाग्वैभवस्य लोकोभयसम्पादनसामग्रीमाह—यदीति॥ अत्र श्लोके श्रृणुमनःशब्दयोः सामर्थ्यात् जन तवेति पदद्वयमध्याहर्तव्यम्। हे जन तव हरिस्मरणे, उपासकस्याविद्यातत्कार्याणि हरतीति हरिः श्रीकृष्णः तस्य स्मरणे चिन्तने। तृतीये भजनप्रकारे इति यावत्। तदुक्तम्—'श्रवणं कीर्तनं विष्णोः स्मरणं पादसेवनम्। अर्चनं वन्दनं दास्यं सख्यमात्मनिवेदनम्॥' इति। सरसं सरागम्। साभिलाषमिति यावत्। विलासकलासु विलासेषु विभ्रमेषु। शृङ्गारचेष्टास्वित्यर्थः। कलासु कामकलासु च तव मनो यदि कुतूहलं कौतुकि यदि। कुतूहलशब्दात् 'अर्श आदिभ्योऽच्' इत्यच्। आमुष्मिके ऐहिके वा सौख्ये सापेक्षं यदीति यावत्। तदा तर्हि मधुराः माधुर्यगुणशालिन्यः कोमळाः प्रसादगुणयुक्ताः कान्ताः ओजस्विन्यश्च पदावलयो यस्यां तादृशीम्। अत्रेदं बोध्यम्। काव्यगुणा दशेति केचित्। चतुर्विंशतिरित्यन्ये। त्रय एवेति काव्यप्रकाशे। 'माधुर्यौजःप्रसादाख्यास्त्रयस्ते न पुनर्दश' इति। एवंविधगुणसम्पन्नां जयदेवसरस्वतीं श्रृणु। श्रृणित्यत्र, श्रु श्रवणे। 'श्रुवश्शृ च' इति श्नुप्रत्ययः शृभावश्च। 'उतश्च प्रत्ययादसंयोगपूर्वात्' इति हिलुक्। अस्यैवार्थान्तरं विचार्यते। हरिस्मरणे असरसमिति

1 प्रकृष्टरचनमित्यर्थः।

छेदः। असरसं विरसं यदि मनो भवेत्तर्हि असारस्यनिवृत्तये उक्तवि[illegible]
विशिष्टां जयदेवसरस्वतीं शृण्विति। अथ केनचिन्निमित्तेन विलास[illegible]
स्वप्यरसः स्यान्मनो यदि तदपि तदसारस्यनिवृत्तये उक्तविशेषणविशि[illegible]
शृणु। तदसारस्यनिवृत्तिद्वारा तदुभयप्रावीण्यं सम्यग्भविष्यतीति। [illegible]
विलासकलासु सुतरां कुतूहलं यस्य तादृशं मनो यदि स्यात् हरिस्मरणे [illegible]
च यदि स्यात्तर्हीमां शृण्विति। अत्र मन एव वा संबोध्यम्। शेषं समा[illegible]
ऐहिकपारत्रिकसुखेच्छयोरन्यतरसत्त्वे श्रोतव्येयमिति। वृत्तं द्रुतविळम्बि[illegible]
'द्रुतविळम्बितमाह नभौ भरौ' इति लक्षणात् ॥ ३

ननु जयदेवकविसमानकालीना उमापतिधरादयोऽपि कवयस्त[illegible]
तेभ्यः कोऽस्य विशेषः इत्याशङ्कायामाह—वाच इति ॥ उमापतिधरो [illegible]
कश्चिद्यथार्थसंज्ञः कविः वाचो गिरः पल्लवयति अर्थपुष्टिं विना शब्दा[illegible]
प्रपञ्चयति। तत्तु सहृदयोद्वेगकरम्। यदाह श्रीहर्षः—'गरौ गिरः पल्ल[illegible]
र्थलाघवे' इति। चरणो नाम कश्चित् कविः। सः श्लाघ्यः दुरूहात्[2]
'अन्यारादितरर्ते' इत्यादिना पञ्चमी। दुष्ट ऊहो दुरूहः। शास्त्रज्ञान[illegible]
विना दुरूहमात्रकल्पितरचनत्वाद्विदुषामश्लाघ्यतां प्राप्त इत्यर्थः। 'शक्ति[illegible]
पुणता लोकशास्त्रकाव्याद्यवेक्षणात्। काव्यज्ञशिक्षयाभ्यास इति हेतुस्तदुद्भवे'
इति काव्यस्य ये हेत्ववयवा उक्ताः, तेषु शक्तिमात्रस्य सत्त्वात् श्लाघ्य ए[illegible]
अन्ययोरभावाद्दुरूहस्य सत्त्वादश्लाघ्यो जात इत्यर्थः। आचार्यश्चासौ गोवर्धनश्च
आचार्यगोवर्धनः। 'आचिनोति च शास्त्रार्थमाचारैः साधयत्यपि। स्वयमा[illegible]
रितैर्यस्तु तमाचार्यं बुधा विदुः॥' इत्युक्तलक्षणविशिष्टो लोकगुरुर्जयदेवगु[illegible]
स्वशिष्याणां कवितावर्धनत्वाद्यथार्थनामा च योऽयमचार्यगोवर्धनः, तेन [illegible]
स्पर्धी स्पर्धाशीलो योऽयं श्रुतिधरो नाम कविः कोऽपि न सः विश्रुतः न ख्या[illegible]
वेदवित्तमतया यथार्थनामत्वे सत्यपि बलीयसा स्पर्धालुत्वात् शृङ्गारोत्तरसत्प्रमे[illegible]
रचनैः न प्रसिद्ध इत्यर्थः। शृङ्गारेण साङ्गेन वर्णितेन उत्तरमुत्कृष्टं यत् सत्[illegible]
पुण्यश्लोकचरितम्, तद्रचनैः खलु प्रसिद्धया भाव्यम्। तादृशी प्रसिद्धि[illegible]
श्रुतिधरस्य न स्यादेवेत्यर्थः। धोयी नाम कश्चिदस्ति। सः कविर्न। कि[illegible]
कविक्ष्मापतिः, कवीनां राजेव शास्ता। कवीन् शिक्षयति, स्वयं न कवयतीत्यर्थः।

---

1 शृणु इत्यस्यानन्तरं मनः कुतूहलं भवेत् इति योजनाभिप्रायेणार्थमाह।

2 दुरूहादृते इति व्याख्यातृपाठः।

एवं स्थिते किं जातम्। जयदेव एक एवास्मिन् काले गिरां सन्दर्भशुद्धिं जानीते, नान्य इति सिद्धम्। अतश्च तस्यैव वाणी श्रोतव्या नान्येषामिति भावः। अत्र जयदेवकवेरुमाधरप्रभृतिभिरौपम्याक्षेपपूर्वकं व्यतिरेकप्रतिपादनाद्व्यतिरेकालङ्कारः, 'शाब्दे वार्थेऽथवाक्षिप्त औपम्ये वस्तुनोर्द्वयोः। वर्ण्ये योऽतिशयः सोऽयं व्यतिरेक इतीरितः॥' इति लक्षणात्। कविप्रसङ्गादिदमत्र बोध्यम्। 'शुचिर्दक्षश्शान्तस्सुजनविनुतः सुश्रुतधरः कलावेदी विद्वान् कलमृदुवचाः प्रीणितगुरुः। कृतज्ञो देवज्ञस्सदयहृदयः सत्कुलभवः शुभाकारश्छन्दोगुणगणविवेकी स सुकविः'॥ इति बहुगुणत्वं कवेरपेक्षितम्। एतादृशोऽपि कविः सप्तधा भवति। 'काचिको वाचिकश्चार्थशिल्पकौ मार्दवानुगः। विवेकी भूषणार्थी च कवयस्सप्त कीर्तिताः॥' इति। तेषां लक्षणम्—'आवापोद्वापकृत्यज्ञः सन्मनोरञ्जनोन्मनाः। काचिको वाचिकः प्रायो वागाडम्बरकारकः॥ आर्थोऽभिधेयचित्रार्थी शिल्पको द्वयचित्रकृत्। शब्दार्थमार्दवापेक्षी कविः स्यान्मार्दवानुगः॥ शास्त्रालङ्कारसंस्कारो विवेकी कविपुङ्गवः। अलङ्कारैकनिष्ठो यो भूषणार्थी स कथ्यते॥' इति। स्वल्पशक्तीनामभ्यासारूढकविताध्वाटनानामेते भेदा लक्षणानि च। जयदेवस्तु नामीष्वन्यतमः। वाल्मीकिव्यासकाळिदासानां चतुर्थोऽयम्। यतस्तैरप्यदृष्टं मार्गमयं क्षुण्णवान्। अपरिच्छेद्य एवायमस्य जयदेवकवेर्वाक्स्वादिमा। तथाहि। अत्र रसालङ्कारपुष्टिः, प्रमेयमहिमा, सर्वमोहनता, अनन्तानन्दसन्दोहित्वञ्चेत्यगणेयमेव गुणगौरवम् ॥ ४ ॥

तत्र च 'रसेषु शृङ्गाररसः प्रधानं हरेरधिष्ठानमिदं सजानेः। उद्दीपनं तस्य च गीतमेतत् तस्मात् प्रशस्तं खलु गीतमाहुः॥ श्रीविष्णुरूपः खलु सामवेदस्तस्मात्समुत्पन्नमिदं हि गीतम्। तद्देवतानां पुरतः प्रगीतं भक्त्या बुधास्स्वर्गदमामनन्ति॥ ताम्बूलमप्यभिसमर्प्य सुवाद्यगीतनृत्तैस्सुतृप्तमभिपूजयितुं स्वदेवम्।' इत्यादिसंगीतशास्त्रवचनानुसारेण गीतस्य सर्वेश्वरप्रीतिद्वारा स्वर्गादिफलदायकत्वनिश्चयात् पद्मावतीचरणचारणानुकूलं श्रोतृचित्तानुरञ्जनं गीतमारभते—प्रळयेत्यादि। अत्रेदं बोद्धव्यम्। 'व्यञ्जकस्वरसंभोगी गीतमित्यभिधीयते' इति गीतलक्षणम्। 'स्वतो रञ्जयति श्रोतृचित्तं स स्वर उच्यते' इति स्वरलक्षणम्। संगीतरत्नाकरे तु 'नृत्तं वाद्यानुगं प्रोक्तं वाद्यं गीतानुवर्ति च। अतो गीत प्रधानत्वादत्रादावभिधीयते॥ गीतेन प्रीयते देवः सर्वज्ञः परमेश्वरः। गोपी-

पतिरनन्तोऽपि वंशध्वनि-तिं गतः ॥' इति गीतमाहात्म्यमुक्तम् । अत्र गीतगोविन्दे प्रबन्धे गीतानि गाध रूपणीति केचित् । संगीतरत्नाकरेऽपि तदुक्तं प्रकीर्णप्रबन्धपरिगणनस्थले । 'पञ्चाननोमातिलका त्रिपादी च चतुष्पदी । षट्पदीसप्तपद्यौ च तथा चाष्टपदी स्मृता ॥' इति । एतादृशस्य गीतस्य नृत्तस्य च प्रतिष्ठाङ्गभूतस्ताळ. । तदुक्तं ताळकलाविलासे —'ताळस्तलप्रतिष्ठायामिति धातोर्धञि स्मृतः । वाद्यं गीतञ्च नृत्तञ्च यतस्ताळे प्रतिष्ठितम् ॥ तकारो हि शिवः प्रोक्तो ळकारः शक्तिवाचकः । शिवशक्तिसमायोगात्ताळ इत्यभिधीयते ।' इति । 'ताळः कालक्रियामानम्' इत्यमरोऽपि । अन्यत्राप्युक्तम् – 'संयोगे च वियोगे च तलयोरुभयोर्यथा । वर्तते व्याप्तिमान् कालस्तथा ताळः प्रकीर्तितः ।।' इति । अनुद्रुतो द्रवश्चैव लघुर्गुरुरतः परः । प्लुतश्चेति क्रमेणैवं ताळाङ्गानि तु पञ्चते ॥' इत्यादिलक्षितस्य ताळस्य दश प्राणाः । 'कालो मार्गः क्रियाङ्गानि ग्रहो जातिः कला लयः । यतिः प्रस्तार इत्येते ताळप्राणा दश स्मृताः ॥' इत्यादिकं बहु संगीतरत्नाकरे द्रष्टव्यम् । अत्र गीतगोविन्दे यानि गीतानि, तानि सूळादिताळैरेव प्रायशो गीयन्ते । तत्र सूळादिस्त्रिविधः शुद्धसूळादिः, साळिकसूळादिः, दशसूळादिश्चेति । तत्र दशसूळादयस्सप्त । 'ध्रुवमठ्यौ रूपकश्च त्रिपुटो झम्प एव च । अटताळैकताळौ च सूळा इति हि कीर्तिताः । वर्गोऽयं दशसूळादिर्मुनिना परिकीर्तितः ॥' इति । तद्ध्रुवादिसंज्ञितैर्दशसूळादिभिस्सप्तभिरेव ताळैः प्रायशोऽत्र गेयानि गीतानि । तत्रादावटताळेन गेयं गीतमिदं प्रळयेत्यादि । 'लघुर्द्रुतो लघुश्चैकः सा भवेदटताळिका ।' इत्यटताळलक्षणम् । 'अत्र च अवतारास्सन्त्वन्ये सरसिजनयनस्य सर्वतोभद्राः । कृष्णादन्यः को वा प्रभवति गोपालगोपिकामुक्त्यै ॥' इति वचनार्थं मनसि निधाय दशावतारमध्ये स्वकृतिनायकस्य कृष्णस्यैवातिशयं वर्णयितुं क्रमादादौ दशावतारान् प्रस्तौति–प्रळयेत्यादि ॥ माळवरागेण गीयत इत्यस्यायमभिप्रायः–माळवरागस्य रागराजत्वात्प्रथमप्रयोगत्वाद्विहाराणाञ्च सायङ्कालेष्वौचित्यादुपोद्घातगीतस्यापि सायमेव प्रयोज्यत्वमावश्यकम् । तच्च माळवरागस्य सायंप्रयोगप्रशस्त्या सुघटितमिति निर्धार्य माळवरागेण गीयत इतीयत्यंशेऽपि बोध्ये किञ्चिदाकूतम् । गान्धर्ववेदे रागाणां देवतात्मत्वं तद्ध्यानोपास्तिप्रयोगप्रकारप्रतिपादनार्थं प्रकाशितम् । 'नितम्बिनीचुम्बितवक्त्रपङ्कजस्सं[1]मुल्लसत्कुण्डलवान् प्रमत्तः । संगीतशालां प्रविशन्

[1] शुकश्रुतिः ।

प्रदोषे मालाधरो माळवरागराजः ॥' इति। अयं रागः पुंरागः। अस्य भार्या गुण्डक्रिया गुर्ञ्जरी गौळी चेति स्त्रीरागास्त्रयः। तदुक्तं रागविवेके—'भैरवश्चापि भूपाळः श्रीरागः पण्डपञ्जरः। वसन्तो माळवश्चाथ वङ्गाळो नाट्टकस्तथा॥ एतेऽष्टरागाः कथिताः पुंरागा इति सूरिभिः।' इति। तेषां स्त्रियश्च, 'देवक्रिया मेघरञ्जी कुरञ्जी भैरवस्त्रियः' इत्यारभ्य 'गुण्डक्रिया गुर्ञ्जरी च गौळीता माळवस्त्रियः' इत्यन्तेन प्रतिपादिताः। कालनियमश्च, 'प्रातर्गुण्डकरी ततो मल्हरी देशाक्षिका गुर्ञ्जरी मध्याह्नेऽपि च रामकृद्द्वयमथो कर्णाटगौडाह्वयौ। सायं माळविका हितेति सुधियो गायन्तु सायन्तने सारङ्गं पुनरेव गौडमपरं प्रत्यूषतो भैरवीम् ॥' इति। तथा गीतरत्नमालायामुक्तम्— 'देशाक्षी भैरवी शुद्धसारङ्गाख्या च भैरवी। देवक्रिया रक्तहंसी माहळी रागरञ्जिका॥ एते हि सूर्यतो जातास्सायङ्काले तु निन्दिताः। प्रभाते येन गीयन्ते स नरः सुखमेधते॥ शुद्धा नट्टा च सारङ्गा शुद्धा नट्टा वराळिका। वराळिका द्रामिळिका देशी नागवराळिका॥ छायागौळी तथा चान्या साहळचन्धाळिके तथा। मल्लारिका तथा छाया गौळी कर्णाटकाह्वया॥ गौळो माळवगौळश्च तथा रामक्रियापि च। छाया रामक्रिया रञ्जी छाया सूचीवराळिका॥ कर्णाटकाह्ववङ्गाळावित्येते चन्द्रमोंऽशुजाः। एते रागा विशेषेण प्रातःकाले तु निन्दिताः॥ सायमेषां हि गानेन प्राप्नुयादुन्नतां श्रियम्। तान् विपर्यासतः कृत्वा गाता यो गाथकाधमः॥ स पातकी महाव्याधीन् दारिद्र्यञ्चाधिगच्छति। इतरेषान्तु रागाणां न वेलानिर्णयः क्वचित्॥ अयोग्यं रागमाकर्ण्य तस्य दोषप्रशान्तये। ईशानञ्च हरिं स्तुत्वा मध्यमादिमनन्तरम्॥ गायेद्विद्वानतः शुद्धः सर्वपापैः प्रमुच्यते॥' इति। अत्र चैकैकैः पुरुषरागैरेकैकानि गीतानि, तत्प्रियाभूतस्त्रीरागैर्द्वयं द्वयञ्च गेयमिति मनीषया चतुर्विंशतिगाथाः कृतवान् कविरिति केचिद्वदन्ति। अष्टभिः पुरुषरागैरष्टभिः स्त्रीरागैरष्टभिः क्लीबरागैश्च प्रत्येकं गेयानीति मनीषया इत्यपरे। उभयथापि संख्यानियमस्य साभिप्रायता सिद्धा। अत्र प्रथमगीते केशवेत्यादि हरे इत्यन्तं ध्रुवपदम्। अष्टपद्यामनुस्यूतत्वेन सर्वपादानामन्ते फलभागपूरकत्वाद्यथार्थसंज्ञेयम्। तदुक्तं सङ्गीतचूडामणौ—'प्रबन्धेषु ध्रुवत्वेन ध्रुव इत्यभिधीयते' इति। 'अर्थांशस्य प्रबन्धे स्याद्यदनेनैव पूरणम्' इति च। एवमुपर्यपि सप्तध्रुवपदेषु बोध्यम्। एतदेव भाषायां 'पल्लवी' इत्युच्यते। धृतं मीनशरीरं मत्स्यमूर्तिर्येन स तथा। तस्य संबुद्धिः। हे धृतमीन-

शरीर। केशव, अत्र 'केशाद्वोऽन्यतरस्याम्' इति प्रशंसार्थमत्वर्थीयवप्रत्ययान्तेन केशवशब्देन श्रीकृष्णसंबोधनं गुडाकेशत्वरूपपुरुषोत्तमलक्षणशालित्वसूचनार्थम्। अथवा, कः ब्रह्मा, ईशः शर्वः। कश्च ईशश्च केशौ, तावुभौ वाति गच्छति गन्धयति वा केशव इति। 'अनुपसर्गे कः' इति कः। ब्रह्मरूपी रुद्ररूपी च त्वमेवेति सर्वदेवमयत्वमुक्तमित्यवगन्तव्यम्। अत एव सृष्टिस्थितिसंहारप्रवर्तकत्वाज्जगदीशत्वमपि सिद्धमिति भावः। पयांसि धीयन्तेऽत्रेति पयोधिः समुद्रः। 'कर्मण्यधिकरणे च' इति किप्रत्ययः। प्रळये संवर्ते पयोधिः प्रळयपयोधिः, तस्य जले एकार्णवजलपूरे अधिकरणे त्वं वेदं धृतवानसि। कीदृशं वेदम्—उह्यन्ते प्राप्यन्ते परं तीरमेभिर्जना इति वहित्राणि। वहेरित्रप्रत्ययः। तादृशानि च तानि चरित्राणि च कर्माणि चेति वहित्रचरित्राणि। विहितानि विधानकर्मीकृतानि वहित्रचरित्राणि येन स तादृशः। सुगतिप्रापक-कर्मविधायक इत्यर्थः। तादृशं वेदम्। 'वेद एव द्विजातीनां निःश्रेयसकरं परम्' इति वचनात् वेदयति धर्माधर्मानिति वेदः। जातावेकवचनम्। कर्मज्ञानकाण्डात्मकं निखिलनिगमकदम्बकमित्यर्थः। ज्ञानकाण्डेऽप्युपासनाश्रवणादीनां विधेर्विहित-वहित्रचरित्रत्वमविरुद्धम्। अखेदं खेदरहितं यथा भवति तथा धृतवान् उद्धृतवानसि। वेदान् कुक्षौ निक्षिप्य प्रळयसमुद्रे मग्नं सोमकासुरं हत्वा तदुदराद्दानुद्धृत्य पुनर्ब्रह्मणे दत्तवानित्यर्थः। तथा च श्रुतिः—'यो ब्रह्माणं विदधाति पूर्वं यो वेदांश्च प्रहिणोति तस्मै' इति। उक्तञ्च, 'ओङ्कारादिसमस्तमन्त्रपदवीगम्यां गृहीत्वा त्रयीं सिन्धौ मग्नमुपेत्य दैत्यहतकं वेदापहं सोमकम्। हत्वा तज्जठरात्समुद्ध्र निगमान्यो दत्तवान् ब्रह्मणे पायाद्वः कमलामुखाब्जमधुपो मत्स्यावतारो हरिः॥' इति। अतश्च जगदीश जगन्नियामक हरे, स्मर्तृणामुपासकानामाद्याविद्यातत्कार्याणि हरतीति हरिः। तस्य संबुद्धिः। हे हरे जय दुष्टनिग्रहशिष्टपरिपालनलीलस्त्वं सर्वोत्कर्षेण वर्तस्व। विहितविचित्रचरित्रमिति केषुचित् पाठः। तदा क्रियाविशेषणत्वेन योज्यम्। वेदविशेषणत्वेनापि सुयोज्यम्। अत्र पादे छेकवृत्त्यनुप्रासयोः संसृष्टिः ॥ १॥

क्रमप्राप्तमवतारान्तरमाह—क्षितिरिति॥ धृतं कच्छपरूपं कमठशरीरं येन तस्य संबुद्धिः। धृतकच्छपरूप हे केशव जगदीश त्वं जय हरे जय। अतिविपुलतरे अत्यन्तविशाले। अथवा, अतिक्रान्तं विपुलतरम्। विपुलतरादपि विपुलमित्यर्थः। 'अत्यादयः क्रान्ताद्यर्थे द्वितीयया इति समासः। किञ्च, धरणिधारणेन निरन्तरभूधारणेन जनितो यः किणः ग्रन्थ्याकारः शुष्कव्रणः। 'तृतीया तत्

कृत' इत्यादिना समासः। सः किणः चक्रमिव। चक्राकारः किण इत्यर्थः। 'उपमितम्' इत्यादिना समासः। तेन गरिष्ठे अतिगुरौ। धरणिमण्डलसततधरणजातकिणाक्रान्ते इत्यर्थः। अथवा, धरणिधरणः पर्वतः। 'कृत्यल्युटो बहुळम्' इति ल्युट्। धरणिधरणेन मन्दरपर्वतेन हेतुना समुद्रमथनकाले जातो यः किणः, तेन चक्राकारेण मण्डलाकारेण गरिष्ठे। भ्राम्यन्मन्दरमर्दनसञ्जातकिणमण्डलाक्रान्ते इत्यर्थः। एतादृशे तव पृष्ठे गात्रस्य पश्चाद्भागे क्षितिर्भूमिस्तिष्ठति अक्लेशं निवसति। अत्र तिष्ठतीति वर्तमानप्रयोगेण अङ्गीकृतार्थापरित्यागपृथक्त्वम्-लिङ्गत्वं गम्यते। तदुक्तम्—'पृष्ठभ्राम्यदमन्दमन्दरगिरिग्रावाग्रकण्डूयनैर्निद्रालोः कमठाकृतेर्भगवतः श्वासानिलाः पान्तु वः। यत्संस्कारकलानुवर्तनवशाद्वेलाचलेनाम्भसां यातायातनियन्त्रितो जलनिधिर्नाद्यापि विश्राम्यति॥' इति। गरिष्ठ इति 'अतिशायने तमबिष्ठनौ' इति ष्ठन्प्रत्यये 'प्रियस्थिर' इत्यादिना गरादेशः। अत्र किणचक्राकारत्वरूपेण वस्तुना भगवतः सर्वातिशायिमहिमत्वरूपं वस्तु व्यज्यत इति वस्तुना वस्तुध्वनिः। तेन सर्वसेव्यतारूपं वस्तु व्यज्यत इत्यनुरणनरूपो वस्तुध्वनिः। तादृशकच्छपरूपधारिन् हे केशव हरे त्वं जयेति पूर्ववदेव ध्रुवपदयोजना॥ २॥

अवतारान्तरं वर्णयति — वसतीति॥ केशव तव दशनशिखरे दंष्ट्राग्रे लग्ना आसक्ता सती यथा पुनरपि समुद्रे मज्जनं न स्यात् तथा सावधानतया दृढावसक्तेति भावः। एवं भूता सती धरणी नीलरूपा मेदिनी चन्द्रमसि निमग्ना अभ्यन्तरावगाढा कळङ्ककला लक्ष्मलेश इव वसति तिष्ठति। यथा चन्द्रकलायां कळङ्ककला दृढलग्ना वसति, तथा तव दंष्ट्रायां धरणी वसतीत्यत्र उपमानोपमेयसाधारणधर्मोपमावाचकानां चतुर्णामपि प्रतिपादितत्वादसमासगा पूर्णोपमेयम्। तदुक्तम्—'स्वतस्सिद्धेन भिन्नेन सम्मतेन च धर्मतः। साम्यमन्येन वर्ण्यस्य वाच्यं चेदेकदोपमा॥' इति। तया दशनशशिनोः पृथगौपम्यं गम्यत इत्यलङ्कारेणालङ्कारध्वनिः। ततश्च सर्वेश्वरस्यादिवराहमूर्तेर्दंष्ट्राङ्कुरेण धरणीधरणचणत्वरूपं वस्तु ध्वन्यत इत्यलङ्कारेण वस्तुध्वनिः। एतादृशसूकररूपधारिन् केशव जगदीश हे हरे त्वं जय इति पूर्ववद्योज्यम्। 'पातु त्रीणि जगन्ति सन्ततमसौ पाथोधिगर्भस्थितो लीलाकोलकळेबरः स भगवान्यस्यैकदंष्ट्राङ्कुरे। कूर्मः कन्दति नाळति द्विरसनः पतन्ति दिग्दन्तिनो मेरुः कोशति मेदिनी जलजति व्योमापि लोलम्बति॥' 'वराहः कल्याणं वितरतु स वो यस्य शशभृत्कलाकोटीकान्तं क्रमविगळदभ्युद्धृतिभया। मिथस्सम्मूर्छद्भि-

श्चतुरुदधिकल्लोलपटलैरनाकृष्टं दंष्ट्राशिखरमधिशेते वसुमती ॥' इत्यादिषु प्रयोगेषु यथा, तथात्रापि कविसहृदयमनसां तात्कालिकत्वप्रतीतेरध्यक्षायमाणत्वाद्वर्तमाननिर्देशस्य युक्तत्वं बोध्यम्। एवमुपर्यपि चलयसि, खपयसि, वितरसि, वहसि, निन्दसि, कलयसीति प्रयोगोपपत्तिरवसेया ॥ ३ ॥

अथ तुरीयमतिचातुरीधुरीणमवताराद्भुतचरितमनुकीर्तयति— तवेति॥ धृंत नरहरिरूपं नृसिंहाकृतिर्येन तादृश हे केशव तव करकमलवरे कर एव कमलवरं प्रकृष्टं पद्मं तस्मिन् नखम् अद्भुतमाश्चर्यरूपं शृङ्गमग्रं यस्य तादृशम्। वसतीति पूर्वगीतपादगतैव क्रियात्रापि योज्या। करकमलवरे नखमित्याधाराधेययोरुभयोरपि जात्येकवचनं बोद्धव्यम्। पाणिपद्मप्रकाण्डेषु यानि प्रत्यङ्गुलीदळं नखानि स्थितानि, तानि सर्वाण्यप्यद्भुताग्राणि। अद्भुतत्वमाह– दळितो दारिता हिरण्यकशिपोः प्रह्लादपितुः कळेवरमेव भृङ्गो भ्रमरो येन नखेन। अन्यपद्मानां यानि दळाग्राणि, तेषामापातुकभृङ्गदारणशक्त्यभावस्य दृष्टत्वादत्राद्भुतत्वं ज्ञेयम्। अत्र, 'पत्राणि ते न न शितानि शतं किमेभिर्वित्तं हठेन हरतो न रुणत्सि दस्यून्। धिक्ते सरोज मृदुतामळिनां खलानां व्यस्ते यथाऽयमसिपत्रवनप्रवेशः ॥' इत्यादौ पद्मदळानामाकारस्य नैशित्यसत्ताप्रतिमानावहत्वम्, 'इदं किलाव्याजमनोहरं वपुस्तपःक्षमं साधयितुं य इच्छति। ध्रुवं स नीलोत्पलपत्रधारया समिल्लतां छेत्तुमृषिर्व्यवस्यति ॥' इत्यादावपि तत्प्रतिमानस्य भ्रान्तिरूपत्वं प्रतिपादितम्। नरहरिकरकमलदळाग्राणां निजान्तःपतितहिरण्यकशिपुतनुरूपभृङ्गदारणशक्तिरन्यपद्मासाधारणत्वेन दृष्टेत्यद्भुतत्वं सम्यगेव साधितमिति बोध्यम्। उक्तञ्च,'यः स्तम्भादुदयादहो किमिदमित्यालोक्यमानोऽसुरैः स्वं भक्तं परिपातुमेव भगवांल्लीलानृसिंहाकृतिः। सद्योदारितदैत्यराजविगळद्रक्ताप्लुतप्रोल्लसत्पालाशप्रसवोपमाननखराङ्कुरः स वोऽव्याच्चिरम् ॥' इति। अत्र हिरण्यकशिपुतनोः पद्मदळान्तःपातिभृङ्गत्वारोपस्य नरहरिकरस्य कमलत्वारोपस्य च शाब्दत्वान्नखाग्राणां दळत्वारोपस्य पुनरार्थत्वाच्चैकदेशविवर्तिसावयवरूपकमलङ्कारः। तेन च भगवतो नृसिंहस्य अलौकिकपराक्रमशालित्वरूपं वस्तु व्यज्यत इत्यलङ्कारेण वस्तुध्वनिः ॥ ४ ॥

पञ्चमावतारमाह — चलयसीति[१] ॥ अद्भुतशब्दात्तत्करोतीति ण्यन्ताद्‌चि णिलोपः। तादृशान् वामनयति नीचभावं गमयतीत्यद्भुतवामनः। तस्य

१ चलयसि इति व्याख्यातृपाठः। एवमन्यत्रापि व्याख्यानुसारेण तत्कर्तृपाठ ऊह्यः। मूले तु स्वरवत्कृतवद्भिः श्रीश्रीनिवासार्यैरङ्गीकृतः पाठो योजितः ॥

संबुद्धिः । हे अद्भुतवामन । अथवा, अद्भुत वामन इति पदद्वयम् । लोके ये केचन वामना दृश्यन्ते, ते सर्वेऽप्याशरीरपातं वामना एव । न तु कदाचिदपि प्रांशुप्राप्यफलादिलिप्सायां प्रांशुतां प्राप्तुं शक्नुवन्ति । तव तु वामनत्वं [1]फललाभानन्तरमेव प्राप्तवैपरीत्यमित्यद्भुतत्वम् । तादृशवामनरूप हे भगवन् त्वं विक्रमणे विशेषेण क्रमणे पदविक्षेपे भूतलव्यापिनि स्वपदविक्षेपे बलिं वैरोचनिमसुरम् । चलयसि स्थानाद्भ्रंशयसि । त्रैलोक्यैश्वर्यस्थानाद्भ्रंशयित्वा पाताळे पातितवानसीत्यर्थः । एतादृशसामर्थ्यस्य सर्वदा भगवति वर्तमानत्वाल्लट्प्रयोगोपपत्तिरवगन्तव्या । चलयसीति । कम्पने चलिरिति कम्पनार्थस्य चलतेर्घटादिपाठान्नोपधावृद्धिः । किञ्च, पदयोर्नखानां यन्नीरं ब्रह्मकुण्डिकामुखान्मन्त्रपूर्वकं गळिनेन धारारूपेणाम्भसा क्षाळने विधिना कृते भगवतः पादनखेषु क्षणमवस्थितं अलम्, तेन जनितं सम्पादितं जनपावनं जनानां शुद्धीकरणं येन स तथा । तस्य संबुद्धिः । हे पादनखनीरजनितजनपावन । तच्चोक्तम् — 'आदावादिपितामहस्य नियमव्यापारपात्रे जलं पश्चात्पन्नगशायिनो भगवतः पादोदकं पावनम् । भूयश्शम्भुजटाविभूषणमणिर्जह्नोर्महर्षेरियं कन्या कल्मषनाशिनी भगवती भागीरथी दृश्यते ॥' इति । स्वपादोदकेन मन्दाकिनीगङ्गाभोगवत्यात्मना त्रैलोक्यं व्याप्नुवता सकलजनपातकनिवर्तकेत्यर्थः । अत्र निषिद्धस्यापि नखोदकस्य सकलजनपावनत्वप्रतिपादनाद्भगवतः श्रीकृष्णस्यालौकिकमहिमातिशयसूचनं कृतमित्यवसेयम् । गङ्गाजलेति वक्तव्यस्यार्थस्य पदनखनीरेति भङ्ग्यन्तरेणाभिधानात्पर्यायोक्तमलङ्कारः, 'पर्यायोक्तन्तुगम्यस्य वचो भङ्ग्यन्तराश्रयम्' इति लक्षणात् । दृश्यमानस्य गङ्गाजलधावल्यस्य भगवत्पादनखक्षणसंसर्गहेतुकत्वेन संभावनस्य गम्यत्वाद्गम्योत्प्रेक्षा । तयोस्सजातीययोर्विजातीयेनानुप्रासेन सह संसृष्टिः । 'ऊर्ध्वाण्डच्छत्रदण्डः शतधृतिभवनाम्भोरुहो नाळदण्डः क्षोणीनौकूपदण्डः क्षरदमरसरित्पट्टिकाकेतुदण्डः । ज्योतिश्चक्राक्षदण्डस्त्रिभुवनविजयस्तम्भदण्डोऽङ्घ्रिदण्डः श्रेयस्त्रैविक्रमस्ते वितरतु विबुधद्वेषिणां कालदण्डः ॥' इति ॥५॥

अथ स्वकर्मदोषभ्रष्टदुष्टराजन्यकपिष्टपेषणपटिष्ठप्रकृष्टवीर्यपरिपुष्टं षष्ठमवतारमभिष्टौति — क्षत्रियेति ॥ भृगुपतिर्जमदग्निः तस्य रूपं भृगुपतिरूपम् । धृतं

1 फललाभानुगुणम्, अनन्तरञ्च प्राप्तप्रांशुत्वमित्यद्भुतत्वम् ।

भृगुपतिरूपं येन स तथा। तस्य संबुद्धिः। हे भृगुपतिरूप, 'रूपं तदोजस्वि तदेव वीर्यं तदेव नैसर्गिकमुन्नतत्वम्। न कारणात्स्वाद्बिभिदे कुमारः प्रवर्तितो दीप इव प्रदीपात् ॥' इति कालिदासोक्त्या च 'आत्मा वै पुत्रनामासि' इति श्रुत्या च जमदग्नेरात्माभिन्नः परशुरामसंज्ञयावतीर्णोऽसि। तादृश हे केशव त्वं क्षत्रियाणां जमदग्निद्रुहां दुष्टराजन्यानां यद्रुधिरं रक्तम्, तन्मये तत्स्वरूपे। 'स्वरूपार्थेऽपि मयडिति केचित्' इति वचनान्मयट्। पयसि तोये। पापमेषामस्तीति पापाः जमदग्निद्रुहः क्षत्रियाः। पापशब्दादर्शआद्यच्। अपगता नष्टाः पापा यथा भवन्ति तथेति स्नपनक्रिया विशेष्यते। किञ्च, शमितः शान्ति गमितः। अस्तं गमित इति यावत्। भवतापः सांसारिकदुःखं यथा भवति तथा। यद्वा, द्वयमपि जगद्विशेषणम्। अथवा, भवत्यस्मात्परशुराम इति भवः जमदग्निः। तस्य तापः मरणजन्यं दुःखम्। स शमितो यथा भवति तथा। क्षत्रियैरसकृन्निगृहीतं पितरं शुक्रेणोपजीवितवान् परशुराम इति हि कथा श्रूयते। यद्वा, भवः शिवः। 'व्योमकेशो भवो भीमः' इत्यमरः। तस्य तापः मम शिष्यस्यैवं व्यसनं जातमिति व्यथा। स शमितो यथा भवति तथेति। जमदग्निः क्षत्रियैर्व्यापादित इति चारणमुखादाकर्ण्याऽऽ कष्टम्' इति दुःखिते शिवे परशुरामेण क्षत्रियास्सर्वे व्यापादिताः, जमदग्निः शुक्रेणोज्जीवित इति गगनचरैर्निवेदिते भवस्य तापोऽपि शाम्यति। तथा च जगत् जगद्वासिनं जनं स्नपयसि मज्जयसि। आत्मना निर्मितेषु क्षत्रियरुधिरपूर्णेषु ह्रदेषु पावनतीर्थतां गतेषु मज्जनादद्यापि जगद्वासिनामैहिकामुष्मिकतापनिवृत्तिर्जायत इति भावः। अत्र स्नपयसि पयसीति यमकम्। इदमेकत्र स्थितमपि 'नरवरो रवरोपितकेसरी' इत्यादिवत्सहृदयमुदावहम्। तस्यानुप्रासेन सजातीयेन संसृष्टिः। रुधिरमये पयसि स्नपयसीति वस्तुना परशुरामस्य सर्वोत्कृष्टप्रतापशालित्वरूपं वस्तु व्यज्यत इति वस्तुना वस्तुध्वनिः। पूर्वोक्तवद्वर्तमाननिर्देशोपपत्तिः। 'यस्य श्रीजमदग्निजस्य परशुस्त्रिस्सप्तकृत्वो नृपान् हत्वा संयति कार्तवीर्यनृपतेर्दोर्मण्डलीखण्डनः। अक्षत्रामखिलामदाद्वसुमतीं यः काश्यपायर्त्विजे क्रौञ्चच्छेदिसतीर्थ्यतापृथुयशाः पायात्स वो भार्गवः ॥' ॥ ६ ॥

अथ रामभद्रावतारमुपवर्णयति— वितरसीति ॥ धृतं रघुपतिरूपं येन तथा। श्रूयन्ते किल—'एतौ तौ दशकण्ठकण्ठकदलीकान्तारकान्तिच्छिदौ

वैदेहीकुचकुम्भकुङ्कुमरजोराजीविराजत्तलौ। लोककल्याणविधानसाधुयजनप्रारम्भयूपौ भुजावव्यास्तामुरुविक्रमौ रघुपतेरान्ध्यं निरुन्धाञ्च नः॥' 'रमन्ते योगिनोऽनन्ते सत्यानन्दे चिदात्मनि। इति रामपदेनासौ परं ब्रह्माभिधीयते॥' इत्यादीनि। तेषु च श्रीरघुपतिश्रीरामादिशब्दवाच्यताभिमानितारकब्रह्मतेजोविवर्तरूपं नीलोत्पलसवर्णं किमपि शरीरं येन पुरा समवलम्बितम्, तस्य संबुद्धिः। हे धृतरघुपतिरूप रावणबाधितविबुधहिताय दाशरथिरूपधारिन्नित्यर्थः। जगदीश एकेन यत्नेन रक्षितचतुर्दशभुवनतया प्रकटितनिजैश्वर्य इति यावत्। तादृश हे केशव त्वं रणे दशमुखमौलिबलिं दिक्षु वितरसि। बालिवधवशीकृतसुग्रीवादिवानराशरवरपराक्रमसङ्कुले महति संग्रामे हतामात्यमन्त्रिभ्रातृसुतपृतनतया स्वयमागत्य युध्यमानस्य दशमुखस्य रावणस्य मौलिरूपं किरीटात्मकं बलिमुपहारम्। 'चूडा किरीटं केशाश्च संयता मौलयस्त्रयः' इत्यमरः। किरीटदशकात्मकमुपहारं दिक्षु दशसु वितरसि ददासि। तत् कथम्—रमणीयं यथा भवति तथा इति बलिवितरणक्रियाविशेषणम्। तेन तान्त्रिकविधानपारीणतां द्योतयता प्रकृत एव रणे पाण्डित्यातिशयः प्रत्याय्यते। किमर्थं दिक्षु बलिवितरणं कृतमित्याशङ्कायामाह—दिक्पतिकमनीयमिति। दिक्पतीनां दशानां कमनीयम् अभिलषणीयम्। अपहृताधिपत्यैरपि रावणाद्भीतैर्यथास्वमाशास्वेव निलीय स्थितैर्दिक्पालैर्दशभिरपि चिरतरस्पृहाविषयीकृतत्वात्तैरिदं कमनीयमिति निश्चित्य दिक्षु विभज्यैकैकं किरीटं प्रक्षिप्तवानिति यावत्। एकैककिरीटदर्शनेऽपि दशमुखवधस्यानिश्चेयत्वाद्दशस्वपि दिक्षु प्रत्येकं दशकं दत्तमिति वा। 'बालार्कप्रतिमेवाप्सु वीचीभिन्ना पतिष्यतः। रराज रक्षःकायस्य कण्ठच्छेदपरम्परा॥' इति कालिदासोक्त्या, 'एवमेकशतं छिन्नाः' इति वाल्मीकिगिरा च तदुपपत्तिः। अत्र च 'निवर्त्यैवं दशमुखशिरश्छेदि कार्यं सुराणां विष्वक्सेनः स्वतनुमविशत्सप्तलोकप्रतिष्ठाम्। लङ्कानाथं पवनतनयञ्चोभयं स्थापयित्वा कीर्तिस्तम्भद्वयमिव गिरौ दक्षिणे चोत्तरे च॥" इति कालिदासवचनानुसारेण प्रारब्धापरिसमाप्तत्वमध्यवस्य वर्तमाननिर्देशः सुघटः। एवमत्र प्रस्तुतश्रीरामचरितवर्णनायां विशेषणसाम्यवशादप्रस्तुततान्त्रिकव्यवहारस्य गम्यत्वात्समासोक्तिरलङ्कारः। सा च रूपकोत्थापितेति तयोरङ्गाङ्गिभावसङ्करः। स तु विजतीयेनानुप्रासेन संसृष्टः ॥ ७ ॥

अथ कामपालावतारमाह—वहसीति॥ धरतीति धरः। पचाद्यच्। हलस्य लाङ्गलस्य धरो बलभद्र इत्यर्थः। धृतं हलधरस्य रूपं येन स तथा।

तस्य सबुद्धिः। हे धृतहलधररूप केशव जगदीश त्वं जय। विशदे कुन्देन्दुतुषारहारधवळे वपुषि स्वदेहे जलदाभं नीलमेघश्यामळं वसनमंशुकं वहसि धारयसि। ततश्च नीलाम्बर इति नाम्ना प्रसिद्धोऽसि। वसनन्तु तव न केवलं मूर्तिमेव, अपि तु कीर्तिमपि प्रकाशयतीत्याह—हलहतिभीतिमिळितयमुनाभमिति। हलेन लाङ्गलेन हतिराकर्षणम्। ततो भीतिः हलहतिभीतिः। तया हेतुना मिळिता स्वयमपराधं क्षमापयितुं पादावाश्लिष्य स्थिता यमुनेयमिति भा भानं प्रतीतिर्यत्र तादृशं वसनमित्यर्थः। व्यधिकरणबहुव्रीहिरियम्। यमुनेव भाति यमुनाभमिति मिजन्तो वा। जलदस्याभेवाभा यस्येति उपमाभेदोऽयम्। हलहतिभीतिमिळितयमुनाभमिति तूत्प्रेक्षा। तयोरसजातीययोः संसृष्टिः, तया विजातीयस्यानुप्रासस्य च। तेन च, 'उद्यत्कार्तिकपूर्णिमेन्दुसुषमो नीलाम्बरो रेवतीजानिर्धेनुकमुष्टिकारिरखिलालम्बः प्रलम्बान्तकः। काळिन्दीदमनो हली विविदजित्सङ्कर्षणो रुग्मिहा पायाद्वः कमलापतिश्चिरतरं श्रीकामपालो हरिः॥' इत्यादाविव भावध्वनिश्च ॥ ८॥

अथावतारान्तरमनुसन्धत्ते—निन्दसीति॥ धृतं बुद्धशरीरं 'निन्दन् यागविधानतः श्रुतिमतं स्वच्छन्दलोकत्रयीसञ्चारित्रिपुरामरारिरमणीचित्तभ्रमोत्पादकः। सर्वज्ञो भगवान् मुनिर्दशबलश्शास्ता जिनः श्रीघनः पायान्नः कमलामुखाब्जमधुपो बुद्धावतारो हरिः॥' इत्यादिभक्तजनप्रणामविषयीभूत बुद्धमुनिवपुर्येन तस्य संबुद्धिरियम्। हे धृतबुद्धशरीर आश्रितबुद्धमुनिवेष हे केशव त्वं यज्ञविधेर्यागविधानाद्धेतोः श्रुतिजातम् अहह निन्दसि वेदनिवहं धिग्धिगिति निन्दसि। 'अहिंसा परमो धर्मस्त्वधर्मः प्राणिनां वधः।' इत्यादिवाक्यकल्पनया हिंसापूर्वकक्रत्वनुष्ठानप्रतिपादकं श्रुतिवाक्यजातमप्रमाणमिति कांश्चिन्मन्दमतीन् बोधयसीत्यर्थः। अथवा, अहहेति खेदविस्मयद्योतको निपातसमुदायः। 'अहहेत्यद्भुते खेदे' इत्यमरः। कविवाक्यं खल्विदम्। खेदस्तु यागाद्यनुष्ठापकवेदप्रणेतुर्भवत एव तद्विरुद्धाचारप्रवर्तकत्वमपि जातमिति विमृशतः कवेर्घटत एव। विस्मयः पुनरपांसुळललामभूतत्रिपुरकामिनीजनपातिव्रत्यपराकरणे समुचितेयमुपायचातुरीति विचारयतः स्वयमुदयतीति क्रमो वेद्यः। कीदृशं श्रुतिजातम्—दर्शितपशुघातं विहितपश्वालम्भकर्तव्यताकम्। त्वं कीदृशः—दयया सह वर्तत इति सदयम्। तादृशं हृदयं यस्य तस्य संबुद्धिः। हे सदयहृदय सर्वभूतानुकम्पिन्नित्यर्थः। अस्यावैदिकमतस्याद्यापि मन्दमतिभिर-

ङ्गीक्रियमाणत्वाद्वर्तमाननिर्देशः। अत्र श्रुतिजातनिन्दनरूपस्यार्थस्य दर्शितपशुघातमिति सदयहृदयेति च पदद्वयार्थहेतुकत्वात्पदार्थहेतुकं काव्यलिङ्गम्। तस्य चानुप्रासेन संसृष्टिः ॥ ९ ॥

अन्तिमावतारमाह—म्लेच्छेति॥ धृतं कल्किशरीरं येन तस्य संबुद्धिः। हे धृतकल्किशरीर केशव त्वं म्लेच्छानां पाषण्डानां निवहस्य निधने मारणे विषये करवाळं खड्गं कलयसि बिभर्षि। वैदिकमार्गविरोधिनां देवब्राह्मणदूषकाणां पाषण्डानां कलिकालमूर्छिताहङ्कृतीनां निग्रहं विषयीकृत्य कल्किनामा भविष्यसि। तदा खड्गं च धारयिष्यसीत्यर्थः। वर्तमानसामीप्याद्वर्तमानवद्भविष्यदर्थे लट्। किमपीत्यव्ययम्। अनिर्देश्यमित्यर्थः। किमपि एतादृशमिति वक्तुमशक्यम्। कराळं क्रूरमित्येव वक्तुं शक्यम्। करवाळविशेषणमिदम्। किंवत् कराळम्—धूमकेतुर्नाम रात्रौ गगने परिदृश्यमान औत्पातिको महातालप्रमाणप्रकाशकः केतुविशेषः। धूमः केतुश्चिह्नं यस्य सः धूमकेतुः। अग्निरित्यर्थः। अग्निमयाः केचन ग्रहा एव केतव इत्युच्यन्ते। तेष्वेको धूमकेतुः। स तूत्पातकाले व्योम्नि प्रकाशते। तमिवातिक्रूरं खड्गं गृहीत्वा म्लेच्छसमूहनिधनं विधाय धर्मसंस्थापनार्थं कल्किसंज्ञयावतरिष्यन् त्वं जय। सर्वोत्कर्षेण वर्तस्वेत्यर्थः। अत्र पूर्णोपमा। तात्कालिकत्वप्रतीत्या धृतेति भूतार्थप्रयोगोपपत्तिः ॥ १० ॥

'तत् कुरुष्व मदर्पणम्' इति भगवद्वचनप्रामाण्यादुक्तं गीतं भगवते समर्पयति—श्रीजयदेवकवेरिति॥ धृतं दशविधं रूपं येन, तस्य संबुद्धिः। धृतदशविधरूप केशव जगदीश हे हरे त्वम् उदारं ध्वनिगुणालङ्कारादिसम्पत्त्या गम्भीरमित्यर्थः। अत एव सुखदं सरससहृदयहृदयाकर्षकं शुभदम् उचितरागताळमिळिततया गीयमानं मङ्गळावहम्। किञ्च, भवं संसारं सारयति अपसारयतीति तथा। संसाररोगौषधायमानमिति यावत्। अथवा, भवत्यस्मान्मुक्तिरिति भवो भक्तिः। तत्सारं तदङ्गेषु प्रधानभूतम्। श्रवणकीर्तनयोस्सम्यगनुकूलमित्यर्थः। यद्वा, भवो जन्म तत्सारं 'मरणं प्रकृतिश्शरीरिणां विकृतिर्जीवितमुच्यते बुधैः। क्षणमप्यवतिष्ठते श्वसन्यदि जन्तुर्ननु लाभवानसौ॥' इति काळिदासवचनानुसारेण भगवद्भजनस्यैव जीवितसाफल्यावहत्वाज्जन्मसाफल्यकरम्। एतादृशं श्रीजयदेवकवेरुदितमुद्भूतम् इदं दशावतारचरितप्रशंसारूपं गीतं शृणु आकर्णय। सहृदयजनान्तर्यामिणा

त्वयैवेदं त्वद्गुणवर्णनं मयि कृपया सम्यगाकर्णयितव्यम्। न चेत् 'बोद्धारो मत्सरग्रस्ताः प्रभवः स्मयदूषिताः। अबोधोपहताश्चान्ये जीर्णमङ्गे सुभाषितम्॥' इति भर्तृहरिवचनरीत्या सुभाषितवैयर्थ्योपपत्तिः स्यादिति त्वमेव भक्तवत्सलो मया प्रार्थ्यस इति भावः। भगवत एव सादरश्रोतृत्वाङ्गीकारे सति गातॄणां कवेश्च सर्वपुरुषार्थास्सेत्स्यन्तीत्यभिप्रायः। अत्रानुप्रासो भावध्वनिश्च ॥ ११ ॥

एवमेकादशभिः पादैरवतारदशकं तदनुस्मरणसाफल्यं च प्रकाश्यादिमं गीतं समाप्य 'इष्टं हि विदुषां लोके समासव्यासधारणम्' इति न्यायेन सारसंक्षेपरूपैर्वाक्यैः पुनरपि विजातीयप्रत्ययानुदयायाद्यगीतार्थमनुसन्धत्ते श्लोकेन — वेदानुद्धरत इति॥ अत्र प्रकृतत्वादेव भगवन्निति संबुद्धिरध्याह्रियते। हे भगवन् वेदानुद्धरते तुभ्यं नमः। सोमकासुरे निगमानपहृत्य प्रळयाब्धौ निमग्ने मत्स्यरूपेणावतीर्य तमसुरं निहत्य तदुदरान्निगमानुद्धृत्य धात्रे दत्तवते तुभ्यं नमस्कारो मया क्रियत इत्यर्थः। जगन्ति लोकान् वहते बिभ्राणाय तुभ्यं नमः। अमृतमथनकाले जलधौ मग्नं मन्दराचलमुद्धर्तुं कच्छपरूपं धृत्वा पुनस्तेनैव रूपेण भूमण्डलं वहतश्शेषस्याधारतया तदधो वर्तमानाय तुभ्यं नमस्कार इत्यर्थः। भूगोळमुद्बिभ्रते तुभ्यं नमः। हिरण्याक्षेण भूमण्डले जलधौ निमज्जिते सति वराहरूपेण विधातृनासिकारन्ध्रादुद्भूय बहुलक्षयोजनविस्तीर्णमूर्तिधारिणे हिरण्याक्षं हत्वा भूमिं यथापुरं स्थापितवते तुभ्यं मया नमस्कारः क्रियत इत्यर्थः। दैत्यं हिरण्यकशिपुं दारयते बहुशताङ्गुलिदीर्घाग्रदीप्रप्रखरनखरशृङ्गैर्विदारितवते तुभ्यमयं नमस्कारः। बलिं वैरोचनिं छलयते स्थानाद्भ्रंशितवते वामनमूर्तये तुभ्यमयं नमस्कारः। क्षत्रक्षयं जमदग्निघातकदुष्टक्षत्रियकुलविनाशं कुर्वते परशुरामाय तुभ्यमयं नमस्कारः। पुलस्त्यस्यापत्यं पुमान् पौलस्त्यो रावणः, तं जयते अभिभूतवते ससुतामात्यानुजसैनिकं रावणं हतवते श्रीरामभद्ररूपाय तुभ्यमयं नमस्कारः। हलं लाङ्गलं कलयते बिभ्राणाय बलभद्ररूपेणावतीर्य प्रलम्बधेनुकमुष्टिकविविदादिदुष्टजनान् पिष्टवते तुभ्यमयं नमस्कारः। कारुण्यं करुणाम्। चतुर्वर्णादित्वात् ष्यञ्। करुणा अस्यास्तीति करुणः। अर्श आद्यच्। गुणवचनब्राह्मणादिभ्यः ष्यञ् वा। आतन्वते आ समन्ताद्विस्तारयते। 'आत्मवत्सर्वभूतानि यः पश्यति स पश्यति' इति न्यायेन सर्वभूतानुकम्पाशालितया बुद्धमुनीभूय क्रत्वङ्गपशुघातदोषप्रोद्घोषणतया वैदिकमतविरोधिमतप्रवर्तकाय तुभ्यमयं नमस्कारः। म्लेच्छान् सर्वधर्मविप्लावकान् क्रूरकर्मणः

पापिष्ठान् मूर्छयते झटिति मारयते कल्किरूपाय तुभ्यमयं नमस्कारः। एवं दशाकृतिकृते दशत्वयुक्ता आकृतिः दशाकृतिरिति 'तद्धितार्थोत्तरपदसमाहारे च' इति मध्यमपदलोपी समासः। 'दिक्संख्ये संज्ञायाम्' इति वा समासः। दशाकृतिं करोतीति दशाकृतिकृदित्यत्र कृञः कर्तरि क्विप्, ह्रस्वस्य पिति कृति तुक्। एवं दशविधामाकृतिं धृत्वा जगद्रक्षितवते कृष्णाय तुभ्यं नमः। 'कृषिर्भूवाचकः शब्दो णश्च निर्वृतिवाचकः। सत्तानन्दात्मकं तेजः कृष्ण इत्यभिधीयते॥' इत्युक्तलक्षणलक्षिताय परब्रह्मात्मने श्रीकृष्णाय तुभ्यमयं नमस्कार इत्यर्थः। अत्र सर्वत्र 'नमः स्वस्ति' इत्यादिना चतुर्थी। प्रतिसर्गं प्रवाहनित्यताद्योतनार्थं वर्तमाननिर्देशः। श्रीकृष्णविषयायां रतेः प्रकाशनादत्र भावो व्यज्यते। अनुप्रासश्च स्फुटः। सुप्तिङ्व्युत्पत्तेस्सम्यक्तयाभ्यन्तरः कश्चिदलङ्कारोऽयं बोद्धव्यः। 'रूपकादिमदलङ्कारं बाह्यमाचक्षते बुधाः। सुपां तिङाञ्च व्युत्पत्तिं वाचां वाञ्छन्त्यलङ्कृतिम्॥' इति वचनात्। औदार्यं नाम गुणश्चात्रोद्गुणः। 'उत्कर्षवान् गुणः कश्चिदुक्ते यस्मिन् प्रतीयते। तदुदाराह्वयं तेन सनाथा काव्यपद्धतिः॥' इति वचनात्। वृत्तं शार्दूलविक्रीडितम्। तल्लक्षणं प्रागुक्तम् ॥ ५ ॥

एवं गीतात्मना व्यासेन पद्यात्मना समासेन च दशावतारचरितान्यनुकीर्त्य 'कृष्णाय तुभ्यं नमः' इति सर्वमिदं श्रीकृष्णे समर्प्य पुनर्गीतेन स्वप्रबन्धनायकं श्रीकृष्णमेव विशेषेण वर्णयितुमारभते — श्रितेति॥ गुर्जरीरागेण गीयते, अटताळेन वाद्यते इति वचनस्यायमभिप्रायः — माळवरागेण पूर्वगीतगानानन्तरं तत्कळत्रभूताया गुर्जर्यास्सन्निधानमस्त्येव। तन्निरासो न युक्त इति तदुक्तम्। 'गुण्डक्रिया गुर्जरी च गौळीता माळवस्त्रियः' इति। गुर्जरीस्वरूपन्तु, 'श्यामा सुकेशी मलयद्रुमाणां मृदूल्लसत्पल्लवकल्पयाता। श्रुतेः स्वराणां दधती विभागं तत्स्त्रीमुखे दक्षिणगुर्जरीति॥' इति। अत्र जयेत्यारभ्य हरे इत्यन्तं ध्रुवपदम्। श्रितः आश्रितः कमलाया लक्ष्म्याः, 'कमला श्रीर्हरिप्रिया' इत्यमरः, कुचौ स्तनौ तयोर्मण्डलः मूलदेशः येन स तथा। तस्य संबुद्धिः श्रितकमलाकुचमण्डल। कमलाकुचमण्डलं श्रितः श्रितकमलाकुचमण्डल इति वा। वाहिताग्न्यादिष्विति निष्ठायाः पूर्वनिपातः। लक्ष्मीकुचकलशयुगळमूलदेशप्रसारितकराग्रभाग इत्यर्थः। किञ्च, धृते श्रवणपाशयोर्निवेशिते कुण्डले मकराकारे कर्णभूषणे येन तस्य संबुद्धिः धृतकुण्डल इति।

1 संप्रवाहनित्यता।

अपि च कलिता उरसि धारिता ललिता वनमाला बहळपरिमळसुरतरुकुसुमपल्लव-निबिडसन्निवेशपेशलकौशलगुम्फिता स्रग्वैजयन्तीसंज्ञा येन तस्य संबुद्धिः कलित-ललितवनमाल इति। एतादृशस्वरूप हे हरे देव त्वं जय जय। मोहनरूपत्वे माहात्म्येऽपि विचारिते त्वदन्यः कोऽपि हितार्थिना न सेव्य इति भावः। त्वं जय जय भक्तपरित्राणधुरन्धरस्त्वं सर्वोत्कर्षेण वर्तस्व। भक्त्यतिशयोत्थेन संभ्रमेण द्विरुक्तिः। यद्वा, प्रभुपरितोषार्थिभृत्यजनाननजनितस्य जयशब्दस्यातिमङ्गलत्वा-न्मङ्गळशब्दानाञ्च पुनरुक्तिदोषाभावात्सहृदयमुदावहेयं पुनरुक्तिरिति ध्येयम्। तदुक्तमाचार्यदण्डिना। 'अनुकम्पाद्यतिशयो यत्र कश्चिद्विवक्ष्यते। न दोषः पुनरुक्तेऽपि प्रत्युतेयमलङ्कृतिः॥' इति। अत्र भक्त्यतिशयस्याशये विकसतः प्रकाशनीयत्वेन विवक्षितत्वात्। इहानेकवर्णावृत्तेः सकृत्कृतत्वाच्छेकानुप्रासः शब्दालङ्कारः ॥ १ ॥

एवमलङ्कारानुपवर्ण्य पश्चादास्पदापदानपरिजनानुसन्धानद्वारा समुपास्ते-**दिनमणीति**॥ दिनमणिः सूर्यः। 'प्रद्योतनो दिनमणिः' इत्यमरः। तस्य मण्डलं बिम्बम्। 'बिम्बोऽस्त्री मण्डलं त्रिषु' इत्यमरः। दिनमणिमण्डलमिव दीप्रं मण्डन-मलङ्कारो यस्य तस्य संबुद्धिः। सूर्यबिम्बवदतिदीप्रदिव्यभूषणालङ्कृतसर्वाङ्गेत्यर्थः। अथवा, दिनमणिमण्डलस्य स्वावासभूतसूर्यबिम्बस्य मण्डनमलङ्कारः, तस्य सम्बुद्धिः। दिनमणिमण्डलमण्डन स्वावासभूतसूर्यबिम्बप्रकाशक इत्यर्थः। सूर्यमण्डलावास-त्वञ्च श्रीकृष्णस्य 'ध्येयः सदा सवितृमण्डलमध्यवर्ती नारायणः सरसिजासनसन्नि-विष्टः।' इति वचनादवगन्तव्यम्। अत एव भवस्य संसारस्य खण्डन। ज्ञान-प्रदानेन भक्तजनसंसारहारिन्नित्यर्थः। यद्वा, भवो भक्तजनस्य पुनर्जन्म तत् खण्डयतीति तथा। 'कृत्यल्युटो बहुळम्' इति कर्तरि ल्युट्। भक्तानां मुक्ति-प्रदायिन्नित्यर्थः। अत एव मुनिजनस्य मानसमन्तःकरणं तदेव मानसं मानसाख्यं सरस्तत्र हंस मराळ। अत्र मानसमिति श्लिष्टरूपकम्। अथवा, मुनिजनानां मानसानि हृदयकमलानि तेषां हंस सूर्य। 'भानुर्हंससहस्रांशुः' इत्यमरः। मुनिजनहृदयाकाशप्रकाशमानदिवाकर इत्यर्थः। अत्र छेकानुप्रासरूपकोपमा-भेदानां संसृष्टिः। अस्यार्थोऽन्यथा वा विवेचनीयः। वैकुण्ठलोके श्वेतद्वीपे सूर्यमण्डले च नित्यवासित्वात्त्रिधामा किल श्रीहरिः। तत्राद्ययोर्मानुषागम्यत्वा-त्सूर्यस्य च द्विजानां नित्योपास्यत्वान्नित्यकर्मानुस्यूततया स्वस्यात्यन्तोपास्य इति मत्वानेन कविना दिनमणिमण्डलमण्डनेति संबुद्धिः कृता।

उपासकानां मादृशां प्रयासपरिहारिन्नित्यर्थः। ततो भक्तस्य कवेर्हर्षो व्यज्यते। मण्डनशब्दश्च तद्व्यञ्जकः। 'रतिर्देवादिविषया व्यभिचारी तथाञ्जितः। भावः प्रोक्तः' इति काव्यप्रकाशवचनाद्भावो व्यञ्जितो भावान्तरं व्यञ्जयति। अतोऽत्र व्यङ्ग्यव्यञ्जकता वेदितव्या। पूर्वपादेन वैकुण्ठश्वेतद्वीपवासिनः स्वरूपस्मरणम्। द्वितीयपादस्य त्वेतावता भागेन सवितृमण्डलवासिनो हरेः स्वेनाप्युपास्यत्वानुसन्धानम्। अवशिष्टेन मुनिजनमानसहंसेति सम्बोधनेन तु मुनीनां त्विष्वपि स्थानेषु अभिगम्य सेवितुमधिकारमनुचिन्त्य 'मुक्तभक्तकुलमौलितां गतास्सञ्चरेम शुकनारदादिवत्'इत्यौत्सुक्यं व्यज्यते। तस्य च 'आहूत इव मे शीघ्रं दर्शनं याति चेतसि' इति नारदवचनादिकं मूलमवसेयम्। एतादृशस्वरूप श्रीहरे हे देव त्वं जय जयेति पूर्वपाद इवात्रापि ध्रुवपदयोजना ॥ २ ॥

अथास्तामीदृशो विचारः। 'श्रीकृष्णस्तु भगवान् स्वयम्' इति वचनात्सर्वांशपूर्णतयावतीर्णस्य श्रीकृष्णस्य गुणनामकथात्मकत्रिपथगावगाहने सिद्धे भक्तजनैर्मुक्तिरपि तिक्तायमानतया त्यक्तव्येत्यनुभवप्रामाण्यात् कृष्णगुणानेवानुसन्दधाति—कालियेति॥ कालियाख्यस्य विषधरस्य सर्पस्य भञ्जन आमर्दनकारिन्। भञ्ज आमर्दन इत्यस्माद्धातोर्ल्युट्। जनान् रञ्जयतीति जनरञ्जन। सर्वजनानां स्वस्मिन्ननुरागसम्पादकेत्यर्थः। अत्र विषधरशब्देन तद्भञ्जनहेतुः विषवीर्यमदेन गरुडैरनिष्पत्ति, तदगम्यदेशचिरासिका,तत्कृतबहुजीवनाशदेशक्लेशादिरूपो व्यज्यते। कालियमर्दने क्रियमाणे तत्पत्नीनां नतिनुतिनिरतत्वदर्शनाद्वा, स्वस्य कञ्चित्कालं कालियभोगवेष्टितत्वदशायां निराशव्रजजनमनसि मरणनिश्चयस्य जनितत्वाद्वा जनरञ्जनत्वमनुसन्धीयते। यदोः कुलं यदुकुलम्। तदेव नलिनम्। लक्ष्मीनिवासस्थानत्वाद्बहूपजीव्यत्वाच्च पद्मम्। तस्य दिनेश विकासनमोदनलालनादिभिस्तदनुग्रहैकधुरन्धरेत्यर्थः। एवमनेन ध्रुवपदादृतेन पञ्चविंशत्यक्षरमयेन पादेन वितता कथा सूचितेत्यवसेयम्। अतोऽर्थपुष्टिरक्लिष्टशब्दमार्दवेति कवेर्वैभवं सहृदयैरेवालोचनीयम् ॥ ३ ॥

अथ भक्तपरिपालनव्यसनितां तदुपायसामग्रीञ्चानुसन्धाय श्रीकृष्णस्य चरितान्तरं तत्फलञ्च प्रपञ्चयति—मधुमुरेति॥ मधुर्नाम कैटभाग्रजः आदिदैत्यः। मुरो नाम पञ्चशिरा कश्चिदसुरः। नरको भौमः। मधुश्च मुरश्च नरकश्चेति द्वन्द्वः।

'बहुष्वनियमः' इत्युक्तावपि चारुत्वार्थः 'द्वन्द्वे घि' इति घिसंज्ञस्य मधुशब्दस्य पूर्वनिपातः। मधुशब्दः कैटभस्याप्युपलक्षकः। कल्पादौ मधुकैटभविनाशने महान् यत्नः, मुरनरकयोर्वधे तु तादृशः प्रयत्नो नाभूत्, आयुधसैनिकवाहनादिबहुकृत्यधुरन्धरसहायलाभादित्याह—गरुडः आसनं वाहनं सैनिकानि आयुधान्तरं वा यस्येति। आ समन्तादस्यते क्षिप्यते वैरिष्विन्त्यासनमायुधम्। अस्यतेऽस्थां स्वामिनेत्यासनं सेना। गमनेऽध्यास्यतेऽस्मिन्नित्यासनं वाहनम्। गरुड आसनं वाहनादित्रयं यस्य गरुडासन। एकेन कृतवस्तुत्रयकृत्य इति भावः। अथवा, आदिकालकृतस्य मधुकैटभवधस्य, श्रीकृष्णावतारे प्रायोऽन्ते कृतेन मुरनरकवधेन सह गृहीतस्य 'आदिरन्त्येन सहेता' इति पाणिनिपरिभाषानुसारेण तन्मध्यपतितबहुवतारपरिग्राहकत्वात्सर्वदा दुष्टनिग्रहे प्रयस्यतो भगवतः प्रयासफलं किमिति विचार्य पश्यन् किमप्यवश्यमिदमेवेति निश्चित्य निर्दिशति—सुरकुलं देवसमूहः, तस्य केळीनां विलासानां निदान आदिकारणीभूत। अनेनानिशं क्रियमाणस्य दुष्टनिग्रहस्य शिष्टपरिपालनादृतेऽन्यत् प्रयोजनं तव नास्तीति द्योत्यते। ब्रह्मणः पालनाय मधुकैटभवधः। इन्द्रार्थतया मुरनरकवधः। एवं मध्यपतितान्यपि दुष्टनिधनानि शिष्टपालनतत्खेलनफलानीति यावत्। ननु सुरकुलकेळिनिदानत्वेन प्रतियोगिभूतमसुरकुलकेळिविध्वंसनत्वमपि गम्यते। ततश्च रागद्वेषाधीनता भगवतोऽपीति सर्वैश्वर्यहान्या किन्न भवितव्यमिति चेत्सत्यम्। आपातत एवमाभाति। सतां सुखविहारादिष्वपि परोपकारकत्वात्, असतान्तु परसन्तापदर्शनजन्यत्वात्सुखस्य गुणदोषायत्ते एव रक्षाशिक्षे। न तु भगवतो रागद्वेषायत्ते इति विवृण्वतां न क्वचिदनुपपत्तिः। अत्रानुप्रासे शसयोरैक्यं सर्वसम्मतम् ॥ ४ ॥

अथ विष्णुर्नारायणः कृष्ण इति नाम्नामभेदानुसन्धानपूर्वकं किमपि प्रार्थयते — अमलेति॥ अमलं निर्मलं यत् कमलं पुण्डरीकमित्यर्थः। तस्य यद्दळं पलाशम्। 'पत्रं पलाशं छदनं दळं पर्णं छदः पुमान्' इत्यमरः। तत्तुल्ये लोचने नेत्रे यस्य तस्य सम्बुद्धिः। मध्यमपदलोपी समासः। पुण्डरीकपलाशाक्षेत्यर्थः। भवशब्दस्तन्त्रेणोपात्तो हलन्त्यमितिवद्बोध्यः। भवस्य स्वभक्तस्य महादेवस्य यो भवः संसारः चर्माम्बरभिक्षाकपालकमृगादिपरिग्रहः तन्मोचन। रुद्रस्य ब्रह्मशापोपनतभिक्षाटनपरिश्रमनिवर्तकेत्यर्थः। वरपरीक्षार्थमनुद्रुतवतो वृकासुराद्बिभ्यतो भुवनेषु धावतो भवस्य भयमोचकेति वार्थः। महादेवस्य विष्णुभक्तत्वं 'प्रह्लादश्चाम्बरीषश्च वसुर्वायुसुतः शिवः। विष्वक्सेनोद्धवाक्रूराः

सनकाद्याश्शुकादयः ॥ महाविष्णुप्रसादोऽयं सर्वे गृह्णन्तु वैष्णवाः' इति वचनादवगन्तव्यम् । अथवा, अमलकमलदळलोचनत्वेन भक्तेष्वपाङ्गदानचातुर्यं गम्यते। अपाङ्गदानमात्रेण भक्तजनसांसारिकदुःखमोचनत्वं भवमोचनेत्यनेन च द्योत्यते । ततश्च 'कटाक्षमात्रेण भवाम्बुराशेः पारं परं प्रापयतस्त्रिलोकीम् । सकृन्नमस्या परमादरस्ते मतानुरूपं हि फलं क्रियाणाम् ॥' इति श्रीकृष्णविलासवचनार्थो व्यज्यते। अतश्चान्यान्वेषणविमुखोऽहं त्वामेव सेवेतरामिति स्वाध्यवसायः सूचितः। त्रीणि भुवनानि त्रिभुवनम्। पात्रादित्वाङ्ङीबभावः। 'द्विगुरेकवचनम्' इत्येकवचनम्। तदेव भवनं तस्य निधान आधारभूत। निधीयतेऽस्मिन्निति निधानम् । 'क्वाहं तमोमहदहंखचराग्निवार्भूसंवेष्टिताण्डघटसप्तवितस्तिकायः। क्वेदृग्विधाविगणिताण्डपराणुचर्यावाताध्वरोमविवरस्य च ते महत्त्वम् ॥' इत्यादिषु बहुलक्षकोटिसंख्यब्रह्माण्डपरमाणुनिर्गमप्रवेशभ्रमणपवनपथायमानरोमकूपत्वाद्भगवतो यावन्महिमा ज्ञायते, तद्वदिहापि ज्ञेयः। त्रिभुवनमित्युपलक्षणं चतुर्दशलोकात्मकानां ब्रह्माण्डानाम्। तस्य च भवनत्वारोपः, सुरनरतिर्यग्रूपबहुजीवलोकाध्युषितत्वात्। अथवा, त्रिभुवनरूपे भवने गृहे निधान निधिभूत। अनेन समुचितायव्ययाधीनधनधान्यादिसञ्चयसद्भावे भवनवासिनां सुखम्, तदभावे दुःखं यथा नियतम्, तथैव त्वय्यन्तस्सन्निहिते भक्तानां संसारचक्रभ्रमणमपि नातिव्यथावहमिति द्योत्यते, 'दिवि वा भुवि वा ममास्तु वासो नरके वा नरकान्तक प्रकामम्। अवधीरितशारदारविन्दौ चरणौ ते मरणेऽपि चिन्तयामि ॥' इति कुलशेखरोक्तेः। अत्र रूपकानुप्रासयोः संसृष्टिः ॥ ५ ॥

अथ 'यावद्रामकथा लोके तावद्राजा विभीषणः' इति वचनाज्जननमरणव्यसनपारतन्त्र्येण जगद्भ्रमणसंभवेऽपि भगवत्कथाश्रवणकीर्तनाद्यधिकारिणां मुक्तौ नातित्वरेति मन्वानः कथासु च रामकथायाः सुतरां स्वादुतां पश्यतान्विमृशंस्तत्कथासारमनुकीर्तयति—जनकेति ॥ जनकसुतायै कृतं भूषणमलङ्करणं येन। प्रेमातिशयात्स्वस्यैवालङ्कर्तृत्वमित्यवगन्तव्यम् । अथवा, जनकसुतायाः सीतादेव्याः आकृतमाकारः भावे क्तः। तदेव भूषणं यस्य स तथा । तस्य संबुद्धिः । वामाङ्कस्थापितसीताकळेबरमयभूषणेत्यर्थः। यद्वा, जनकसुतायै कृतं विधात्रा विरचितं भूषणमाभरणम्। तस्य संबुद्धिः । ब्रह्मणा सीतादेव्याः समुचितसर्वाङ्गभूषणत्वे कल्पितेत्यर्थः। उक्तञ्च तद्वृद्धैः —'पतिर्हि भूषणं स्त्रीणां भूषणादपि भूषणम्' इति । जनकसुतया कृतं भूषणमलङ्करणं यस्येति वा। सीतैकभूषणेत्यर्थः।

तदुक्तमुत्तररामचरिते —'इयं गेहे लक्ष्मीरियममृतवर्तिर्नयनयोरियं मे सर्वाङ्गे शिशिरमसृणश्चन्दनरसः' इति। जितो दूषणः दूषणाख्यो राक्षसो येन। दूषणशब्द उपलक्षणं खरत्रिशिरःप्रभृतीनामपि। दूषणखरत्रिशिरोविजयिन्नित्यर्थः। अथवा, जितं पराकृतम्। निरस्तमिति यावत्। दूषणं जनापवादो येन। जनकाज्ञानिर्विशेषं राज्यलुब्धसपत्नीमातृनिदेशानुवर्तिन्नित्यर्थः। अन्ते अन्तर्वत्न्याः पत्न्याः परित्यागेनापि परिहृतजनापवाददूषणेत्यर्थः। सर्वथा निष्कळङ्केत्यर्थः। समरे युद्धे शमितो हतो दशकण्ठो रावणो येन। तस्य संबुद्धिः। अत्र रामचन्द्रविषयो भावो ध्वन्यते ॥ ६ ॥

अथ श्रीकृष्णमेव वर्णयति—अभिनवेति॥ अभिनवो नूतनो यो जलधरो मेघः तद्वत्सुन्दर। अनेन ग्रीष्मकल्पस्मरसन्तापितगोपिकाचातकीनिर्वृतिदानचातुर्यं सूचितम्। धृतो मन्दरो येन। अत्र विशेषेण सामान्यं लक्ष्यते। ततो गोवर्धनोद्धरणमेवोक्तमिति मन्तव्यम्। अत एव 'अचलोद्धरणादिभिर्विलासैरतिलोकैरतिवाह्य बालभावम्। अनुवर्तितुमैच्छदम्बुजाक्षो वनितानन्दविधायिनीमवस्थाम्॥' इति श्रीकृष्णविलासोक्तनयेन प्रतिनिशं तारुण्याङ्गीकरणं दिनेषु कैशोराश्रयणञ्च श्रीकृष्णस्य बोद्धव्यम्। 'भगवानपि ता रात्रयश्शारदोत्फुल्लमल्लिकाः। वीक्ष्य रन्तुं मनश्चक्रे योगमायामुपाश्रितः॥' इति भागवतेऽपि योगमायाश्रयणं निशि निशि तारुण्याङ्गीकरणमेव कथितम्। श्रीर्महालक्ष्मीः तस्याः मुखं चन्द्र इव मुखचन्द्रः। उपमितसमासः। तत्र चकोरः। तद्रसास्वादकेत्यर्थः। यद्वा, अत्र श्रीरिति राधोच्यते, तस्या लक्ष्म्यंशावतारत्वात्। राधामुखचन्द्रचकोरेत्यर्थः। सतीषु बह्वीष्वपि वल्लवीषु राधामुखचन्द्रदर्शनतत्कान्तिरसास्वादनादिष्वतीवौत्सुक्यशालिन्निति प्रस्तोष्यमाणप्रबन्धव्यापिनः शृङ्गारस्य बीजावापोऽयमवगन्तव्यः। एतादृशस्वरूप हे देव क्रीडाविजिगीषाद्युतिशील हे हरे त्वं जय सर्वोत्कर्षेण मम हृदि निरन्तरं वर्तस्वेत्यर्थः। अत्र छेकानुप्रासोपमारूपकाणां संसृष्टिः ॥ ७ ॥

उक्तं गीतं भगवते समर्पयति—श्रीजयदेवेति॥ मङ्गलं कल्याणहेतुः। कल्याणात्मकं वा। उज्ज्वलगीतं उज्ज्वलत् ध्वनिगुणालङ्कारभासुरं च तद्गीतञ्च। श्रीजयदेवकवेर्मङ्गळमिदमुज्ज्वलगीतं कर्तृ। मुदं हर्षं कुरुते। गातॄणां श्रोतॄणां कवेस्सहृदयानाञ्च सन्तोषं जनयति। गानश्रवणयोरारब्धत्वादसमाप्तेश्च तदुभयकर्तृकस्य सन्तोषकरणस्य वर्तमाननिर्देशः ॥ ८ ॥

एवं प्रबन्धमुख एव स्वप्रकृतनिर्माणप्रबन्धनायकस्य प्रधानावतारानुकीर्तन-प्रार्थनप्रशंसाप्रणमनादि त्रिविधमङ्गळविधानानन्तरं प्रबन्ध एव प्रस्तोतव्ये श्रोतृजन-साम्मुख्यापादनाय नायकसौभाग्यप्रकाशिकामाशिषं प्रयुङ्क्ते--पद्मेति ॥ मधु-सूदनस्य उरो वः प्रियमनुपूरयत्वित्यन्वयः । मधुसूदनस्य श्रीमहाविष्णोः उरः वक्षःस्थलं वो मत्प्रबन्धश्रोतृणां गातृणां व्याख्यातृणाञ्च युष्माकं प्रियमीप्सितं वस्तु सर्वमप्यनुपूरयतु । परिपूर्तिं नयत्वित्यर्थः । कीदृशमुर इत्यत्राह— पद्मायाः श्रीमहालक्ष्मीदेव्याः पयोधरतटी कुचपरिसरप्रदेशः । स्तनमण्डलमिति यावत् । तस्य परिरम्भः आलिङ्गनं तेन हेतुना लग्नं संक्रान्तं यत् काश्मीरं कुङ्कुमं तेन मुद्रितं चिह्नितम् । अलङ्कृतमिति यावत् । महालक्ष्मीस्तन-मण्डलगाढालिङ्गनसमयसंक्रान्ततदाकारसूचककुङ्कुमपङ्कालङ्कृतमित्यर्थः । अत्रो-त्प्रेक्षते—व्यक्तः बहिरवभासमानोऽनुरागः अन्तर्गतो यस्य तादृशमिव । संभा-वनीयमिति शेषः । अथवा, अनुरागो नाम शृङ्गाररसस्थायिन्या रतेश्चेतोभो-गाभोगोपयोगिनी षष्ठी काचिदवस्था । तदुक्तं रसकेळिकलिकायाम्--'अङ्कुर-पल्लवकलिकाकोरकसकलोपभोगभागी यः । क्रमशः प्रेम प्रणयः स्नेहो रागोऽ-नुरागश्च ॥' इति । तस्य च काश्मीरसावर्ण्यं कविसमयसिद्धम् । तत एव-मुत्प्रेक्ष्यते । तदुक्तं भावप्रकाशे--'सुखदुःखात्मकं भोग्यं सुखमित्यभिमन्यते । येन, रागः स इत्युक्तो रञ्जनाद्विषयात्मनोः ॥ नीलीकुसुम्भामञ्जिष्ठाराग-साम्येन स त्रिधा । क्षाळितो यस्तु नापैति न चातीव प्रकाशते ॥ नीलीरागः स एवेह कथितो रागवेदिभिः । योऽपैति क्षाळितः क्षिप्रमध्यक्षेऽतीव शोभ-ते ॥ कौसुम्भ इति निर्दिष्टो रागोऽयं रागवेदिभिः । शोभतेऽतीव नापैति रागो यः क्षाळितोऽपि सन् ॥ स एव कविभिः सर्वैर्माञ्जिष्ठो राग उच्यते । श्रेष्ठो माञ्जिष्ठरागः स्यान्नीलीरागस्तु मध्यमः । कौसुम्भरागः कविभिरधमः परि-कीर्तितः ॥' इत्यादि । पुनः कीदृशमुर इत्याह—खेलन् युवजनचित्त-चाञ्चल्यनिष्पादनलीलालौल्येन तत इतः संक्रीडमानो योऽनङ्गः कामः तत्कर्तृ-को यः खेदः रतिजननतदुद्दीपनादिद्वारा निष्पादित आयासः तेन हेतुना स्वेदाम्बुपूरः श्रमजलप्रवाहो यस्मिंस्तत्तथोक्तम् । अनेनाऽन्तरः शृङ्गारः सूचितः । अत्र सर्वत्र 'तृतीया तत्कृत' इत्यादिना समासः । अथवा, खेलदित्यन्तर्गत-ण्यर्थः । खेलन् खेलयन् रत्यर्थं त्वरयन्नित्यर्थः । तदुक्तं माघे--'इदमिदमिति भूरुहां प्रसूनैर्मुहुरभिलोभयता पुरः पुरोऽन्या । अनुरहसमनायि नायकेन त्वर-यति रन्तुमहो जनं मनोभूः ॥' इति । अन्तर्गतण्यर्थताप्रकारस्तु न्यास-

कारेण प्रतिपादितो द्रष्टव्यः। खेलत् सोल्लासमित्युरोविशेषणं वा। खेलन् अनङ्गखेदजन्यस्वेदाम्बुपूरो यत्रेति वा। अस्मिन् पक्षे खेलन् सर्वाङ्गेषु विहरन्। सर्वाङ्गीण इत्यर्थः। एतादृशं मधुमथनस्योरः वः युष्माकम्। 'सर्वतोऽनन्वादेशे वा वस्वक्तव्यः' इत्यनन्वादेशेऽपि वसादेशः। प्रियमनुपूरयतु प्रियं प्राप्तुं प्रियतमानां प्रत्यूहव्यूहापोहनद्वारा सद्य एव काङ्क्षितसिद्धिं प्रयच्छत्वित्यर्थः। अत्र भावध्वनिः। उत्प्रेक्षा चालङ्कारः। 'यत्र स्वधर्मसंबन्धादन्यत्वेनोपतर्कितम्। प्रकृतं हि भवेत्प्राज्ञास्तामुत्प्रेक्षां प्रचक्षते॥' इति लक्षणात्। वृत्तं वसन्ततिलकम्॥

गीतम् ॥ ३ ॥

एवमादिमदम्पत्योरभिमतविहृतिमङ्गळोच्छित्तये मङ्गळसम्परसम्पत्तये च समनुस्मृत्य तदभिन्नं राधामाधवविहारं प्रतिज्ञातवर्णनं सख्युक्तिप्रकारतः प्रस्तौति-वसन्त इति॥ सहचरी सखी रधामिदमूचे उक्तवती। सहचर्यास्सहचरणादेव हेतोस्सर्वदा सर्वं वक्तुमवसरे सत्यपि तदुक्तेर्विशेषं बोधयितुं वचनक्रियां विशिनष्टि —सरसमिति। सरसं सरागं यथा भवति तथा। कीदृशीं राधामित्यत्राह—वसन्तसमये जाते उद्दीपिताभिलाषत्वाद्बहु यथा भवति तथा विहितं कृतं कृष्णानुसरणं स्वदयितश्रीकृष्णानुगमनं यया तादृशीम्। किञ्च, वासन्ती नाम माधवीलता। 'वासन्ती माधवी लता' इत्यमरः। तस्याः कुसुमानि प्रसूनानि तद्वत्सुकुमारैरतिकोमळैरवयवैः करचरणादिभिरुपलक्षितामपि। स्वमन्दिरालिन्ददेशे मन्दं सञ्चरितुमपि असमर्थैरिति यावत्। अमन्दं शीघ्रतरं यथा भवति तथा कान्तारदुर्गे काननमार्गे। 'कान्तारं वर्त्म दुर्गमम्' इत्यमरः। भ्रमन्तीम् इतस्ततः पर्यटन्तीम्। अनेन कृष्णानुसरणे अतिनिर्बन्धः सूचितः। तेन च क्षणमप्यदृश्यमाने वल्लभे विरहवेदनाया असह्यत्वं व्यञ्जितम्। तर्हि स्वावयवापाटवादिकमविगणय्य श्रीकृष्णानुसरणाय दुर्गमार्गभ्रमणे क्रियमाणे वेदनाभावो भवति वेत्याशङ्कायामाह - कन्दर्प· कामः तत्कृतः ज्वरः विरहसन्तापमयः तेन जनिता उत्पादिता या चिन्ता मनोरथः तेन हेतुना या आकुलता मनोरथसिद्धयुपायालाभाद्वैव्यर्थ्याकुलमनःस्थिरीकरणापाटवमिति यावत्। तया हेतुभूतया वलन्ती वर्धमाना बाधा विरहवेदना यस्यास्ताम्। वसन्तस्योद्दीपनत्वाद्वर्धमानविरहामयामिति यावत्। वलतेर्वृद्ध्यर्थत्वन्तु 'निपाताश्चोपसर्गाश्च धातवश्चेत्यमी त्रयः। अनेकार्थाः स्मृतास्सर्वे पाठस्तेषान्निदर्शकः॥' इति वचनादवगन्तव्यम्। चलदिति पाठे चलन्ती बाधा यस्यास्ताम्। बाधायाश्चाञ्चल्यं नाम हृदयं

परिपूर्य सर्वाङ्गीणतया प्रसरणम्। वलद्बाधामित्येव समीचीनः पाठः। अत्रानुदात्तेतामात्मनेपदस्यानित्यत्वाच्छत्रादेशः। तदनित्यत्वन्तु चक्षिङो ङित्करणादवगन्तव्यम्। तदुक्तं वामनेन — 'वलतेरात्मनेपदमनित्यं ज्ञापकात्' इति। अथवा, वलत इति वलः। पचाद्यच्। ततश्चाचारक्विबन्ताच्छता। अत्र वृत्त्यनुप्रासः। राधां सरसमिदमूचे सहचरीति वाक्यार्थस्य कान्तारे भ्रमन्तीं वलद्बाधामित्यादिपदार्थहेतुकत्वात् काव्यलिङ्गञ्च। कृषिर्भूवाचक इत्युक्तलक्षणत्वात् कृष्णशब्दार्थस्य सदानन्दघनात्मकत्वं, वासन्तीकुसुमसुकुमारैरवयवैरिति राधायाः सौन्दर्यसौकुमार्यादिनारीगुणसामग्र्यमित्यालम्बनविभावयोः, वसन्त इत्युद्दीपनविभावानां, कन्दर्पज्वरजनितचिन्ताकुलतया वलद्बाधमित्यादिना व्यभिचारिणाञ्च बहूनाम्, आकुलताकान्तारभ्रमणाद्यनुभावाविनाभूतस्वेदवेपथुप्रमुखसात्त्विकवर्गस्य च सामग्र्यात् शृङ्गाररसो व्यज्यते। स चायोगविप्रलम्भरूपः प्रबन्धान्ते प्रपञ्चयिष्यमाणस्य संभोगशृङ्गारस्य स्वादिष्ठताप्रतिपादको वेदितव्यः। 'कारणान्यथ कार्याणि सहकारीणि यानि च। रत्यादेः स्थायिनो लोके तानि चेन्नाट्यकाव्ययोः॥ विभावा अनुभावास्तत् कथ्यन्ते व्यभिचारिणः। व्यक्तः स तैर्विभावाद्यैः स्थायी भावो रसः स्मृतः॥' इति रसव्यक्तिप्रकारस्य चतुर्थोल्लासे काव्यप्रकाशकारकारिकाभ्यां प्रतिपादितत्वात्। 'न विना विप्रलम्भेन संभोगः पुष्टिमश्नुते' इति प्रसिद्धेश्च। अस्य च भ्रमन्तीं कान्तारे बहुविहितकृष्णानुसरणामिति नायिकारब्धत्वप्रतिपादनादतिरमणीयत्वं च बोध्यम्। वृत्तमिदं शिखरिण्याख्यम्। 'रसै रुद्रैश्छिन्ना यमनसभलागः शिखरिणी' इति लक्षणात् ॥ ७ ॥

इदमित्युक्तं सहचर्युक्तिप्रकारं गीतेन विवरीतुमारभते— ललितेति॥ वसन्तरागेण गीयते, अटताळेन वाद्यते इत्यत्र हिन्दोळवसन्त इति ग्राह्यम्। न तु शुद्धवसन्त इति, हिन्दोळस्यैव वसन्तवर्णनोपयोगित्वात्। तदुक्तमृतुक्रीडाविधाने—'वसन्ते चूर्णविक्षेपो वार्युक्षी मन्मथार्चनम्। हिन्दोळरागगानञ्च पुष्पापचय एव च॥' इत्यादि। वसन्तरागस्वरूपन्तु, 'शिखण्डिबर्हेण निबद्धचूडः पुष्णन् पिकांश्चूतलताङ्कुरेण। भ्रमन्मधोश्च मारस्य च मित्रभूतो मत्तो मनोज्ञस्स वसन्तरागः॥'इति अत्र विहरतीत्यारभ्य वसन्त इत्यन्तं ध्रुवपदम्। नृत्यतीत्यारभ्य दुरन्त इत्यन्तमनुध्रुवपदम्। ध्रुवपदानुगामित्वादनुध्रुवमित्युक्तिः। पल्लवमिति व्यवहारे तदनुगते अनुपल्लवमिति व्यवहारः।

तदुक्तम्—'ताळानुगुणविन्यासः सानुप्रासः समाक्षरः। समानमात्रो वा क्वापि पादो गीते प्रशस्यते॥ ते चत्वारस्त्रयो वाथ यथेच्छं वा स्युरङ्घ्रयः। सर्वपादान्तगेयं स्यात्पल्लवञ्चानुपल्लवम्॥' इति। सर्वपादान्तगेयत्वात्तदेवादौ विन्रियते। अत्र बहुविहितकृष्णानुसरणामित्यत्र विहितमित्युक्तम्। न तु विधीयमानमिति। ततो वलद्बाधामित्युक्तेश्चेदं वोध्यम्। स्वयमेव कृष्णं कान्तारे चिरमनुसृत्य खिन्ना सती राधा कन्दर्पज्वरनिवर्तकौषधालाभेन चिन्ताकुला च भूत्वा कुत्रचिन्निषद्य पुनरपि कृष्णानुगमनोत्सुका तदन्वेषणाय सखीं प्रेषितवती। सा च निष्क्रम्य कृष्णविहारादिकं दृष्ट्वा प्रतिनिवृत्य राधायै निवेदयतीति। सखि हे राधे सख्यशिरवीति भाषायामिति निपातनात्सखीशब्दस्य साधुत्वम्। हरिरिह विहरति। पत्यपत्यादीन् परित्यज्य पञ्चशरपारवश्येन आगतानां वल्लवीनां मनश्शल्यं हरतीति हरिः श्रीकृष्णः। इह अस्मिन्। काननोदरे इति शेषः। विहरति क्रीडति। क्रीडाविशेषाश्चूर्णविक्षेपवात्युक्षीमन्मथार्चनहिन्दोळरागगानपुष्पापचयादयः पूर्वोक्ता एवानुसन्धेयाः। एकाकिनः क्रीडायोगात्सहायाः के इत्याकाङ्क्षायामाह—युवतिजनेन समम्। वेणुगीतश्रवणमोहिताभिरागताभिः पार्श्वममुञ्चतीभिर्बह्वीभिर्गोपयुवतिभिस्सहेत्यर्थः। सार्थभ्रष्टेव हरिणी त्वमेका भ्रान्तिवशादिह तूष्णीं वर्तसे। अन्यास्तदन्तिकं न मुञ्चन्ति। तेन सह सर्वाः क्रीडन्ति चेत्यर्थः। कृष्णश्च ताभिः सर्वाभिः सह न केवलं क्रीडति, अपि तु नृत्यति नर्तनं च करोति। नर्तनं त्रिविधम्। तदुक्तं भावप्रकाशे—'तदपि त्रिविधं नाट्यनृत्यनृत्तप्रभेदतः' इति। तल्लक्षणञ्च 'आङ्गिकाद्यैरभिनयैर्वाक्यार्थाभिनयात्मकम्। रसभावसमायुक्तं तन्नाट्यं परिचक्षते॥ भावानुभावसुभगं पदार्थाभिनयात्मकम्। गात्रविक्षेपणं यत्र तन्नृत्यमिति गीयते॥ नृत्तन्तु स्याद्गीतवाद्यमिळत्ताललयाश्रयम्॥' इति। तद्भेदाश्च, 'एतत्त्रयं द्विधा भिन्नं लास्यताण्डवसंज्ञया। सुकुमारं तु तल्लास्यमुद्धतं ताण्डवं विदुः॥" इति। युवतिजनेन समं नृत्यतीत्यनेन ताभिस्ताण्डवमपि प्रवर्तयति, स्वयं लास्यमपि करोतीत्यर्थः। इहेत्युक्तं वनोदरं विशिनष्टि—सरसवसन्त इति। सरसो नवोदितो वसन्तो यत्र तथा। अस्य तत्प्रदेशविशेषणत्वेन सर्वर्तुसान्निध्यसुभगत्वं वृन्दावनस्य गम्यते। किञ्च विरहिजनस्य प्रियया प्रियेण च रहितस्य कामिजनस्य दुरन्ते दुरवसाने निद्राच्छेदत्रपापगमोन्मादमूर्छारूपदशाप्राप्तिरेव न केवलम्, अपि तु दशम्यपि दशा

स्यादेवेति यावत्। विरहिजनस्येत्युक्त्या भोगिनां जनानां स्वन्ते इति सिद्धम्। अत एवं हरिरिह युवतिजनेन समं विहरति नृत्यति चेत्युक्तम्। सरसवसन्त इति, विरहिजनस्य दुरन्त इति च हरिविहृतिस्थलविशेषणाभ्याम्; इहेत्यभिनयेन तत्सान्निध्यप्रकाशनात्, सखीति स्नेहविस्रम्भादिव्यञ्जकादामन्त्रणाच्च नात्र वृथैव तूष्णीमासितव्यम्; द्रुतमेव तत्र गन्तव्यम्। नोचेत्त्वं विरहामयवृद्ध्या या काचिदनिष्टदशापि स्यादेवेति प्रत्याय्यते। एवं ध्रुवपदानुध्रुवपदयोरर्थविस्तारस्य दिङ्मात्रप्रदर्शनम्। अथ प्रथमपादार्थविवृतिः। ललितानां दर्शनीयानां लवङ्गलतानां लवङ्गतरुशाखानाम्। 'समे शाखालते' इति सिंहः। परिशीलनेन पुनः पुनश्चालनेन। परिचयेनेत्यर्थः। कोमलाः मृदुलाः मलयसमीरा दक्षिणानिला यस्मिन्। शैत्यमान्द्यसौरभ्यसम्पन्नवसन्तानिलसन्तते इत्यर्थः। किञ्च, मधुकरनिकरैः भृङ्गसमूहैः करम्बिता मिश्रिता ये कोकिलाः पिकाः तेषां कूजितम् अव्यक्तशब्दो येष्विति व्यधिकरणबहुव्रीहिः। कुञ्जकुटीराणि लतागृहरूपमन्दिराणि यस्मिन् तादृशे वनप्रदेशे इह हरिर्विहरति नृत्यति चेति ध्रुवपदयोजना। अनेन वसन्ताध्यासितत्वं वनान्तस्य प्रकाशितम्। वसन्तस्य च रत्युद्दीपकत्वाद्विरहिजनदुरन्तत्वं साधितम्। अत्र वृत्त्यनुप्रासच्छेकानुप्रासयोः स्वभावोक्त्या सह संसृष्टिः॥ ॥१॥

अथ सरसमिदमूचे सहचरीत्युपक्षिप्तस्य सखीवचनस्य सारस्यं प्रकाशयितुं वचनशेषमाह — **उन्मदेति**॥ उद्गतो मदो दर्पो यस्य स उन्मदः। मदोद्रेकात् कार्याकार्यानभिज्ञ इति यावत्। तदुभयानभिज्ञत्वं च तस्यासहायत्वबाधकत्वेन ज्ञायत इति भावः। उन्मदो मदनो मन्मथो येषां ते उन्मदमदनाः। ते मनोरथा मनोरथवन्तश्च उन्मदमदनमनोरथाः। अर्श आद्यजन्तः। उन्मदमदनमनोरथा ये पथिकवधूजनाः प्रोषितभर्तृकाणि यौवतानि। अथवा, मदोदये मर्यादातिक्रमनैयत्यात् उन्मदौ उद्वेलौ मदनमनोरथौ येषामिति वा विग्रहः। यद्वा, उन्मदेन मदनेन मनोरथा येषामिति विग्रहः। तैर्जनितः प्रवर्तितो विलापः परिदेवनं यस्मिंस्तादृशे। वसन्ताध्यासिते देशे विरहिणीगणविलापो नियत इत्येवमुक्तम्। त्वमपि तादृशी विलापकर्त्री मा भूरिति सख्या अभिप्रायः। अत एव विरहिणां विरहिणीनाञ्च तुल्येऽपि सन्तापे वधूजनप्रवृत्तिकथनं ज्ञेयम्। किञ्च, अळीनां कुलानि वृन्दान्यळिकुलानि। "सजातीयैः कुरु यूथम्" इत्यमरः। तैः सङ्कुला मिश्रिता ये कुसुमसमूहाः

पुष्पपङ्क्तयः। पुष्पेषु प्रत्येकं भृङ्गस्थितिः सङ्कुलशब्देनोच्यते। 'न तज्जलं यन्न सुजातपङ्कजं न पङ्कजं तद्यदलीनषट्पदम्। न षट्पदोऽसौ न जगुञ्ज यः कळं न गुञ्जितं तन्न जहार यन्मनः॥' इत्युक्तरीत्या तदवसेयम्। तैर्निराकुला वैयाकुलीरहिताः। 'चलाकुलादयः शब्दा धर्मे धर्मिणि च स्थिताः' इति वचनादाकुलशब्दो धर्मपरः। 'महारम्भाः कृतधियस्तिष्ठन्ति च निराकुलाः' इति माघः। तादृशा बकुळाः केसरतरव एव कलापा भूषणानि यस्य तादृशे इह वनान्ते हरिर्विहरति ॥ २ ॥

अथ भयोपन्यासपूर्वकमाह—**मृगमदेति** ॥ मृगमदः कस्तूरी तस्य यत् सौरभं परिमळः तस्य रभसेन वेगेन वशंवदान्यायत्तानि तन्निमित्राणि। तत्तुल्यानीति यावत्। नवानि नूतनानि च यानि दळानि पर्णानि। कीटाद्यनुपहतानीत्यर्थः। प्रत्यग्रोत्पन्नानि यानि पर्णानि तेषां मालाः परम्परा येषु तादृशास्तमाला वृक्षभेदा यस्मिंस्तादृशे। वशंवदेति। 'प्रियवशे वदः खच्' इति खच्। 'खित्यनव्ययस्य' इति मुम्। किञ्च, युवजनाः विरहिणस्तरुणजनास्तेषां यानि हृदयानि तेषां विदारणा भेदका ये मनसिजनखाः कामकरजास्तेषां रुचिरिव रुचिः शोभा येषां तादृशानि किंशुकजालानि पलाशकुसुमसमूहा यस्मिन्। विदारणा इति। 'कृत्यल्युटो बहुळम्' इति कर्तरि ल्युट्। विदारणजनितरुधिररूषितत्वान्नखानामारुण्यं कल्प्यम्। मनसिजेति। 'तत्पुरुषे कृति बहुळम्' इत्यलुक्। एतादृशे इह वनान्ते हरिर्विहरति। अत्र उपमयोर्द्वयोरनुप्रासस्य च संसृष्टिः। ॥ ३ ॥

एवमुक्ते मनसिजाक्रीतां राधां प्रति तस्य माननीयत्वं बोधयितुं किञ्चिद्वर्णयति — **मदनेति** ॥ मदनमहीपतेः कन्दर्पभूपालस्य, कनकमयो दण्डो यस्य तत् कनकदण्डम्। श्वेतच्छत्रमित्यर्थात्। 'विशेषणमात्रप्रयोगो विशेष्यप्रतिपत्तौ' इति वामनसूत्रानुसारेण विशेषणमात्रं प्रयुक्तम्। मदनस्य महीपतित्वारोपाव तत्सम्बन्धिप्रधानराजचिह्नभूतस्य श्वेतच्छत्रपदस्य विशेष्यभूतस्य प्रतिपत्तेरवश्यम्भावादिति मन्तव्यम्। तस्य रुचिरिव रुचिः कान्तिराकारो वा येषां तानि मदनमहीपतिकनकदण्डरुचीनि। तादृशानां केसरकुसुमानां देववल्लभाख्यद्रुमपुष्पाणाम्। 'केसरो देववल्लभः' इत्यमरः। विकासो यस्मिंस्तादृशे। किञ्च, मिळिता घटिताः शिलीमुखा भृङ्गा येषु तादृशानि यानि पाटलानि पाटलकुसुमानि तेषां

पटलेन समूहेन कृतो निर्मितः स्मरतूणविलासो मदनतूणिरविभ्रमो यस्मिन् तादृशे। 'तूणोपासङ्गतूणीरनिषङ्गा इषुधिर्द्वयोः' इत्यमरः। शिलीमुखशब्देन बाणा अपि ग्राह्याः। तदा पाटलपटलस्य तूणत्वरूपणं समञ्जसम्। ईदृशे इह वनान्ते हरिर्विहरति। श्लेषोद्दीपितं रूपकमनुप्रासेन संसृष्टम् ॥ ४ ॥

एतावति श्रुतेऽपि लज्जया पुनरपि कृष्णसन्निधिं गन्तुमपारयन्तीं प्रति पुनरपि किञ्चिद्वदति— **विगलितेति** ॥ विगलितम् अपगतं लज्जितं लज्जा येषां ते तादृशाः। लज्जितेति भावे क्तः। अत एव जगत् जनजातमवलोकयन्तीति जगदवलोकनाः। अस्मिन् समये निर्लज्जानस्मान् दृष्ट्वा जनाः किं वा वदिष्यन्तीति सर्वान् पश्यन्त इत्यर्थः। विगलितलज्जिताश्च ते जगदवलोकनाश्च तादृशा ये तरुणाः युवानः तेषु विषये करुणैः करुणतरुकुसुमैः कृतो हासो यस्मिन् येनेति वा तादृशे। कामोद्रेकेण निस्त्रपान् जनान् देशोऽयं परिहसति। स च हासः प्रकाशः करुणतरुकुसुमव्याजेन दृश्यते। तथापि स्वातन्त्र्यमेव चेष्टन्ते जनाः। त्वं पुनः कथं वृथा तापाय त्रपापरवती जातेति साकूतमिदम्। अथवा, सञ्जाता लज्जा येषां ते लज्जिताः। तारकादीतजन्तः। विगलिता व्यपगता लज्जिता यस्मात्तादृशं जगत् अदृश्यमानलज्जितजनो यो लोकस्तस्यावलोकनेन दर्शनेन तरुणकरुणैः कोमलतरुणतरुकुसुमैः कृतो रचितो हासो येन यस्मिन् वा तादृश इति वा योजना। वसन्तोदयपर्यन्तमुद्दीपकाभावेन मन्दितदर्पे कन्दर्पे जगति लज्जा स्थिता। वसन्ताविर्भावे तु उद्दीपकमहिम्ना जृम्भितदर्पे तत्प्रेरितं जगन्निर्लज्जतामृच्छति। हास्यानि चेष्टन्ते च। तदवलोकेन तरुणकरुणतरुभिः परिहासः क्रियत इवेत्यर्थः। जगदवलोकनतरुणेत्यत्र 'तृतीया तत्कृतार्थे' इत्यादिना समासः। किञ्च, विरहिणां वियोगिनां निकृन्तने नितरां कृन्तने छेदने विषये कुन्तमुखानां प्रासाग्राणाम् आकृतिरिवाकृतिराकारो येषां तादृशैः केतकैः केतकीपुष्पैः दन्तुरिता उन्नतदन्ताः कृताः। विषमीकृता इति यावत्। आशा दिशो कस्मिंस्तादृशे। तीक्ष्णाग्रत्वाद्विरहिजनासह्यत्वाच्च केतकानां तत्कृन्तनकुन्तमुखत्वारोपणम्। कृन्तनमित्यत्र नुमागमः। आसीदयत्यादाविव धात्वन्तरमादाय वा प्रयोगः समर्थनीयः। नासिकायाश्च कृन्तनमिति साहटप्रयोगदर्शनात्। दन्तुरितेत्यत्र 'दन्त उन्नत उरच्' इति मत्वर्थे दन्तशब्दादुरच्। तस्मात्तत्करोतीति ण्यन्तात् कर्मणि क्तः। शसयोरैक्यं यमकानुप्रासादौ दृष्टम्। 'शशविशसनत्रासादाशामगाच्चरमां शशी। तदधिगमनाचारापारावतैरुदडी-

यत' इति श्रीहर्षः। इह केतकशब्दे केतकविशेष इत्यर्थः। न तु केतकसामान्यम्। वसन्तकाले तदभावादिति केचित्। सर्वेश्वरसेवार्थं सर्वर्तुसमागमे सति सङ्गतमेवैतदित्यपरे। विरहीत्यादिना विशेषणेन कुन्तेन हन्तुमुद्यते बलवति तद्वश्यतैवं श्रेयो जिजीविषोरिति सख्या वक्त्र्या अभिप्रायो ध्वन्यते ॥५॥

व्यञ्जितमाकूतं रोचयितुमाह—**माधविकेति**॥ माधविकायाः पुष्पितवासन्तीलतायाः परिमळेन सुगन्धेन मिळिते मिश्रिते नवमालिकया लताविशेषेण। 'सप्तला नवमालिका' इत्यमरः। जात्येकवचनम्। अतिसुगन्धौ अतीव परिमळवति। सुगन्धिरिति 'गन्धस्येत्' इत्यादिना बहुव्रीहावित्समासान्तः। मुनिमनसां विषयविमुखयोगिजनचेतसामपि। किमुत रागिणामिति शेषः। मोहनकारिणि विकारसम्पादनशीले। 'सुप्यजातौ' इति णिनिः। तरुणाश्च तरुण्यश्च तरुणाः। 'पुमान् स्त्रिया' इत्येकशेषः। तेषामाकारणे अन्योन्यसङ्घटनार्थमाह्वाने बन्धौ सख्यौ। प्रणयकलहान्मिथो विमुखानां तरुणीतरुणानां कलहशमनपूर्वकं सङ्घटने पटीयसि मित्रे इत्यर्थः। अथवा, तरुणानामकारणबन्धौ निरुपाधिकमित्रभूत इत्यर्थः। ईदृशे वनान्ते हरिर्विहरति. अत्रार्थापत्तिरूपकयोरनुप्रासेन संसृष्टिः ॥६॥

अथ दयिततमस्य कृष्णस्य तस्यामनुरागातिशयवत्तां दृष्टान्तेन व्यञ्जयितुमाह—**स्फुरदिति**॥ स्फुरन्त्याः शोभमानायाः अतिमुक्तलतायाः। 'अतिमुक्तः पुण्ड्रकः स्याद्वासन्तीमाधवीलते' इत्यमरः। परिरम्भणेन आलिङ्गनेन मुकुलिताः सञ्जातमुकुळाः पुळकिताः रोमाञ्चिता इव स्थिताः चूता रसाळतरवो यस्मिन् तादृशे। अत्रातिमुक्तलताचूतयोर्नायिकानायकत्वप्रतीतिः। ततस्समासोक्तिरियम्। 'विशेषणानां साम्येन यत्र प्रस्तुतवर्तिनाम्। अप्रस्तुतस्य गम्यत्वं सा समासोक्तिरिष्यते ॥' इति लक्षणात्। परिरम्भणपदेन परिवेष्टनालिङ्गनयोः, मुकुळोद्गमपुळकोद्गमयोश्चाभेदाध्यवसायाश्लिष्टसाम्याच्च विशेषणसाम्यं ज्ञेयम्। अतोऽतिशयोक्त्यनुप्राणितायाः समासोक्तेरनुप्रासेन संसृष्टिः। ईदृशे। किञ्च, परिसरे पर्यन्तभुवि 'पर्यन्तभूः परिसरः इत्यमरः। परिगतायाः परितो व्याप्ताया यमुनाया जलैः अनिलाहृतैः पयःपरमाणुभिः पूते पवित्रीकृते। ईदृशे च इह वृन्दावनविपिने। 'वनं वृन्दावनं नाम' इति भागवतवचनात्, 'इतः प्रतीच्यां विपिनं मनोज्ञं वृन्दावनं नाम विराजतीति' इति तदनु-

सारिभिः कविभिः प्रयुज्यमानत्वाच्च वृन्दावनमिति संज्ञा बोद्धव्या। अतो नात्र पौनरुक्त्यमाशङ्कनीयम्। किञ्चेह, 'आसन्नमेव भजते नृपतिर्मनुष्यं विद्याविहीनमकुलीनमसङ्गतं वा। प्रायेण भूमिपतयः प्रमदा लताश्च यः पार्श्वतो वसति तं परिवेष्टयन्ति॥' इति न्यायेन श्रीकृष्णस्य प्रभुत्वादासन्नाभिरन्याभिस्सह विहारसङ्गतिः। अनुरागस्तु तस्य त्वय्येव महान्, नान्यासु। एवं स्थिते वस्तुवास्तवे त्वमिहालस्यादिना सौभाग्याभावशङ्कया वा पृथगवस्थिता वृथा सन्तप्यसे। सपदि प्रियान्तिकं प्रयाता तेन सह विहरस्व। समुचितोऽयमवसरः। इमामतिमुक्तलतामयं चूत इव सत्वरमालिङ्ग्य प्रमोदातिशयेन पुळकिता भविष्यस्येवेत्यादिकं व्यज्यत इति दिङ्मात्रदर्शनं मया कृतम् ॥ ७ ॥

अथ कविः स्वकृतेः श्लाघ्यतां सूचयत्यन्तिमपादेन—श्रीयदेवेति॥ श्रीजयदेवेन भणितं तन्मुखाद्गळितमित्यनेन कवेः प्रयासाभावादन्यकविभ्यो व्यतिरेक उक्तः। इदं सरसवसन्तसमयवनवर्णनं, सह रसैः शृङ्गारादिभिः सह वर्तत इति सरसः। अथवा, पुष्परससहितः। यद्वा, युवयुवतिमेळनकारित्वाद्रसिकः। सरसो यो वसन्तसमयः तस्य यद्वनं अधिष्ठेयत्वेन सम्बन्धि। तदधिष्ठितं वनमित्यर्थः। तस्य वर्णनं गुणप्रशंसनम्। तद्रूपमिदं गीतम् उदयति सकलजनाह्लादकत्वेन चन्द्र इवोदयमाप्नोति। उदयप्राप्तिमात्रेणाह्लादजनकत्वेन च चन्द्रसाम्यम्। आकल्पं नास्तमेष्यतीति तस्माद्व्यतिरेकश्च ज्ञेयः। तत्र हेतुमाह—हरिचरणस्मृतेः श्रीकृष्णपादस्मरणस्य सारो बलं यस्य। तद्बलादेवास्तमयाभाव इति भावः। अनेनैवास्य गीतस्य गातॄणां श्रोतॄणाञ्च ऐहिकामुष्मिकफलदत्वमपि द्योत्यते। सरसपदस्य वर्णनपदे वा अन्वयः। अत एवानुगता मदनविकारा उत्तमनायिकानायकान्योन्यरागालोकनादयो यत्र, तत्तादृशम्। अनेनैहिकसुखदत्वमतिशयेन द्रढीकृतम्। अर्धोदितत्वादुदयतीति वर्तमाननिर्देशः ॥ ८ ॥

एवं गीते समापितेऽपि श्रीकृष्णान्तिकगमने सन्दिहानां राधां विरहदुर्दशापत्तिं सूचयन्ती श्लोकेनाह—दरेति॥ इह अस्मिन् वृन्दावने गन्धवाहः गन्धं वहति प्रापयति देशान्तरमिति गन्धवाहो वायुः। 'कर्मण्यण्' इत्यण्। मन्दवायुरित्यर्थः। चेतो वियोगिनां मनो दहति भस्मीकरोति हि। प्रसिद्धौ हिः। कीदृशो गन्धवाह इत्याशङ्कायामाह—दरम् ईषत् विदळिता या मल्लीवल्लयः मल्लिकालताः। अथवा, मरयश्च वल्लयश्च मल्लीवल्लयः। गोबलीवर्दन्यायेन मल्लिकायाः

पृथगुक्तिः। तासां चञ्चन्तः प्रसरन्तो ये परागाः पुष्परजांसि। 'परागः सुमनोरजः' इत्यमरः। त एव प्रकटिताः स्फुटीकृताः पटवासाः नानाकुसुमपरिमिळितगन्धचूर्णानि। 'पटवासो गन्धचूर्णं कुसुमाद्यधिवासितम्' इत्यभिधानात्। तैः करणैः काननानि श्रीकृष्णविहारयोग्यानि विपिनानि वासयन् अधिवासयन्। बहळपरिमळानि सम्पादयन्नित्यर्थः। अनेन महाभूतानामपि श्रीकृष्णप्रीणनप्रवणप्रवृत्तितया महामहिमत्वे तस्य सिद्धे त्वं किमिति ध्यानमूका वर्तस इत्युपालम्भो ध्वन्यते। किञ्च, केतकीगन्धबन्धुः केतकीकुसुमसौरभसहायः। तादृशो गन्धवाहः प्रसरन् वियोगिजनपीडाप्रवर्तनाय बहिस्सञ्चरन् यः असमबाणः कामः। तस्याः प्राणः प्राणवायुः स इव तद्वत्। 'तेन तुल्यं क्रिया चेद्वतिः' इति वतिः। प्राण इति जातावेकवचनम्। यथाप्राधान्यात् प्राणाख्य एव ग्राह्यः। अथवा, प्रसरतो वसन्तसमये वियोगिविजिगीषया विश्वक्चरतोऽसमबाणस्येति वा योज्यम्। चेत इति जात्येकवचनम्। विरहिणां मनांसीत्यर्थः। पश्येति शेषः। अत्र छेकानुप्रासकाव्यलिङ्गस्वभावोक्त्युपमाश्लेषाणां संसृष्टिः ॥ ८ ॥

अथ श्लोकान्तरेण वसन्तसमयभवं विरहिजनवृत्तमाह—उन्मीलदिति[1] ॥

उन्मीलति प्रवर्तमाने मधौ वसन्ते ये गन्धाः नानाकुसुमपरिमळाः तेषु लुब्धाः लोभवन्तः ये मधुपाः मधुकराः। अथवा, मधु पुष्परसः। 'मधु मद्ये पुष्परसे' इत्यमरः। तच्च गन्धश्च मधुगन्धौ उन्मीलन्तौ वसन्तर्ध्या वर्धमानौ यौ मधुगन्धौ तयोर्लुब्धाः। यद्वा, मधुशब्दस्तन्त्रेणोपात्तः। सकृदुच्चारितमर्थभेदादनेकोपकारकं तन्त्रम्' इति तन्त्रविदः। मधौ वसन्ते यौ मधुगन्धौ तयोर्लुब्धा लोभवन्तो ये मधुपास्तैर्व्याधूताः मन्दमान्दोळिता ये चूताङ्कुराः सहकारपल्लवाः तेषु क्रीडन्तो विहरन्तो ये कोकिलाः तेषां काकलीकळकळः मधुराव्यक्तध्वनिरूपकोलाहलैः। 'काकली तु कळे सूक्ष्मे ध्वनौ तु मधुरास्फुटे' इत्यमरः। तैर्हेतुभिरुद्गीर्णः आन्तरावस्थामतीत्य स्फुटभावेन बहिर्गतः कर्णज्वरः श्रोतृविरहिजनश्रोत्रसन्तापो येषु तादृशाः। अत्रोद्गीर्णशब्दस्य गौणवृत्त्याश्रयणान्न ग्राम्यत्वदोषः। 'उद्गारोद्गीर्णवान्तादि गौणवृत्तिव्यपाश्रयात्। अतिसुन्दरमन्यत्र ग्राम्यकक्ष्यां विगाहते ॥' इति वचनात्। एतादृशा अमी परिदृश्यमाना वासराः

1. एतत्पद्यात् पूर्वं मूले अद्ययुत्सङ्गेत्यादिपद्यं व्याख्यातृपक्षे चतुर्थगीते विश्लेषामित्यादिपद्यादनन्तरं पठ्यते। तत्रापि अद्येत्यत्र अद्येति पाठः।

दिवसाः। 'वा तु क्लीबे दिवसवासरौ' इत्यमरः। वासन्तिका इत्यर्थात्। ध्यानं नाम कर्णज्वराविर्भावानन्तरं तन्निवृत्तये विजने गृहे स्थित्वा स्वप्रियजनचिन्तनम्। तत्रावधानं नाम चित्तैकाग्र्यम्। तस्य क्षणः तत्समयः। तस्मिन् प्राप्ता अपरोक्षत्वेनान्तःकरणे आविर्भूता ये प्राणसमाः स्वाभिमताः कान्ताः तासां तेषां वा समागमरसाः सन्दर्शनसम्भाषणस्पर्शनालिङ्गनादयः। प्राप्तो यः प्राणसमागमः तेन ये रसाः सम्भाषादय इति वा योज्यम्। तेषामुल्लासैरनुभावैर्हेतुभिः। करणैर्वा। पथिकैः पान्थैः कर्तृभिः। 'पथष्ठन्' इति ठन्प्रत्यये रूपमिदम्। विरहिभिरित्यर्थः। पुमांस्त्रियेत्येकशेषात्पथिकाङ्गनाश्च गृहीता इत्यवधेयम्। कथंकथमपि अतिकृच्छ्रेण नीयन्ते अतिवाह्यन्ते। नयतेः कर्मणि लट्। सर्वथा विरहिणामयं वसन्तो मरणप्राय इत्यभिप्रायः। उद्गीर्णकर्णज्वरा इत्यनेन ज्वरितानां चरितं द्योत्यते। विशेषणसाम्येन च। तद्यथा—ज्वरितस्य जनस्य दर्शने तन्निवृत्तये स्निग्धेन सुहृदा भिषजा च ज्वरचिकित्सा क्रियते। तत्र ध्यानं ज्वरभेदतन्निदानज्ञानपूर्वकमुचितौषधभावनम्। तत्रैव वावधानं चित्तैकाग्र्यम्। तत्क्षणे प्राप्तस्य यत्नेनान्विष्य लब्धस्य प्राणैः समस्यान्यैर्वस्तुभिरसाम्यस्यागमरसस्य विल्वादिद्रुममूलरसरूपस्य कषायस्य। 'पलाशी द्रुद्रुमागमाः' इत्यमरः। उल्लासाः सेवनजनितवीर्यविपाकाविर्भावाः। तैः करणैः कथं कथमपि केचिद्दिवसा अतिवाह्यन्ते। नवसु दिवसेष्वधिकेषु वा गतेषूल्लाघता च लभ्यते। वसन्तवासरेषु श्लेष्मज्वरोपपत्तिः। 'श्लेष्मा प्रकोपमुपयाति तथा वसन्ते' इति वचनात्। तत्रापि कोकिलादिकोलाहलश्रवणाज्ज्वराधिक्यं भवति। 'तरुण्याः स्पर्शसल्लापं चन्दनं मल्लिका तथा। उद्दीपकानि चान्यानि वर्जयेज्ज्वरितो नरः॥" इति। अत्र वर्जयेदित्युक्त्या सेवने ज्वराधिक्यं गम्यते। एवं विशेषणसाम्यादप्रस्तुतस्यार्थस्य प्रतीतेः समासोक्तिः। अस्याश्च, हे सखि राधे यदि त्वमधुना श्रीकृष्णसमीपं न प्राप्नोषि, तदा तद्विरहवेदनावशात्त्व दुरवस्थाप्राप्तौ मम महानायासो भविष्यति, अपथ्यसेवनाज्ज्वरितस्य जनस्य सुहृदामिवेति प्रकृतार्थोपमानत्वेनाप्रकृतार्थस्य प्रतीतिरवगन्तव्या। पूर्वश्लोके मालिनीवृत्तम्। 'ननमयययुतेयं मालिनी भोगिलोकैः' इति तल्लक्षणम्। अत्र शार्दूलविक्रीडितम्। तल्लक्षणं प्रागुक्तम् ॥ ९॥

गीतम् ॥ ४ ॥

एवं वसन्तमुपवर्ण्य तत्र विरहदुर्दशाया अपरिहार्यताञ्च बोधयित्वा राधया सह कृष्णसमीपं प्रस्थिता सखी त्रपापरतन्त्रां सद्य एव दयितमभिगन्तु-

मशक्तां दूरे श्रीकृष्णस्य विहरणं दृष्ट्वा कुत्रचिन्निलीयावस्थितां राधां गीतेन वदती-त्यवतारिकाश्लोकमाह—अनेकेति वंशस्थवृत्तेन ॥ 'जतौ तु वंशस्थमुदीरितं जरौ' इति तल्लक्षणम्। अनेकासां नारीणां गोपीनां ये परिरम्भसंभ्रमे आश्लेष-व्यतिकरे स्फुरन्तः प्रकाशमानाः मनोहारिणश्च कामुकचित्ताकर्षणशीलाश्च विलासा विभ्रमास्तेषु लालसं सतृष्णम्। 'लोलुपो लोलुभो लोलो लालसे लम्पटस्समाः' इति निघण्टुः। अनेकनारीत्यत्र सर्वनाम्नो वृत्तिमात्रे पुंवद्भावः। मनोहारीत्यत्र 'सुप्यजातौ' इति णिनिः। एवम्भूतं मुरारिं श्रीकृष्णम् आराद्दूरे उपदर्शयन्ती समक्षं प्रत्यक्षं यथा तथा अङ्गुल्या निर्दिश्य दर्शयन्ती पुनः राधिकामाह पुनरपि गीतेन श्रीकृष्णविहारप्रकारान् प्रत्यक्षतो दर्शयित्वा राधिकां ब्रवीति। असौ सखीत्यनेन पूर्वमपि तत्कृते कृतबहुप्रयासा श्रीकृष्णमन्विष्य दृष्ट्वा प्रतिनिवर्त्य राधां वचनैः प्रोत्साह्य नीतवती पुनरपि तस्या-स्तापमपनेतुमेवं ब्रूत इत्यहो अतिस्निग्धेयमिति द्योत्यते। आहेति ब्रूञः 'ब्रुवः पञ्चानाम्, इत्यादिना णल्। आहादेशश्च। स्मयोगं विना प्रयोगाद्वर्तमान-त्वेन व्याख्यातम्। आहेति भूते प्रमाद इति वामनः। 'किमिच्छसीति स्म तमाह वासवः' इत्यादयः समीचीनाः प्रयोगाः। 'आसाहेत्यव्ययम्' इति तिङ-न्तप्रतिरूपमव्ययं वा भूतार्थत्वेन द्रष्टव्यम्। राधिकामित्यत्र राधैव राधिकेति स्वार्थे कः। 'प्रत्ययस्थात् कात् पूर्वस्यात इदाप्यसुपः' इत्याकारस्येकारः ॥ १० ॥

चन्दनेति ॥ एकताळेन वाद्यत इति। तल्लक्षणन्तु, 'एकेन यो द्रुतेन स्यादेकताळस्स कथ्यते' इति। रामक्रियारागेण गीयत इत्यस्यायमभि-प्रायः— वसन्तरागस्य पुंरागत्वाद्रामक्रियायास्तत्कळत्रत्वात्पतिसन्निधाने पत्नी-स्थितियोग्यत्वाच्चेति। 'रामक्रिया वराळी च वसन्तस्य स्त्रियावुभे' इति वचनादिति ज्ञेयम्। अत्र हरिरिहेत्यारभ्य केळिपर इत्यन्तं ध्रुवपदम्। तदादौ व्याक्रियते। हे विलासिनि राधे। विलासास्सन्त्यस्या इति विलासिनी विभ्रमवती। तस्याः संबुद्धिः। हे विलासिनि अत एव केळिपरे विहारतत्परे हे सखि इह पुरतो दृश्यमाने मुग्धवधूनिकरे अतिदर्शनीयकामिनीकदम्बे हरिः श्रीकृष्णो विलसति क्रीडति। विलासिनि केळिपरे इति पदद्वयं मुग्धवधूनिकरविशेषणत्वेन वा योज्यम्। कीदृशो हरिरित्याकाङ्क्षायामाह—चन्दनेन पाटीरद्रवेण चर्चितं सञ्जातचर्चम्। 'चर्चा तु चर्चिक्यं स्थासकः' इत्यमरः। अनुलिप्तमित्यर्थः। तादृशं च नीलं नीलवर्णञ्च यत् कळेबरं शरीरं तस्मिन् पीतं हरिद्रावर्णम्।

'पीतो गौरो हरिद्राभः' इत्यमरः । वमनमम्बरं यस्य स चासौ वनमाली च । अथवा, चन्दनचर्चितनीलकळेबरश्च पीतवसनश्च वनमाली चेति वा । वर्णत्रयसम्पत्त्या श्रीकृष्णमूर्तेरतिमोहनत्वं व्यज्यते । वनमालायाश्चित्रवर्णत्वात्तदुद्दीपकत्वञ्च । वनमालीति व्रीह्यादित्वादिनिः । आन्ध्रदेशे कळेबरशब्दस्य ग्राम्यत्वदोषः प्रयोगबाहुळ्यात् परिहार्यः । किञ्च, केळिषु विहारविशेषेषु चलती डोळायमाने ये मणिकुण्डले मकराकारे प्रवरमणिप्रत्युप्तप्रान्तभागे जाम्बूनदमये कर्णभूषणे ताभ्यां मण्डितं प्रतिफलनेनालङ्कृतं गण्डयुगं कपोलद्वयं यस्य तादृशः । स्मितेन मन्दहासेन शाल्यते श्लाघ्यते इति स्मितशाली । अभितः कुण्डलदीप्त्या मध्ये मन्दहासद्युत्या च नयनामृतायमानवदन इत्यर्थः । ईदृशो हरिर्विलसति । अत्रानुप्रासेन स्वभावोक्तिस्संसृष्टा ॥ १ ॥

पीनेति ॥ पीनेत्यत्र 'प्यायतेः ओदितश्च' इति निष्ठातकारस्य नत्वम् । 'प्यायः पी' इति निष्ठायां पीत्वं च । यस्मिन् मुग्धवधूनिकरे हरिर्विलसति, तस्मिन्मुग्धवधूनिकरे काचिद्गोपवधूः वल्लवी पीनौ यौ पयोधरौ स्तनौ तयोर्यो भारो गौरवं तस्य यो भरः अतिशयः । 'अतिशयो भरः' इत्यमरः । तेन हेतुना । विहारे स्तनमण्डलगौरवातिशयं वोढुमक्षमेत्यर्थः । हरिं श्रीकृष्णं सरागं परिरभ्य साभिलाषमालिङ्ग्य स्वस्तनभारगौरवं तदुरसि निधायेत्यर्थः । उदञ्चितः उद्गतः पञ्चमरागः अवयवे अवयवित्वारोपात् पञ्चमस्वरः । कोकिलनादसदृशस्वर इति यावत् । 'षड्जं मयूरा ब्रुवते पिकः कूजति पञ्चमम्' इत्युक्तेः । स्वकण्ठनाळादुद्गतः कोकिलकूजितोपमस्वरो यथा भवति, तथा अनुगायति श्रीकृष्णस्वरमनुसृत्य गायति । पश्य शृणु चेति शेषः । अत्रापि स्वभावोक्त्यनुप्राससंसृष्टिः । परिपुष्टसंभोगशृङ्गारश्च विप्रलम्भाङ्गतया व्यज्यते ॥ २ ॥

कापीति ॥ अस्मिन् मुग्धवधूनिकरे कापि मुग्धवधूः अतिसुन्दराङ्गी वल्लवी मधुसूदनवदनसरोजम् अधिकं ध्यायति श्रीकृष्णस्य मुखपद्मं सम्यग्ध्यायति । तत् कीदृशम्—विलासेन विभ्रमेण विलोले तत इतश्चञ्चले ये विलोचने नयने तयोः खेलनेन विहरणेन जनितः उत्पादितो मनोजः कामो येन तादृशम् । निसर्गलोलनयनाञ्चलप्रचारेण अत्यन्तमदनोद्दीपकमित्यर्थः । श्रीकृष्णस्य मुखकमलमत्यन्तमोहनं बहिः सम्यगवलोक्य निमीलिताक्षी सती तदन्तश्चिन्तयतीत्यर्थः । इहापि स्वभावोक्त्यनुप्रासौ ॥ ३ ॥

कापीति ॥ तस्मिन् वधूनिकरे कापि नितम्बवती काचिद्गोपी श्रुतिमूले श्रीकृष्णकर्णमूले किमपि लपितुं यत्किञ्चिद्वक्तुं मिळिता आसन्ना भूत्वा दयितं श्रीकृष्णं कपोलतले चारु चुचुम्ब चुम्बितवती। कीदृशे कपोलतले---पुळकैः अनुकूले। पुळकैः रोमहर्षैः अनुकूले वशगे, आन्तरानुरागसूचकत्वात् पुळकानां चुम्बनानुकूल्यं ज्ञेयम्। कपोलतले श्रीकृष्णस्य गण्डप्रदेशे चारु यथा तथा चुचुम्ब। रहस्यकथनव्याजेन कृतत्वाद्वा, सुखदत्वाद्वा उभयथा वा चारुत्वं बोध्यम्। कपोलस्य चुम्बनस्थानत्वमुक्तं रतिरहस्ये, 'नयनयुगकपोरु दन्तवासो मुखान्तः स्तनयुगळललाटं चुम्बनस्थानमाहुः। तदनु जघननाभीमूलकक्षश्च' इति। चुचुम्बेति 'अत्यन्तापह्नवेऽपि लिड्वाच्यः' इति लिट्। अत्यन्तापह्नवेन क्रियमाणायाश्चुम्बनक्रियाया अपरोक्षत्वेऽपि परोक्षत्वं कर्तृसङ्कल्पेन। ततो न समीपस्थितैर्ज्ञातुं शक्यते। दूरस्थैस्तु ज्ञायते। ईदृशस्थले लिट्प्रयोगोपपत्तिः। एवमिह वधूनिकरे हरिर्विलसतीत्यन्वयः ॥ ४ ॥

केळीति ॥ अस्मिन् वधूनिकरे काचिद्गोपी केळीषु क्रीडाविशेषेषु कलासु कामकलासु च कुतुकेन हेतुना अमुं योषित्परिगतं श्रीकृष्णं यमुनावनकूले वनात्मकं कूलं वनकूलं तत्र। कालिन्दीतटविपिन इत्यर्थः। अथवा, यमुनावनं यमुनाजलम्। 'जीवनं भुवनं वनम्' इत्यमरः। तस्य कूले तीरभूमौ मञ्जुळो मनोहरो यो वञ्जुळकुञ्जो वानीरलतागृहं तस्मिन् गतं गमनं प्रवेशो यथा भवति तथा करेण दुकूले क्षौमवसने विचकर्ष आकृष्टवती। योषिन्मध्यगतं श्रीकृष्णं वञ्जुळलतागृहे रहःक्रीडार्थमागच्छेत्याकूतेन सूचयन्ती पीताम्बराञ्चले मुहुराकृष्टवतीत्यर्थः। कुञ्जगतमिति श्रीकृष्णविशेषणं वा। तथाचोत्कर्षणं यमुनाकूलं प्रतीति ज्ञेयम्। अन्यया सह रहो रन्तुं कुञ्जगतमन्या कूलं प्रत्याकृष्टवतीत्यर्थः। इहापि लिट्प्रयोगः पूर्ववत्। एवमिह हरिर्विहरतीति योज्यम् ॥ ५ ॥

करेति ॥ करतलयोः हस्ताग्रयोः यौ ताळौ मयूराण्डार्धाकारौ कांस्यपात्रविशेषौ ताभ्यां तरळा चञ्चला। ताळाघातव्यापारेण इतस्ततश्चलन्तीत्यर्थः। एतादृशी या वलयावलिः कङ्कणपङ्क्तिः तया कलितो मिश्रितः कळस्वनः अव्यक्तमधुरनादो वंशः वेणुनाळो यस्मिन् तादृशे। 'मयूराण्डार्धसदृशं कांस्यताळद्वयं शुभम्। घात्यः शिव इति ख्यातो घातकः शक्तिरुच्यते ॥' इति वचनप्रामाण्यादेवं व्याख्यातम्। अथवा, करतलाभ्यां मिथस्ताड्यमानाभ्यां

जायमानो यस्ताळः छत्पुटादिः, तदुत्थापनात्तदनुरूपतया तरळा चञ्चला या वलयावलिः, तया मिश्रितः कळस्वनो वंशो यत्रेति। उभयथापि ताळोत्पादनार्थं वलमानयोः करयोश्चञ्चलवलयरवानुगृहीतकळनादवंशनाळ इत्यर्थः। एतादृशे रासरसे। रासो नृत्तविशेषः। तल्लक्षणन्तु, यत्र संभूय वनिताः परस्परमनोहरम्। दण्डैर्दण्डैश्च नृत्यन्ति नृत्तन्तद्दण्डरासकम् ॥' इति। तदेव रास इत्युच्यते। तादृशे रासे यो रसः प्रयोक्तृप्रेक्षकजनहृदयैकीभावरूपः, तस्मिन् प्रवृत्ते। काचिदिति पूर्वपादादुपादेयम्। सहनृत्तपरा काचिद्युवतिः गोपी हरिणा प्रशशंसे स्तुता। वेणुनादनृत्तानुगुणकरताळदानस्य स्थिरतरत्वात्प्रशस्यत्वमस्या इति साकूतम्। श्रीकृष्णेन सा प्रीतिपूर्वं बहुमतेति भावः। अत्र बह्वीनां मध्ये एकस्याः प्रशंसनस्य तन्मात्रवेद्यतया कृतत्वादत्यन्तापह्नुतत्वात्। 'शस् स्तुतौ' इत्यस्मात्कर्मणि लिट्। एवमिह हरिर्विलसति ॥ ६ ॥

श्लिष्यतीति॥ इह वधूनिकरे सः श्रीकृष्णः कामपि श्लिष्यति आलिङ्गति। 'आदौ रतं बाह्यमिह प्रयोज्यं तत्रापि चालिङ्गनपूर्वमन्यत्' इति रतिरहस्योक्तेः। कामपि गोपीं यथाकामशास्त्रविधानमालिङ्गति। तच्चालिङ्गनमिह स्पृष्टकादि ग्राह्यम्। तदुक्तम्—'यद्योषितः सम्मुखमागताया अन्यापदेशाद्व्रजतो नरस्य। गात्रेण गात्रं घटते रतज्ञा ह्यालिङ्गनं स्पृष्टकमेतदाहुः ॥' इति। कामशास्त्रविहितालिङ्गनप्रकारसप्तकं यथानुरूपं काञ्चिद्गोपीं कर्मीकृत्यानुतिष्ठतीत्यर्थः। पुनः कामपि गोपीं चुम्बति। तत्स्थानानि प्रागुक्तानि बोध्यानि। चुचि वक्त्रसंयोगे। उक्तस्थानेषु वक्त्रसंयोगं करोतीत्यर्थः। कामपि रामां रमयति सुखयति। गूढमिति शेषः। भावप्राप्तिं गमतीति यावत्। स्मितचारु यथा तथा परां पश्यति। वामाम् अननुकूलामपरामनुगच्छति अनुसरति। एवं श्रीकृष्णस्य संभोगशृङ्गारप्रपञ्चः पश्यतां शृण्वतां कीर्तयतां स्मरताञ्च भुक्तिमुक्तिप्रद इति मन्वानेन कविना राधां प्रति सख्युक्तिव्यपदेशेन प्रपञ्चित इति मन्तव्यम्। अत्र श्रोत्र्या राधाया विप्रलम्भस्याङ्गभूतोऽयं संभोगो वेदितव्यः ॥ ७ ॥

अथेदं गीतं गात्रादिसुखदमित्याह—श्रीजयदेवेति॥ अद्भुतानां सर्वजनाश्चर्यकराणां केशवकेळीनां श्रीकृष्णलीलानां रहस्यं रहोवृत्तम्। सारभूतमिति यावत्। इदं गीतरूपेण गुम्फितमित्यर्थः। वृन्दावनविपिने वृन्दावनाख्ये वने चरितम् आचरितम्। भगवता श्रीकृष्णेनानुष्ठितमित्यर्थः। यशस्यं

यशसि कीर्तौ साधु । 'तत्र साधुः' इति यत्प्रत्ययः । गातृश्रोतृयशस्करमित्यर्थः। श्रीजयदेवभणितं श्रीजयदेवकविनोक्तं शुभानि श्रेयांसि वितनोतु गातृणां श्रोतृणाञ्च कल्याणं विस्तारयतु ॥ ८॥

अथ सखी गीते पूर्णे वक्तव्यं श्रीकृष्णे दृश्यमानं विशेषं श्लोकेन राधायै निवेदयति—विश्वेषामिति ॥ हे सखि राधे विश्वेषां सर्वजनानाम् अनुरञ्जनेन स्वविषयानुरागसम्पादनेन आनन्दं निरवधिकं प्रमोदं जनयन् उत्पादयन् । अथवा, स्वनिष्ठालौकिकश्रृङ्गारचेष्टादर्शनेन विश्वेषां स्वस्मिन् यदनुरञ्जनम् अनुरागः, तेन हेतुना तत्फलत्वेन तदानीमेव तेषामानन्दं जनयन् । सक्तेरपि भगवद्विषयत्वे भक्तिवदेव मुक्तिदत्वात् क्रमसुखदत्वं तदेव दर्शयन्निति भावः । अत्र च, 'भवद्भक्तिस्तावत् प्रमुखमधुरा त्वद्गुणरसात् किमप्यारूढा चेदखिलपरितापप्रशमनी' इत्याद्यनुसन्धेयम्। किञ्च, अङ्गैरवयवैः । 'अङ्गं प्रतीकोऽवयवः इत्यमरः । अनङ्गस्य अङ्गरहितस्य कामस्य उत्सवं प्रीत्यतिशयमुपनयन् सम्पादयन् । मम कामिनीविजये ह्येतैरेवालम्, अहो मम भाग्यमिति मदनमनसि सन्तोषातिशयं सम्पादयन्नित्यर्थः । तादृशसौन्दर्यसौभाग्यशालित्वमङ्गानां विशेषणेनाह—इन्दीवरश्रेणी नीलोत्पलपङ्क्तिः । तद्वत् श्यामलैः कोमलैश्च । 'उपमानानि सामान्यवचनैः' इति समासः । अनेन 'साक्षान्मन्मथमन्मथः' इति वचनमनुस्मार्यते। पुञ्जीकृतेन्दीवरसुन्दरैरिति यावत् । स्वस्य बाणक्षयशङ्काभावाद्वा मदनस्य हर्षोपपत्तिः इन्दीवराणां तद्बाणत्वात् । किञ्च, मुग्धः अत्यन्तसुन्दरः अतश्च व्रजसुन्दरीभिः वल्लवाङ्गनाभिः अभितः सर्वतः प्रत्यङ्गं प्रत्यवयवं स्वच्छन्दं यथेष्टम् । असङ्कोचनमिति यावत् । यथा तथा आलिङ्गितः आश्लिष्टः । एतादृशो हरिः श्रीकृष्णः मूर्तिमान् विग्रहवान् । 'मूर्तिः काठिन्यकाययोः' इत्यमरः श्रृङ्गारः श्रृङ्गाररस इव मधौ वसन्तसमये । सोपपत्तिकत्वमुक्तम् । क्रीडति कामिनीभिः सह विहरति। 'अङ्गनामङ्गनामन्तरे माधवो माधवं माधवञ्चान्तरेणाङ्गना । इत्थमाकल्पिते मण्डले मध्यगः सञ्जगौ वेणुना देवकीनन्दनः ॥' इत्युक्तप्रकारः प्रकाशितः । इदमिह बोद्धव्यम्—'विभावैरनुभावैश्च सात्त्विकैर्व्यभिचारिभिः । आनीयमानः स्वादुत्वं स्थायी भावो रसः स्मृतः ॥' इति दशरूपकवचनात्, 'अलौकिकचमत्कारकारी श्रृङ्गारादिको रसः' इति काव्यप्रकाशवचनात्, लोचनकारेण चमत्कारानन्दयोरभेदप्रतिपादनाच्च ब्रह्मानन्द एव श्रृङ्गारादिरसशब्दार्थ इति पर्यवस्यति । तथा भगवतः श्रीकृष्णस्य साक्षात् परमानन्दरूपब्रह्मरूपत्वात्तद्विषयश्रृङ्गाररसस्यापि तथात्वादिह

चोभयोरैक्येनानन्वयालङ्कारः। 'एकस्यैवोपमानोपमेयत्वेऽनन्वयो मतः' इति तल्लक्षणात्। उत्प्रेक्षा वा। अत्र शृङ्गार इति रसस्य सिद्धत्वेन उपमानत्वेन कथनान्न स्वशब्दवाच्यत्वदोषः। साध्यत्वेनोपादान एव तस्य दोषत्वादिति ॥ ११ ॥

एवं श्रीकृष्णं दर्शयित्वा तद्वर्णनं तद्विहारवर्णनञ्च विधाय तदन्तिकप्राप्तये त्रपाभरादगारयन्तीं सखीं राधां विरहिजनव्यसनोपन्यासेन त्वरयति सखी-- अद्येति ॥ अद्य अस्मिन् वसन्तसमये श्रीखण्डशैलानलः चन्दनगिरिसमीरणः ईशाचलमनुसरति। ईशस्य परमेश्वरस्य श्वशुरत्वेन संबन्धी योऽचलो हिमवान्। यद्वा, ईशश्चासावचलश्च स्वयं पर्वतः सर्वपर्वताधिपतिश्चेति हिमवान्। 'हिमालयो नाम नगाधिराजः' इत्युक्तत्वात्। तमनुसरति। तं लक्षीकृत्य गच्छतीत्यर्थः। अत्र हेतुमुत्प्रेक्षते---उत्सङ्गवसद्भुजङ्गकबलक्लेशात् प्रालेयप्लवनेच्छया इव। उत्सङ्गे पाटीरतरुपरिवृते परिसरदेशे वसन्तः निषण्णा ये भुजङ्गाः सर्पाः तत्कृतः कबळो ग्रसनं तेन यः क्लेशः सर्वाङ्गीणा व्यथा तस्माद्धेतोः प्रालेयप्लवने हिमजलस्नाने इच्छयेव। सर्पदंशनजनितविषनिर्हरणार्थं हिमजलैरात्मानमभिषेक्तुमाशयेवेति हिमगिरिं प्रति गमने हेतुमुत्प्रेक्षते। शीतजलाभिषेकाद्विषनिवृत्तेरायुर्वेदप्रसिद्धत्वादिति भावः। किञ्चास्मिन् समये पिकानां कोकिलानां गिरः कूजितानि उन्मीलन्ति प्रकाशन्ते। सर्वत्र निरन्तरं श्रूयन्त इत्यर्थः। उन्मीलनहेतुमाह--स्निग्धानि कीटाद्यनुपहतानि यानि रसालमौलिमुकुळानि सहकारपादपशिखासञ्जातान् कोरकान्। किञ्चिन्मुग्धेति केषाञ्चित् पाठः। तत्र किञ्चिन्मुग्धानि ईषन्मुग्धानि विकसितानीत्यर्थः। आलोक्य दृष्ट्वा हर्षोदयात् अस्माकं सञ्जग्धिसिद्धेः साधनभूतस्सहकारकोरकनिकर इदानीमाविर्भूत इति सन्तोषाविर्भावाद्धेतोः। कुहूः कुहूरित्यनुकरणशब्दः। इति प्रकारे। कळा अव्यक्तमधुराः उत्ताळा गम्भीराः। यद्वा, उत्ताळाः ताळमतिक्रान्ताः। उच्छृङ्खला इति यावत्। कळाश्च ता उत्ताळाश्च कळोत्ताळाः। तादृश्यो गिरः उन्मीलन्ति वियोगिजनकर्णशूलायमानतया संभोगिजनश्रुतिसुधाधारायमाणतया च प्रसरन्तीत्यर्थः। मन्दानिलकोकिलकूजितादेरसह्यतां परिहर्तुमभिमतस्य श्रीकृष्णस्यान्तिकमभिगन्तुं त्वरस्व। ततो यद्यपि नाभिमतमनोरथसिद्धिः, तथापि विरहवेदनापरिहारस्स्येत्स्यत्येवेति भावः। अत्र पूर्वार्धे हेतूत्प्रेक्षा। उत्तरार्धे तु काव्यलिङ्गं स्वभावोक्तिश्च। नन्वत्र रसालमुकुळालोकनस्य उन्मीलनस्य च कर्तृभेदात् पूर्वकालक्रियायाः क्त्वानुपपत्तिः। कथं तत्परिहार इति चेदुच्यते।

'कथां कादम्बरीं श्रुत्वा नान्या मे रोचते कथा' इत्यत्र वर्तमानाय इति पदमध्याहृत्य कादम्बरीं कथां श्रुत्वा वर्तमानाय मे अन्या कथा न रोचते इति सुयोजं भवति। तद्वदिहापि स्थितानामिति पिकविशेषणत्वेनाध्याहृत्य सुयोजम् ॥ १२॥

एवं स्वरयन्त्या सख्या कृष्णान्तिकं नीताया राधायाश्चरितं किमपि कविः संक्षिपति—रासेति॥ रासोल्लासो रासक्रीडा, स एव भरः कार्यभारः तेन हेतुना विभ्रमः निरवधानता तं बिभ्रति धारयन्तीति विभ्रमभृतः तादृशीनाम्। अत्रावहितत्वादन्यत्रानवहितानामित्यर्थः। आभीरवामभ्रुवां गोपाङ्गनानाम् अभ्यर्णे निकटे प्रेमान्धया अनुरागातिशयेन कृत्याकृत्यमूढया सत्या राधया। प्रगल्भया सख्या कृष्णान्तिकं नीतयेति शेषः। उरः वक्षः निर्भरं गाढगाढं परिरभ्य आश्लिष्य हे कृष्ण त्वद्वदनं त्वन्मुखं साधु अतिरम्यम्, यतः इदं सुधामयम् अमृतमयं वर्तते। वागात्मना गीतात्मना वेणुनादात्मना च इतो बहुधा सुधा प्रसरति यस्मात्तस्मादिदं ज्ञायते त्वद्वदनं सुधामयमिति। अनेन प्रकारेण काञ्चित् परिमिताकारां वाचं व्याहृत्य सलप्य गीतस्तुतिव्याजेन श्रीकृष्णमुखनिर्गतगीतप्रशंसनच्छलेन आलिङ्गितश्चासौ चुम्बितश्चालिङ्गितचुम्बितः तदानीं स्मितेन राधाविषयेणादरेण यत् स्मितं जातं तेन मनोहारी राधाया अत्यन्तमनोहरः। एवंभूतो हरिः श्रीकृष्णः वः युष्मान् मत्प्रबन्धगातॄन् तच्छ्रोतॄंश्च पातु रक्षतु। परिरभ्य आलिङ्गितचुम्बित इति परिरम्भस्यावृत्तिः। चुम्बनस्य तु एकवारं कृतत्वं ज्ञेयम्। स्मितमनोहारीत्यनेन स्मितं दृष्ट्वा राधया मुषितमनसेव स्थितमिति द्योत्यते। ईदृशभगवत्कथानुसन्धानकीर्तनश्रवणादीनां श्रेयस्करत्वात् 'श्रेयांसि बहुविघ्नानि' इति प्रसिद्धेश्च विघ्ननिवारणार्थं सर्गान्तेऽप्याशीरियं कृतेत्यवगन्तव्यम् ॥ १३॥

इति श्रीगीतगोविन्द इति॥ गीतानि तत्प्रतिपाद्यतया गोविन्दश्चास्मिन्निति गीतगोविन्दमिति काव्यनाम, अभिज्ञानशाकुन्तलम्, मुद्राराक्षसमित्यादिवत्। प्रतिपाद्यमहिमद्योतकः श्रीशब्दः। शृङ्गारेण महत् शृङ्गारमहत् तच्च तत् काव्यञ्च शृङ्गारमहाकाव्यम्। शब्दपारिमित्येऽपि महत्त्वं शृङ्गाररसपरिपुष्ट्या द्रष्टव्यमिति भावः। श्रीकृष्णस्य दासः तदेकशरणत्वभावनया तत्कृपालब्धसर्वविभवतया च तत्प्रसादमात्रफलसर्वस्वप्रत्यः

1. मूले मुद्रितपाठादाधिक्यं व्याख्यातृपाठे द्रष्टव्यम्।

तादृशो यो जयदेवः तत्कृतौ। कृतेर्लिङ्गनैयत्यात् काव्यविशेषणत्वेऽपि स्त्रीत्वम्। सामोददामोदरो नामेति सर्गस्य नामकरणम्। स्वानुरक्तगोपाङ्गनासहस्रहृदयानन्दप्रवृत्ततया आमोदसहितः दामोदरः श्रीकृष्णः यस्मिन्नित्यन्वर्थो बोद्धव्यः। प्रथमः आदिमः सर्गः अध्यायः। 'सर्गस्वभावनिर्मोक्षनिश्चयाध्यायसृष्टिषु' इत्यभिधानात्। समाप्त इति शेषः। 'भगवान् भक्तभक्तिमान् भक्तवत्सलः' इति प्रसिद्धया भक्तानां गोपीनामामोदे सति स्वस्याप्यामोद इति मन्यते भगवानिति मन्वानेन कविना सर्गस्य नाम कल्पितमिति सर्वं शिवम्॥

इति श्रीमदखिलविद्यापरिवारश्रीदक्षिणामूर्तिमहादेवलब्ध-
वेदविद्यवैशारद्यपूर्वोत्तरमीमांसाशब्दतर्कसाहित्यसा-
र्वभौमकोण्डुभट्टोपाध्यायानुजन्मना सर्वाम्बि-
कागर्भशुक्तिमुक्तामणिना लक्ष्मीधरसूरिणा
विरचितायां श्रीगीतगोविन्दव्या-
ख्यायां श्रुतिरञ्जिन्याख्यायां
सामोददामोदराख्यः
प्रथमसर्गविमर्शः॥

द्वितीयः सर्गः ॥

अक्लेशकेशवः ।

एवं सर्वाङ्गनासाधारण्येन श्रीकृष्णविहारानुपवर्ण्य प्रथमसर्गान्ते संभ्रमसङ्कुलसकलगोपीमध्ये गीतस्तुतिव्याजेनालिङ्गनचुम्बनमात्रलाभचरितार्थत्वेऽपि कथिते राधायाः प्रवृत्तिं सविस्तरं वक्तुमुपक्रमते — विहरतीति ॥ राधासाधारणप्रणये स्वस्यामन्यासु च समानप्रेमणि हरौ श्रीकृष्णे वने वृन्दावने विहरति युवतिभिः सह क्रीडति सति । अथवा, असाधारणप्रणये पूर्वमसाधारणप्रणयः स्थितः इदानीं साधारणप्रणयो जातः श्रीकृष्णः, अत एव मामधुना नाद्रियते, अन्याभिः सह विहरति चेत्यादि चिन्तयित्वा विगळितः शिथिलितो यो निजोत्कर्षः, तस्माद्धेतोरीर्ष्यावशेन अन्यतो गता क्रीडत्कृष्णान्तिकादन्यत्र याता । अथवा, विगळितनिजोत्कर्षादि इति छेदः । निजः आत्मीयो यो गुणाधिकत्वरूप उत्कर्षः स आदिर्येषां दृढानुरक्तत्वनिर्मत्सरत्वनित्यप्रसन्नताधैर्यगाम्भीर्यादीनां ते निजोत्कर्षादयः । विगळिता निजोत्कर्षादयो यथा स्युस्तथा अन्यतो गता सती । क्वचिदपि कस्मिंश्चिल्लताकुञ्जे लीना दुस्सहावमानचिन्तया निलीय स्थिता दीनापि रहः सखीमुवाच उक्तवती । दैन्यहेतुं कुञ्जविशेषणेनाह— गुञ्जतां झङ्कुर्वतां मधुव्रतानां भृङ्गाणां या मण्डल्यः समूहास्ताभिः मुखराणि वाचालानि शिखराणि लताविटपाग्राणि यस्मिंस्तादृशे लताकुञ्जे । विरहिण्यास्तादृशे देशे कथमदैन्यं स्यादिति भावः । अपिशब्देन विरहवेदनादैन्ये सत्यपि कृष्णान्तिकमेव गन्तुमना नासीदिति धैर्यं व्यज्यते । सखीमुवाचेत्यनेन विरहरुजाशमनं श्रीकृष्णगुणप्रसङ्गं मन्वाना तामवादीदिति द्योत्यते । प्रियं प्रति रुषितायास्तत्सकाशादपगतायास्तद्गुणवर्णनया लाघवं च न शङ्कनीयमिति रहस्सखीमुवाचेत्यनेन व्यज्यते । प्राणनिर्विशेषया सख्या श्रुते न लाघवं शङ्क्यम् । अन्यः कोऽपि तत्र नास्ति श्रोतुमित्यर्थः । ब्रूञो लिटि 'ब्रुवो वचिः' इति वचिरादेशः । 'ब्रुवि शासि' इत्यादिना द्विकर्मकत्वेन सखीं रहो रहस्यमुवाचेति वा योजना । हरिणीवृत्तम् । 'रसयुगहयैर्न्सौ म्रौ स्लौ गो यथा हरिणी तथा' इति तल्लक्षणात् ॥ ॥ १ ॥

सखीं प्रति नायिकाया उक्तिप्रकारं गीतेनाह——सञ्चरदिति ॥ गुञ्जरीरागेण गीयत इति । तत्रायं भावः —पूर्वसर्गे रागद्वयस्यैकैकां पदीमुक्त्वा चतसृभिरष्टपदीभिस्सर्गे समापिते द्वितीयसर्गे आदावङ्गीकृतस्य माळवरागस्य द्वितीय पदी

मानयितव्येति मनीषयेति। रूपकताळेन वाद्यत इति। तल्लक्षणन्तु, 'द्रुतद्वयन्तं विरामान्तं रूपकं परिकीर्तितम्' इति। अत्र, रासे हरिमिह विहित-विलासमिति ध्रुवपदम्। स्मरतीत्यादिपरिहासमित्यन्तमनुध्रुवपदम्। सर्वपद-साधारणत्वात्तदादावेव व्याख्यायते। हे सखि मम मनः कर्तृ इह लताकुञ्जे हरिं श्रीकृष्णं स्मरति प्रत्यक्षतः तत्सम्भोगसुखासंभवेऽपि तत्सुखमनुभवतीत्यर्थः। कीदृशं हरिमित्यत्राह—रासे रासक्रीडायां विहितविलासं मद्व्यतिरिक्ताभिः कामिनीभिः सह कृतविहारम्। मद्विषये कृतः परिहासो येन तम्। मयि निरादरमित्यर्थः। अलमाभिर्मे क्रीडितुम्; यत इमाः कुशलाः। इयं तिष्ठतु वा, गच्छतु वा। नेदानीं तद्विचार्यमिति मथनास्थैव तेन कृता। तथापि मे मनो मानहीनतया तमेव स्मरत्यहो इति स्वमानसं प्रत्यसूया व्यज्यते। कीदृशं हरिमिति जिज्ञासायां विशेषणानि पादैराह—सञ्चरन् धेनूनां दुग्धवृद्धये श्वासानिलदानाय व्यापारवान् यः अधरः ओष्ठः तत्र या सुधा अमृतं तया मधुरः श्रुतिसुखदो यो ध्वनिस्तेन मुखरितः तत एव मोहनः स्वगुणैस्सर्वजनचित्ताकर्षको वशो वेणुवाद्यं यस्य, किञ्च चलितौ कामिनीचित्ताकर्षणार्थं तत इतः प्रस्थितौ दृगञ्चलौ नयनप्रान्तभागौ यस्य। चञ्चलः स्वरताळाभिनयानुसारेण कम्रो मौलिः केश-बन्धो यस्य, कपोलयोर्गण्डतलयोर्विलोलौ डोळायितौ वतंसौ कर्णाभरणे यस्य। स च स च स च तथा। तादृशं हरिं स्मरतीत्यन्वयः। वतंसमित्यत्र 'वष्टि वागुरिरल्लोपमवाप्योः, इत्यल्लोपः। भाषान्तरे शसयोर्भेदाभावादनुप्रासस्य भङ्गाभावः॥ ॥ १ ॥

चन्द्रकेति॥ चन्द्रकैश्चारूणि रम्याणि यानि मयूरशिखण्डकानि बर्हिबर्हाणि तेषां मण्डलं संघातस्तेन वलयितास्सञ्जातवलयाः। परिवेष्टिता इति यावत्। तादृशाः केशाः कुन्तळा यस्य तम्। शिखिपिञ्छालङ्कृत-मौलिमित्यर्थः। अत एव प्रचुरम् आयतं यत् पुरन्दरधनुः इन्द्रचापः तेनानुरञ्जितोऽलङ्कृतो मेदुरः स्निग्धश्च यो मुदिरो मेघः। 'घनजीमूत-मुदिरजलमुग्धूमयोनयः' इत्यमरः। तमिव सुवेषं शोभनवेषम्। इन्द्रचापसवर्णमयूरपिञ्छालङ्कृतत्वाद्धरेरिन्द्रचापाङ्कितमेघसाम्यम्। एतादृशं हरिं स्मरतीत्यन्वयः। अत्र विजातीययोर्वृत्त्यनुप्रासोपमयोस्संसृष्टिः। देशान्तरे शषयोरवैलक्षण्यात् केशं वेषमित्यनुप्राससिद्धिः ॥ २ ॥

गोपेति ॥ गोपकदम्बकानां गोपालसमूहानां नितम्बवत्यः स्त्रियः गोप्य इत्यर्थः। तासां मुखचुम्बने लम्भितो लोभो यस्य तम्। लम्भितः प्रापितः। ताभिरेव विलासादिभिः करणैर्मुखचुम्बने लोभं लम्भितमित्यर्थः। बन्धुजीवो नाम रक्तपुष्पः पल्लवावस्थायी गुल्मविशेषः। तत्पुष्पमपि बन्धुजीवम्। 'बन्धूको बन्धुजीवकः' इत्यमरः। तद्वन्मधुरः सुखदर्शनः। 'उपमानानि सामान्यवचनैः' इति समासः। तद्वशे अधरपल्लवे कलिता प्रसृता दरस्मितशोभा मन्दहासकान्तिर्यस्य तम्। बन्धुजीवमधुरेत्युपमा। अधरपल्लवेति रूपकम्। तयोरनुप्रासेन संसृष्टिः। तादृशं हरिं स्मरतीत्यन्वयः ॥ ३ ॥

विपुलेति ॥ विपुला विस्तृताः निरन्तराः अविरलाः। सान्द्रा इति यावत्। तादृशाः पुलकाः रोमोद्गमाः ययोः तादृशयोर्भुजयोः बाहुलतयोः पल्लवाभ्यां। पाणिभ्यामित्यर्थः। पल्लवशब्देन पाण्योरभिधानादभेदरूपकम्। तदुत्थापितस्य भुजयोर्लतात्वरूपणस्याशाब्दत्वादेकदेशविवर्तिरूपकञ्च मिथः सङ्कीर्णं बोध्यम्। वलयितं क्रोडीकृतं वेष्टितम्। आलिङ्गितमिति यावत्। वल्लवयुवतिसहस्रं गोपकामिनीसहस्रं येन तादृशम्। किञ्च, करौ चरणौ च करचरणौ। प्राण्यङ्गत्वादेकवद्भावः। तस्मिन् यानि मणिगणभूषणानि कौस्तुभचिन्तामणिप्रभृति दिव्यरत्ननिवहप्रत्युप्तजाम्बूनदाभरणानि तेषां किरणैर्मयूखैर्विभिन्नमवध्वस्तं तमिस्रं रतिसारस्यप्रतिबन्धकोऽन्धकारो येन तम्। 'तमिस्रं तिमिरं तमः' इत्यमरः। तादृशं हरिमित्यन्वयः ॥ ४ ॥

जलदेति ॥ जलं ददत इति जलदाः असितमेघाः तेषां पटलेन समूहेन अनिलवलनचञ्चलेन तेनोपाधिना चलन् चञ्चल इवाभासमानो य इन्दुः पूर्णचन्द्रः तस्य विशेषेण निन्दकः शोभातिरस्कारकारी चन्दनविन्दुर्ललाटे यस्य। चक्रपाणिरितिवद्व्यधिकरणबहुव्रीहिः। अथवा, इन्दुविनिन्दकश्चन्दनविन्दुर्यस्मिंस्तादृशं ललाटमलिकं यस्य तादृशम्। नीलजलदाभललाटान्तरभासमानपूर्णचन्द्रसदृशचन्दनतिलकमित्यर्थः। किञ्च, पीनयोः पीवरयोः पयोधरयोः स्तनयोः परिसरस्य पर्यन्तभुवोर्मर्दने। स्तनयुगवामनीकरण इत्यर्थः। निर्दयं दयालेशपरिहीणं हृदयकवाटं कवाटवद्विस्तीर्णमुरःस्थलं यस्य तम्। अत्र मर्दनविषयत्वेन परिसरग्रहणं पयोधरयोरतिकाठिन्याद्वामनीभाव एव स्यात्, मृद्यमानता तु परिसरस्यैवेति द्योतयितुम्। अन्यथा रसभङ्गहेतुत्वादिति ज्ञेयम्।

कुचपरिसरमर्दनादन्यत्र सदयहृदयता भगवतोऽवगन्तव्या। गोपीनां बहुत्वेऽपि पयोधरयोरिति द्विवचनेनैव विग्रहः कार्यः। तदुक्तं वामनेन—'स्तनादिषु द्वित्वादिरिष्टा जातिः प्रायेण' इति। माघश्चाह—दैत्यैश्च प्राणमुषां नखानामुपेयुषां भूषणतां क्षतेन। प्रकाशकार्कश्यगुणौ दधानास्स्तनौ तरुण्यः परिवव्रुरेनम्॥' उपमाभेदानुप्रासयोरिह संसृष्टिः ॥ ५ ॥

मणिमयेति ॥ मणिमयौ रत्नविकारौ यौ मकरौ यादोभेदौ तावेव ये मनोहरे कुण्डले कर्णभूषणे। अथवा, मणिमयाभ्यां मकराभ्यां मनोहरे ये कुण्डले जाम्बूनदकुण्डले ताभ्यां मण्डितौ प्रतिफलनादलङ्कृतौ गण्डौ कपोलतले यस्य तम्। किञ्च, उदारं भजतामिष्टार्थदानशौण्डम्। अपि च, पीतवसनं पीताम्बरपरिधानम्। किञ्च, अनुगताः अनुसृत्य गताः ये मुनिमनुजसुरासुरवराः। वरशब्दः प्रत्येकं योज्यः। मुनिवरा नारदाद्याः। मनुजवराः स्वर्गं गता इक्ष्वाकुययातिप्रभृतयः। सुरवराः शतधृतिशङ्करशक्रादयः। असुरवराः प्रह्लादप्रमुखाश्च। त एव परिवाराः परिजना यस्य तम्। एतेषामुपरि स्थित्वा सर्वदा श्रीकृष्णलीलावलोकनैकतत्परत्वादेवमुक्तम्। वस्तुतस्तु, रासक्रीडायामपि नभसि सर्वदिव्यजनसमुदायसन्निधानं श्रीभागवतेऽपि 'गन्धर्वपालीभिरनुद्रुत आविशद्वा श्रान्तो गजीभिरिभराडिव भिन्नसेतुः' इति लेशतः सूचितमेव। तदनुसारेणैव नारायणीयेऽपि 'गगनगतं मुनिनिवहं श्रावयितुं जगिथ कुलवधूधर्मम्' इत्युक्तम्। अतो निशासु रासक्रीडायां बहुपरिजनसंवृतत्वं भगवतो न रसाभासत्वावहत्वादनुचितं कविना वर्णितमित्याशङ्कनीयम् ॥ ६ ॥

विकचेति ॥ कदम्बशब्देनात्र धूळीकदम्बो ग्राह्यः, अन्यस्य वसन्ते पुष्पोद्गमाभावात्। अथवा सर्वर्तुसान्निध्यान्नानुपपत्तिः। विकचस्य विकसितपुष्पस्य कदम्बस्य वृक्षविशेषस्य तले मिळितं स्थितम्। गोपीभिः परिवेष्टितमिति वा। कलिना कलिकालेनासन्नेन हेतुना यत् कलुषं पापम् अधर्मरुचिप्रभृतिकं ततो यद्भयं कालान्तरभावित्वभावनायां मनसि तासः। 'भीत्रार्थानां भयहेतुः' इत्यपादानत्वात्'पञ्चमी भयेन' इति समासः। तं शमयन्तम्। 'दर्शनादनुसन्धानात् कीर्तनाच्छ्रवणादपि। हरिर्हरति पापानि भक्तानां भक्तवत्सलः॥' इत्युक्तत्वात् निश्शेषमुच्छोषयन्तमित्यर्थः। तदपि श्रीभागवते प्रतिपादितमेव दशमस्कन्धादौ श्रीकृष्णचरितं कलिकल्मषघ्नमिति। किञ्च, तरङ्गवत् तरङ्ग इवाचरन् अनङ्गः कामो यस्यां सा तरङ्गदनङ्गा। तादृशी दृक् दृष्टिः यस्य तत् तरङ्गदन-

ङ्गदङ्ग। तथाविधेन वपुषा निजशरीरेण मामपि किमपि रमयन्तम्। नेदीयसीं मां वपुषा रमयति। इदानीन्तु ईर्ष्यया दवीयसीमपि मां वपुषा स्मृतिपथमनुञ्चता रमयत्येवेति भावः। अत एवेर्ष्याशैथिल्यं सूच्यते। मनसेति क्वचित् पाठः। तरङ्गदनङ्गदङ्गसहायेन मनसेति तदानीमर्थः। दूरस्थवस्तुदर्शनं कृष्णस्य न दुश्शकम्, 'विश्वतश्चक्षुः' इति श्रुतेः। एतादृशं हरिं स्मरतीत्यन्वयः। तरङ्गदिति 'सर्वप्रातिपदिकेभ्यः क्विबाचारे' इति क्विप्। 'सनाद्यन्ता धातवः' इति धातुसंज्ञायां 'वर्तमाने लट्' इति लट्, लटः शता। शमयन्तमिति। शमो दर्शनादिति नियमादिह मित्त्वम्। 'मितां ह्रस्वः' इति ह्रस्वः ॥ ७ ॥

स्वकृतं गीतं सफलमित्याह—**श्रीजयदेवेति** ॥ श्रीजयदेवेन कविना भणितं वर्णितम् अतिशयमाहनमधुरिपुरूपम् अतिशयेन मोहनं सर्वजनचित्ताकर्षणं मधुरिपोः श्रीकृष्णस्य रूपं यस्मिंस्तादृशम्, अत एव सम्प्रति इदानीं हरिचरणस्मरणं प्रति श्रीकृष्णपादारविन्दचिन्तनं प्रति अनुरूपमनुकूलं साधनमिदं गीतं पुण्यवताम्, प्रशंसायां भूमनि वा मतुप्, पूर्वजन्मसञ्चितपुण्यपरिपाकशालिनां गातॄणां श्रोतॄणाञ्च श्रेयस्करं भवत्विति शेषः। यद्वा, उक्तविशेषणविशिष्टमिदं गीतं पुण्यवतां हरिचरणस्मरणं प्रति अनुरूपमनुगुणसाधनम्। अस्त्विति शेषः। अस्तिभवत्योस्साधारणो निर्देशः। अथवा, मधुरिपुरूपमित्यस्य रूप्यते ज्ञाप्यते अपरोक्षतया ज्ञेयमनेनेति रूपमपरोक्षज्ञानम्। मधुरिपुविषयमपरोक्षज्ञानं मधुरिपुरूपम्। तद्यस्मात्तादृशमिदं गीतं हरिचरणस्मरणं प्रति प्रतिहरिचरणस्मरणम्। यदा यदा हरिध्यानस्य विशिष्यावश्यकत्वानुसन्धानपूर्वकं सुधियां हृदयैकाग्र्यं जायते, तदा तदेदं तदनुगुणं स्याद्गाथकानां श्रोतॄणाञ्च भक्तानामित्यर्थः। ततश्चेदं गीतं स्वादुनादकण्ठैर्गाथकैर्हितैषिभिर्मनीषिभिश्च यथार्हं गातव्यं श्रोतव्यञ्चेति भावः ॥ ८ ॥

अथ गीते समापिते राधा सख्यभिमुखी श्रीकृष्णे विहरमाणं निजमानसमुपालभते—**गणयतीति** ॥ हे सखि मनः मदीयं चेतः कर्तृ श्रीकृष्णे युवतिषु मद्व्यतिरिक्तासु गोपकामिनीषु वलत्तृष्णे प्रवर्द्धमानानुरागे मां विना मां परित्यज्य ताभिः सह विहारिणि क्रीडाशीले च सति। इदमपराधसूचकम्। अथवा, वलत्तृष्णे मयि दृढानुरक्तायामनिवृत्तप्रेम्णि युवतिषु मदन्यासु मां विना विहारिणि एवमत्यन्तापराधशालिन्यपि श्रीकृष्णे गुणग्रामं गुणसमूहं गणयति संख्याति। न त्वगुणलेशमित्यर्थः। अत्र मनसोऽत्यन्तानसूयत्वसूचनार्थं ग्रामग्रहणम्। अपरा-

धिनो दयितस्य गुणगणगणनप्रवणत्वरूपवस्तुना राधामनसो गुणज्ञतारूपवस्तु व्यज्यत इति वस्तुना वस्तुध्वनिः। अगुणज्ञत्वं नाम नारीणामन्यगुणगणबन्ध्यताप्रतिपादकम्। यदाह श्रीहर्षः—'नैव नः प्रियतमोभयथासौ यद्यमुन्न वृणुते वृणुते वा। एकतो हि धिगमूमगुणज्ञामन्यतः कथमदः प्रतिलम्भः॥' इति। न केवलमेवं कृष्णपक्षपातित्वमात्रम्, अपि तु तं परित्यज्यान्यत्र मनसो गमनमपि नास्तीत्याह—श्रमात् प्रमादादपि आममन्यत्र सञ्चरणम्। भ्रमशब्दात्स्वार्थेऽण्प्रत्ययः। नेहते नाकाङ्क्षते। कृतबह्वपराधमपि श्रीकृष्णं परित्यज्यान्यत्र गमनमपि नेच्छतीत्यर्थः। भ्रममनवस्थानमततिं सततमाप्नोतीति भ्रमादिति मनोविशेषणम्। 'अत सातत्यगमने' इत्यस्माद्धातोः क्विप्। सर्वदा चञ्चलस्वभावमपीत्यर्थः। स्वयं स्वतश्चञ्चलस्वभावम्। विषयो महापराधशाली कृष्णः। अतोऽस्य त्यागयोग्ये समये प्राप्ते न त्यक्तुमिच्छति। अहो मे मनसो धाष्ट्र्यमिति भावः। भ्राममिति 'अनुदात्तोपदेश' इत्यादिना वृद्धिप्रतिषेधात् कृदन्तप्रयोगमसाधुं मत्वा भाममिति केचित् पाठमङ्गयकुर्वन्। तत्रायमर्थः— कृष्णगुणगणनमेकम्। प्रमादादपि भामं क्रोधं नेहते न चेष्टते। गुणग्रामस्य सत्त्वात्तद्गुणनं पूर्वाभ्यस्तं न जहातु कामम्। अपराधेषु कृतेषु क्रोधेनापि भाव्यम्। तस्य प्रमाददप्यनाविर्भाव इति द्वितीयम्। एवमनौचित्यद्वयम्। किञ्च, तृतीयमप्यस्तीत्याह—वहति च परीतोषमिति। 'उपसर्गस्य घञ्यमनुष्ये बहुळम्' इति परीत्यस्य दीर्घः। परीतोषं वहति बिभर्ति च। तन्नामश्रवणे तद्दर्शने तद्वेणुनादे तदनुस्मरणे च महान्तं परितोषं बिभर्ति च। अपराधिन्यक्रोधादपि महदनौचित्यं परितोषस्तत्रेति तृतीयम्। अन्यच्च। सत्यामप्रीतौ सर्वैरपि सर्वेषां गुणेष्वपि दोषत्वमारोप्यत इति लोकस्वभावस्यापि विरुद्धमेव मे मनसा किञ्चित् क्रियत इत्याह—दोषं दोषारोपणं दूरत एव विमुञ्चति त्यजति। अत्र, 'निवार्यतामालि किमप्ययं वटुः पुनर्विवक्षुःस्फुरितोत्तराधरः। न केवलं यो महतोऽपभाषते श्रृणोति तस्मादपि यः स पापभाक्॥' इति कालिदासोक्त्या महानुभावस्य महिमानमविचार्य स्थूलदृष्ट्या तच्चरितेषु दोषारोपस्य पापरूपत्वादित्यर्थः। आसतामनूनि चत्वार्यनौचित्यानि। पञ्चममपि वर्तते। तन्निवर्तने तूपायश्चिन्तनीय इत्याह — पुनरपि मनो वामं कामं करोति। हे सखि वामं वक्रम्। अनुचितकार्यकरमिति यावत्। तादृशं मनः पुनरपि आरनाळमिळितदुग्धवत्परित्याज्यकक्ष्यां प्रविष्टं तं श्रीकृष्णं प्रति भूयोऽपि कामं करोति। कामनानर्हतासूचकोऽपिशब्दः। अहमत्र किं करोमि। वक्रमार्गप्रस्थितस्य मन्मनसः समाधानार्थं त्वया कश्चिदुपायश्चिन्तनीय इत्यर्थः। अत्र मां विनेत्यत्र

'पृथग्विना नानाभिस्तृतीयान्यतरस्याम्' इति विकल्पनाद्द्वितीया। विहारिणीत्यत्र 'सुप्यजातौ' इति णिनिः। विहारोऽस्यास्तीति विहारीत्यत इनिर्न भवति 'एकाक्षरात् कृतो जातेस्सप्तम्यां च न तौ स्मृतौ' इति निषिद्धत्वात्। यद्वा, तस्य प्रायिकत्वात्। 'इदमुत्तममतिशयिनि व्यङ्ग्ये' इति काव्यप्रकाशे। तदनुसारेण वा इनिः। हरिणीवृत्तमिदमपि। तल्लक्षणन्तूक्तम् ॥ २ ॥

गीतम्—६

एवं रासक्रीडासक्तं कृष्णं स्मृत्वा विरहवेदनां सोढुमशक्ता सती राधा तमानयेति सखीमभिधत्ते— निभृतेति ॥ गुण्डक्रियारागेणेति। अत्राय-मभिप्रायः— प्रथमसर्गे माळवरागस्य एका पत्नी मानिता। तदनन्तरमत्र सर्गे तद्द्वितीयां पत्नीं मानयितुमिति। 'रतोत्सुका कान्तपदे वसन्ती विभूषिताङ्गी नवपुष्पमाल्यैः। इतस्ततः प्रेरितदृष्टिरार्द्रं रम्याकृतिर्गुण्डकरी प्रहृष्टा ॥' इति तद्रूपध्यानविधिः। एकताळेन वाद्यत इति। तल्लक्षणं पूर्वसर्गे कथितम्। अत्र सखी हे इत्यारभ्य सविकारमित्यन्तं ध्रुवपदम्। सर्वसाधारणत्वात्तदेवादौ व्याक्रियते। हे सखि उदारं वाञ्छितार्थवितरणधुरन्तरं केशिमथनं श्रीकृष्णं मया सह रमय क्रीडय। अन्यां विहाय यथा स मयैव सह रंस्यते, तथा यतस्वेत्यर्थः। कीदृश्या मयेत्याशङ्कायामाह— मदनमनोरथभावितयेति। मदनशब्दः कामोपभोगपरः। कामोपभोगविषये मनोरथा आशंसाविशेषाः तैर्भावितया अधिवासितया। अथवा, मदनकर्तृकैर्मनोरथैरिति वा योज्यम्। भावितया सत्तां प्रापितया। मनोरथानामभावे विरहवेदनातिशयेन ममाप्यभाव एवेति मनोरथैरेवाहं भावितास्मीति यावत्। असह्येऽपि वेदनाधिक्ये तेन सह रहःक्रीडा कदाचिद्भविष्यतीत्याशामात्रेणैव जीवन्त्येत्यर्थः। दुष्करमेतत्, तस्य त्वय्यनुरागाभावादिति मा भाणीरित्याह—सविकारम्। विकारा दृष्टिरागादयः। मय्यनुरागस्यानुभावा बहवस्सन्ति तस्येत्यर्थः। अथवा, 'वाहिताग्न्यादिषु' इति निष्ठायाः परनिपातेन भावितमदनमनोरथयेति। अनुसंहितकामभोगाभिलाषयेत्यर्थः। एवं मम रागमवबुध्य तदानुगुण्येन सोऽपि मय्यनुरागशालीति सविकारमित्यनेनोच्यते। ईदृश्या मया सह तादृशं रमयितुं तव नातिप्रयास इति भावः। एवं सप्तसु पादेष्वपि तृतीयान्ततया स्त्रीलिङ्गस्य द्वितीयान्ततया पुल्लिङ्गस्य च शब्दस्य प्रयोगः। मया केशिमथनमित्यनयोः शब्दयोर्विशेषणतया स्थितिरवगन्तव्या। कीदृश्या मया, कीदृशं केशिमथनमिति प्रथमपादेनाह— निभृतेति।

निभृतं निश्चलम्। निर्जनत्वादेकान्तविहारोचितमित्यर्थः। तादृशं यन्निकुञ्जगृहं लतामन्दिरं तद्गतया प्राप्तया मया सह। कीदृशं तम्--निशि रात्रौ रहसि निर्जनेऽस्मिन्नेव निकुञ्जगृहे निलीय वसन्तं मत्प्राप्तिमेव प्रतिपाल्य गूढतया तिष्ठन्तम्। आभ्यामुभयोर्विशेषणाभ्यां सखीकर्तव्यं कृष्णस्यात्मनश्च मिथोघटनसंविधानचातुर्यं सम्यगात्मनैवोपदिष्टम्। अस्मिन् लताकुञ्जे आगन्तव्यमिति कृष्णाय निवेद्य तस्मिन्नेकाकिन्यत्रागते वसति सत्यावाभ्यां यदृच्छयात्रागन्तव्यमिति। यदृच्छया मयि लतागृहं विशन्त्यां तेनात्र सन्निहितेन भवितव्यमिति भावः। एवं यदृच्छयेवागत्य रहसि निलीय वसन्तमन्तिके दृष्ट्वा स्वस्यास्तात्कालिकं चेष्टितं निजविशेषणेनाह--चकितं सभयसंभ्रमं यथा भवति तथा विलोकिताः दृष्टाः सकला दिशो यया तादृश्या। तदानीं तं कीदृशम्--रतिः कामक्रीडा तत्र यो रभसो वेगः त्वरा, 'त्वरयति रन्तुमहो जनं मनोभूः' इति माघोक्तवत्। तद्वशेन हसन्तं हर्षातिशयानुभावं हासं कुर्वाणम्। अनेन उत्तरपादनिर्देक्ष्यमाणचाटुशतप्रस्तावोद्यतत्वं द्योत्यते, स्मितपूर्वभाषित्वस्य महापुरुषलक्षणत्वेन प्रसिद्धेः। सर्वमिदं मदनमनोरथभावितयेति पूर्वोक्तमनोरथविवरणपरतया सखीविस्रम्भातिशयसूचकं श्रीकृष्णविरहवेदनाविनोदनभेषजायमानतया जायमानं वचनमिति वेदितव्यम्। ईदृश्या मया सह ईदृशं केशिमथनं रमयेत्यन्वयः। ॥ १ ॥

प्रथमेति॥ हे सखि प्रथमसमागमे नूतनसंभोगे लज्जितया सञ्जातलज्जया मया। अत्र लज्जाविजये स्वस्या अशक्तिः। तया च तदनुकूलभावश्च भावीति व्यज्यते। तादृश्या मया सह। तं कीदृशम्----पटुभिः परहृदयावर्जनचतुरैः चाटूनां प्रियवचनानां शतैः अनुकूलमभिमतमित्यर्थः। अनेन तूवणीदि अ कदंवोदसणीओणकेवळ वि अविमणिदुदंखो सहि मेपि अवंळहो'इत्यादि विचार्योपवार्यत्वात् किमपि वक्तुकामत्वमात्मनः स्यादिति दर्शितम्। अत्र चाटुशतानां श्रीकृष्णकर्तृकत्वं बोध्यम्। न राधाकर्तृकत्वं शङ्क्यम्। अनुकूलत्वनिश्चायकत्वेन तच्चोपात्तं द्रष्टव्यम्। मनोरञ्जनचतुरैः प्रियालापैः प्रथमसंगमकालीनां मदीयां लज्जातिरस्करिणीमपनीय मया सह रन्तुमुत्साहित्वादनुकूलोऽयममेति निश्चेयमित्यर्थः। किञ्च, एवं निश्चित्य मृदु कोमळं मधुरं श्रुतिसुखदं तादृशे स्मितभाषिते मन्दहासवचने यस्यास्तादृश्या मया। यद्वा, मार्दवमाधुर्ये प्रत्येकमुभे अपि स्मितभाषितयोर्विशेषणे विगृह्यीते। मञ्जुळमनोज्ञस्मितभाषितयेत्यर्थः। अनेन लज्जायाः किमपि शैथिल्यं भावीति व्यज्यते। ततः पूर्वन्तु

'ह्रीसरिन्निजनिमज्जनोचितं मौलिदूरनमनं दधानया। द्वारि चित्रयुवतिश्रिया तया भर्तृहूतिशतमश्रुतीकृतम् ॥' इति श्रीहर्षोक्तरीत्या त्रपासरित्पूरदूरमग्नत्वं स्थितम्। चाटुशतपाटवेन त्रपापाकरणे किमपि क्रियमाणे स्मितभाषितयोरीषदाविर्भावे सति रतित्वरया स तु न सहेत इत्याह—शिथिलीकृतं जघनदुकूलं येन तम्। सत्वरमालिङ्ग्य नीवीश्लथनं कुर्वाणमित्यर्थः। अथवा, पुनरपि चाटुशतैरस्पृष्टगात्रमपि नीवीं शिथिलीकुर्वन्तमित्यर्थः। रागवृद्ध्या चित्तद्रवीभावे नीवीगळनस्यावश्यंभावित्वादिति भावः। एतादृशं केशिमथनं मया सह रमयेत्यन्वयः ॥ २ ॥

किसलयेति ॥ हे सखि किसलयशयनं पल्लवविरचितं शयनीयम्। कृष्णेन पूर्वमेवागत्य कल्पितमित्यर्थात्। तस्मिन् निवेशितया कृष्णेनैव करे गृहीत्वा स्थापितया। अनेन सविकारमिति पूर्वोक्तं तस्य स्वस्यामनुरागं विवृणोति। किञ्च, कृते कृष्णेनाचरिते परिरम्भणचुम्बने आलिङ्गनाधरास्वादने यस्यास्तया च मया कर्त्र्या परिरभ्य आश्लिष्य कृतं विहितमधरपानं यस्य तादृशम्। कृतपरिरम्भणचुम्बनया परिरभ्य कृताधरपानमिति द्वाभ्यां विशेषणाभ्यां द्वयोरप्यनुरागः सम इति ध्वन्यते। अपि च ममैवोरसि कुचमण्डलोपरि। अन्यगोपीविस्मरणपूर्वकमित्येवकारेण द्योत्यते। चिरं बहुकालं शयानं संविशन्तम्। सस्पृहपातितशरीरमिति यावत्। रतविशेषप्रस्तावाय समुद्यतमिति भावः। अनेन ममेव तस्यापि तस्मिन्निव मय्यपि विविधमनोरथप्रवृत्तिरस्त्येवेति व्यज्यते। ईदृशं तमेतादृश्या मया सह रमय ॥ ३ ॥

अलसेति ॥ हे सखि अलसं यथा भवति तथा निमीलिते मुकुळिते लोचने नयने यया तया। यद्वा, आलस्येन, आकुलचलालसादीनां धर्मे धर्मिणि च वृत्तेः। निमीलिते कूणिते रतिसुखवैवश्येन दरमुकुळितलोचने ययेति वा। किञ्च, श्रमजलेन स्वेदाम्भसा सकलं पूर्णं कळेबरं शरीरं यस्यास्तया। सर्वाङ्गीणसमुदितस्वेदकणयेत्यर्थः। अनेनाविर्भूतकामकलाप्रसरत्वमात्मनो ध्वन्यते। श्रमजलशकलकळेबरयेति पाठान्तरे श्रमजलानां शकलानि यस्मिन्निति व्यधिकरणबहुव्रीहिः। एवं विधया मया सह पुळकावल्या रोमहर्षपरम्परया ललितौ रम्यौ कपोलौ गण्डमण्डलौ यस्य तम्। अनेन सात्त्विकपूर्तिकमनीयता कृष्णस्य व्यञ्जिता। अत एव वरः प्रबलो यो मदनः तत्कृतो यश्च मदो दर्पः। अन्यवस्तुविस्मरणपूर्वकं प्रवृद्धसुरतसमुद्यम इति

यावत्। तस्माद्धेतोरतिलोलमतीव चञ्चलम्। तूष्णीमवस्थानासहिष्णुमित्यर्थः॥ सर्वाङ्गीणप्रसृमरसात्त्विकभावतया भावोदयपर्यन्तबहुविधसुरतव्यापारपारीणविचेष्टितमिति भावः। ईदृशं तमीदृश्या मया सह रमयेत्यन्वयः। सात्त्विकभावास्तु, 'स्तम्भ-प्रळयरोमाञ्चस्वेदा वैवर्ण्यवेपथू। अश्रुवैस्वर्यमित्यष्टौ सात्त्विकाः परिकीर्तिताः॥' इति लक्षिताः ॥ ४ ॥

कोकिलेति॥ हे सखि कोकिलानां पिकानाम्। 'वनप्रियः परभृतः कोकिलः पिक इत्यपि' इत्यमरः। कळरवाणां पारावतानाञ्च। 'पारावतः कळरवः कपोतः' इत्यमरः। कूजितमिव कूजितमव्यक्तशब्दो यस्यास्तया। अनेन स्वस्याः कामशास्त्रविहितरतिकूजितप्रावीण्यं सूच्यते। यदुक्तं रतिरहस्ये—'हुङ्कृतस्तनित-फूत्कृतादिकं सीत्कृतश्वसितरोदनानि च' इति। 'मुञ्च पीडय गृहाण जीवय त्राहि हा धिगिति सीत्कृतं विदुः। तच्च लावककपोतकोकिलाहंसनादसदृशा ह्युपक्रमाः॥ मिश्रितं प्रहणनैः प्रयुज्यते ह्यन्यथापि तमिष्यते बुधैः। ऊर्ध्वमुच्छ्वसितकण्ठनासिका-हुङ्कृतं स्तनितमभ्रवर्षवत्॥ वंशविस्फुटनवच्छटूत्कृतं फूत्कृतं बदरपातवज्जले।' इत्यादि। तथा वात्स्यायनीयसूत्रव्याख्यायां जयमङ्गलायामपि वेणोरिव पुरुषव्यापारेण ग्रन्थिस्थाने स्फुटक इति। बदरस्येवेति वृत्तगुळिकोपलक्षणार्थमित्यादि च व्याख्यातम्। तदनुसारेणेति मन्तव्यम्। किञ्च, श्लथानि शिथिलानि। अङ्गाङ्गमेळनालिङ्गनचुम्बनादिसमयसम्मर्दादीषत्स्रस्तानीत्यर्थः। तादृशानि यानि कुसुमानि पुष्पाणि पृथगलङ्कृतानि गर्भकादिदामगतानि च तैराकुला व्याप्ताः कुन्तळाः चिकुरा यस्यास्तया च मया। कुसुमाकुलाः कुन्तळाः श्लथा यस्या इति वा। तादृश्या मया सह। जितः अध्ययनार्थबोधप्रयोगदृष्टकर्मतादिभिरधीनीकृतो मनसिजतन्त्रस्य कामशास्त्रस्य विचारो विवेचनं येन तम्। अनेन पद्मिन्या-दिस्त्रीजातिचतुष्टयपरिज्ञानम्, तत्तदुचितपरिचरणनिपुणता, षोडशकामकलाकुशलता, द्रावस्तम्भकादिसाधनसकलौषधवेदित्वम्, मतान्तरे शशवृषाश्वसंज्ञितपुंजातित्रयहरिणी-वडवाहस्तिन्यात्मकस्त्रीजातित्रितयभेदादिकोविदत्वं च गोविन्दस्य प्रकाशितम्। किञ्च, अत एव नखैः करजैर्लिखितोऽङ्कितो घनो निबिडः स्तनभारः कुचमण्डलं येन तम्। 'ग्रीवापार्श्वोरुकक्षेषु कटिपृष्ठस्तनेषु च। संप्रयोगे प्रयुञ्जीत नखच्छेद्यानि योषिताम्॥' इति कामशास्त्रविध्यनुरोधेन कुचमण्डले कृतनखविलेखनमित्यर्थः। तादृशं केशि-मथनं तादृश्या मया सह रमयेत्यन्वयः ॥ ५ ॥

चरणेति॥ हे सखि चरणयोः पादयोः रणितौ रतिरभसव्यतिकर-वशेन शिञ्जानौ मणिनूपुरौ रत्नमयौ मञ्जीरौ यस्यास्तया। किञ्च, मुखरा रतिरण-

समये वाचाला अत एव विशृङ्खला अविनीता मेखला कनककाञ्ची यस्यास्तया च। अत्र चेतनधर्मस्य विशृङ्खलत्वस्याचेतनायां मेखलायामारोपेण तस्याः स्थानभ्रंशनं कृष्णकर्तृकं ध्वन्यते। मुखरत्वविशेषणात्तत्रात्मनोऽप्यभ्युपगमं सूचयन्ती पुरुषायितप्रक्रमं व्यञ्जयति। परिपूरितं साङ्गं प्रकटितं सुरतवितानं निधुवनविधिविस्तारो येन तम्। इदञ्च पूर्वोक्तपुरुषायितारम्भणव्यञ्जकम्। किञ्च, सकचग्रहं कचग्रहणसहितं चुम्बनदानं यस्य तम्। इदमपि विपरीतरतसुलभम्। पुरुषायितं हि पुंसां संप्रयोगसागरादमृतलाभः, 'वल्गत्कुचं व्याकुलकेशपाशं स्मितामृतस्यन्दिमुखेन्दुबिम्बम्। पुण्यातिरेकात् पुरुषा लभन्ते पुंभावमम्भोरुहलोचनायाः॥' इति प्रसिद्धेः। 'तन्व्या यत्सुरतान्ततान्तनयनं वक्त्रं रतिव्यत्यये तत्त्वां पातु चिराय किं हरिहरब्रह्मादिभिर्दैवतैः' इत्यमरुकवचनात्। 'कमपि स्मरकेळिं तं स्मर, यत्र भवन्निति मया विहितसम्बुद्धिः व्रीळिता स्मितवत्यसि' इति श्रीहर्षोक्तेश्च। ईदृश्या मया सह ईदृशं केशिमथनं रमय ॥ ६ ॥

एवं षड्भिः पादैर्बाह्यसुरतं सप्रपञ्चं सम्प्रकाश्य 'मनोरथानामगतिर्न विद्यते' इति न्यायेनाभ्यन्तरमशक्यवर्णनमप्यखिलहृदयसंवेद्यतया किञ्चिदनुसन्दधाति सप्तमपादेन—रतिसुखेति॥ हे सखि रतिस्सुरतं ततो यत्सुखमानन्दः तस्य यः समयः उदयकालः तत्र यो रसः सर्वोत्तीर्णतयास्वाद्यमानः क्षणिकताव्यतिरेकेण ब्रह्मानन्दादभिन्नश्चमत्कारविशेषः तेनानुभूतेनालसया। अनधीनसकलकरणयेत्यर्थः। किञ्च, अत एव निस्सहमवशं यथा भवति तथा निपतिता शय्यायामेव वा भगवदुरसि वा परिवर्तनाद्यनभिज्ञतया स्थिता तनुलता गात्रवल्लिर्यस्यास्तादृश्या मया सह उदितः उत्पन्नो मनोजः कामो यस्य सफलीभूतरिरंसतया सम्पूर्णसर्वमनोरथमन्यम्, अत एव दरमुकुलिते ईषत्कूणितपक्ष्ममाले नयनसरोजे सरोरुहसमाने नयने यस्य तादृशं मधुसूदनं पूर्वमेव मधुकैटभनाशनम् इदानीं केशिमथनं श्रीकृष्णरूपेण दृश्यमानं सर्वदा दुष्टनिग्रहशिष्टपरिपालनव्यग्रतया नित्यप्रत्यग्रजयलक्ष्मीसंवलनसमग्रसौभाग्यमस्मद्भाग्यभोग्यतां गतं श्रीकृष्णं रमय। रहस्यावयोर्घटने यथाकौशलं यतस्वेत्यर्थः। एवं सप्तभिः पादैस्साङ्गस्सम्भोगशृङ्गारः प्रधाननायिकामनोरथविषयत्वेनातिहृद्यतया वर्णितः। कृष्णविषयत्वमहिमपरिमळमांसळतया रागियोगिसाधारणोऽयं प्रबन्धसन्दर्भकल्पतरुस्तबकः कामकैवल्यात्मकपुरुषार्थद्वयाभेदरूपतया प्रतिपादितः सुकविनेति मन्तव्यम्। 'रत्यादिर्हृदि कारणोपजनितः कार्यैः प्रतीतिं गतः सम्पुष्टस्सहकारिभिर्जनयति स्थायी सुखं वाऽसुखम्। भावना-

मनुवर्णनानुकरणैः काव्येऽपि नाट्येऽपि वा व्यक्तोऽयन्तु निराश्रयः सुखकरः सङ्गी रसश्चर्वितः ॥' इति। रत्याकारान्तःकरणवृत्त्यभिव्यक्तं भावाद्याकारान्तःकरणवृत्ति तिरस्कृतावरणकं ब्रह्मैव तत् संविदानन्दमयमिति श्रीमदभिनवगुप्ताचार्यवर्यपारम्पर्योपदेशरहस्यस्य श्रद्धेयतायां प्रमाणमनुभव एव ॥ ७ ॥

अथेदं गीतमपि गातृश्रोतृसुखदत्वेनाशास्य भगवदर्पणत्वेन सङ्कल्पयति — श्रीजयदेवेति ॥ अतिशयमाधिक्यमस्यास्तीत्यतिशयम्। अर्श आद्यच्। सातिशयमित्यर्थः। एतादृशं मधुरिपुनिधुवनशीलं श्रीकृष्णसुरतस्वभाववर्णनं यत्र तादृम्। उत्कण्ठिता सुरते सञ्जातोत्कण्ठा विरहोत्कण्ठिताख्या च या राधिका राधा तया कथितं सखीं प्रति मनोरथरूपतया निवेदितमिदं गीतं श्रीजयदेवेन भणितम् उक्तं कर्तृ सलीलं कामशास्त्रप्रतिपादितलीलासहितं सुखमैहिकामुष्मिकरूपं परमानन्दं वितनोतु विस्तारयतु। गातृणां श्रोतृणां चेत्यर्थः। अथवा, सलीलं यथा भवति तथा उत्कण्ठितराधिकया कथितमिति कथनक्रियाविशेषणत्वेन योज्यम्। मधुरिपुनिधुवनशीलमिति गीतविशेषणत्वेन प्रतिपाद्यप्रतिपादकयोरभेदोपचारात्प्रयोगोऽवसेयः। अत्र राधाया विरहोत्कण्ठितत्वम्, 'चिरयत्यधिकं कान्ते विरहोत्कण्ठिता मता' इति लक्षणादवगन्तव्यम् ॥ ८ ॥

अथ सर्वसाधारणप्रणयत्वेऽपि सविधममुञ्चतीभिरन्याभिस्सह विहरन्तं केशिमथनमिहानेतुं कथमहं शक्नुयामिति सख्याः शङ्कां परिहर्तुं कार्यसौकर्यं व्यञ्जयन्ती श्लोकेनाह—हस्तस्रस्तेति ॥ हे सखि कानने वृन्दावने विहारदेशं प्रति रागादागतां मामुद्वीक्ष्य आलोक्य असाधारणप्रणयाया ममाभिप्रायपूरणावसरालाभादतिचाकित्यमुपेत्य हस्तात् स्रस्तो विगळितो विलासवंशो वल्लवीगणमनोमोहननादो वेणुर्मुरळीवाद्यं यस्य तादृशम्। अत एव अनृजुभ्रूवल्लिमतीनां वक्रीभूतचिल्लीलतानाम्। असूयानुभावोऽयम्। वल्लवीनां गोपीनां वृन्देन गणेन उत्सारिदृगन्तम् ऊर्ध्वप्रसारितनेत्रान्तं यथा तथा वीक्षितं दृष्टम्। अथवा परशुश्छिनत्तीतिवत् करणस्य कर्तृत्वविवक्षणादनृजुभ्रूवल्लिमतीनां वल्लवीनां वृन्दस्य उत्सारिभिरूर्ध्वं प्रसारिभिर्दृगन्तैर्नयनकोणैः कर्तृभिर्वीक्षितं दृष्टमित्यर्थः। किञ्च, अतिस्वेदेन भृशोदितन श्रमजलेनार्द्रे गण्डस्थले कपोलतले यस्य तम्। अपि च विलक्षितं सवैलक्ष्यं यत् स्मितं मन्दहसितं तदेव या सुधा नयनामृतं तया मुग्धमतीव मोहनमाननं मुखं यस्य तम्। व्रजसुन्दरीगणैर्वल्लवाङ्गनासमूहैर्वृतं परिवारितं

गोविन्दं श्रीकृष्णमहं पश्यामि। तदानीमेवं दृष्टं तमिदानीमपि मनसा विलोकयामि तत एव हृष्यामि हर्षं प्राप्नोमि च। अत्र हस्ताद्भ्रंशनाळस्रंसनमतिस्वेदोदयो विलक्षितस्मितञ्च श्रीकृष्णस्य साधारणप्रणयव्रजसुन्दरीगणमध्ये असाधारणानुरागाया मम दर्शनाद्भयावेशं सूचयन्ति। तच्च भयं मयि निरतिशयेन बहुमानेन जनितम्, स च बहुमानो मम स्वविषयाभिलाषपरिपोषादितत्त्वबोधनिष्पादित इति सर्वं विचार्य निश्चितं मयेति भावः॥ अतो मन्मनोरथघटनाय यतमनायास्तव नातिप्रयासेन भाव्यमिति प्रत्याय्यते। गोविन्दं व्रजसुन्दरीगणवृतं पश्यामि हृष्यामि च इत्यनेन, यदि त्वं मदिष्टघटनाय प्रयासि, तदानीमसहायाया अपि मे प्रियविरहवेदना सुसहेति ध्वन्यते। अत्र छेकानुप्रासस्वभावोक्त्योः संसृष्टिः। वृत्तं शार्दूलविक्रीडितम्। तल्लक्षणमुक्तञ्च ॥ ३ ॥

अथ सख्यै स्वोक्तस्यार्थस्याकरणे प्रत्यवायञ्च प्रकाशयति—दुरालोकेति॥ हे सखि यदि त्वं मन्मनोरथसङ्घटने मनागप्युपेक्षसे तदा मम प्रियविरहवेदना दुस्सहैव। यतो ममैव दुःखाय मयैव पूर्वं बहूनि वस्तूनि संपादितानि तेष्वयं, दुरालोकाः दुर्दर्शाः द्रष्टुमशक्या इत्यर्थः। तादृशाः स्तोका अल्पाश्च ये स्तबका गुच्छास्तैर्नवका नूतना। नवशब्दात् स्वार्थे कः। तादृशी यः अशोकलतिका कङ्केळितरुशाखा। 'समे शाखालते' इत्यमरः। तस्या विकासः कुसुमोद्गमः व्यथयति मां दुनोति। न केवलं स एवैकः, अपि तु कासारोपवने सरस्समीपोद्याने यः पवनः सोऽपि व्यथयति। अपि अपि चेत्यर्थः। चूतानां सहकाराणामियं दृश्यमाना मुकुळप्रसूतिः कुड्मळोत्पत्तिर्न सुखयति। कीदृशी—भ्राम्यन्तीनां भ्रमणमितस्ततः कुर्वतीनां भृङ्गीणां भ्रमरीणां रणितैः झङ्कारैः रमणीया रम्या। रम्यत्वमेव मदनोद्दीपकत्वादिदानीं दुःखकारणं सम्पन्नमिति भावः। किञ्च, शिखरिणी। 'शिरोऽग्रं शिखरम्' इत्यमरः। प्रशंसार्थे इनिः। प्रशस्ताग्रेत्यर्थः। अग्रस्य च प्राशस्त्यमनिलचकितस्तबकगळितकुसुमरजःपटलपरितापितपथिकत्वम्। तदुक्तं माघे—'स्मरहुताशनमर्मरचूर्णतां दधुरिवाम्रवणस्य रजःकणाः। निपतिताः परितः पथिकव्रजानुपरिते परितो पुरतो भृशम्॥' इति। ईदृशी चूतानामियं मुकुळप्रसूतिः न सुखयति। दुःखयतीत्यर्थः। सरःसविधे मयैव समीचीनमुद्यानं निर्मितम्। तत्र च सर्वे कुसुमतरवो

लताश्चारोपिताः। सकलमपीदममिंसंहिताय सुखाय न कल्पते। अपि तु श्रीकृष्णविरहदूनाया मम मर्माविध एव सर्वे सन्तीत्यहो दैववैलोम्यमप्रतीकार्यमिति यावत्। अतो मदुक्तार्थघटनाय त्वरस्वेति तात्पर्यम्। अत्रापि छेकानुप्रासः। शिखरिणीति वृत्तनामकथनञ्च वैचित्र्यार्थं कविना कृतमित्यवसेयम्। 'रसै रुद्रैश्छिन्ना यमनसभलाः गः शिखरिणी' ॥ ४ ॥

अथ कविः अमुं सर्गं समापयिषुः सहृदयान् प्रत्याशिषं प्रयुङ्क्ते— साकूतेति॥ नवो नूतनः लम्बिततारुण्यो॰ज्ज्वलाङ्गः केशवः भगवान् श्रीकृष्णः वः क्लेशं हरतु युष्माकं मत्प्रबन्धगातृश्रोतॄणामविद्यास्मितारागद्वेषमृत्युभयात्मकं मायाविजृम्भितं तापं संहरतु। नवत्वञ्चास्य 'वीक्ष्य रन्तुं मनश्चक्रे योगमायामुपाश्रितः' इति श्रीभागवते सूचितम्। 'अचलोद्धरणादिभिर्विलासैरतिलोकैरतिवाह्य बालभावम्। अनुवर्तितुमैच्छदम्बुजाक्षो वनितानन्दविधायिनीमवस्थाम्॥' इति श्रीकृष्णविलासे प्रकाशितं कविना दर्शितमित्यवगन्तव्यम्। पुनः कीदृश इत्याह— गोपीनां वल्लवीनाम् अन्तः अन्तःकरणं कर्मभूतं निभृतं गूढं यथा भवति तथा निरीक्ष्य दृष्ट्वा गमिता यापिता आकाङ्क्षा अभिलाषो येन तादृशः। फलितवल्लवीजनकाङ्क्षितार्थ इत्यर्थः। वल्लवीनां मनोगतमर्थं स्वयमेव दृष्ट्वा तासां सर्वमपि मनोरथं साधयित्वा स्वयं कृतार्थ इति यावत्। गोपीनामन्तर्गतस्य निरीक्षणक्षमतां विशेषणैराह—साकूतं साभिप्रायं स्मितं मन्दहासो येन। आकुलाकुलमत्यन्तविवशं यथा तथा गळन्तः शिथिलीभवन्तो धम्मिल्लाः संयताः कचा येन। उल्लासिता ऊर्ध्वप्रचारिता भ्रुवयो येन। अळीकेन कपटेन अन्यप्रवृत्तिव्याजेन दर्शितं भुजामूलयोः कक्षयोरर्धं हस्तौ स्तनौ च येन। भुजामूलार्धहस्तस्तनमिति प्राण्यङ्गत्वादेकवद्भावः। 'आकारैरिङ्गितैर्गत्या चेष्टया भाषितेन च। वक्त्रनेत्रविकारैश्च गृह्यतेऽन्तर्गतं मनः॥' इति वचनादीदृशैरनेकैराकारैरिङ्गितादिभिश्च तासां मनोरथं सम्यगेवावगम्य 'कृत्वा तावन्तमात्मानं यावतीर्गोपयोषितः' इति श्रीभागवतप्रतिपादितेन प्रकारेण सर्वासामपि वल्लवीनां रिरंसां सम्पूर्य स्वयं कृतकृत्यस्सन् पुनरेकस्या असाधारणानुरागाया मानिन्याः स्वसमीपात् क्वचिदन्यत्र गताया राधायाः प्रीणनस्यावशिष्टत्वात्तदुपायं चिरं चिन्तयन्मुग्धानां सुन्दरीणामपि मनोहरः मन्मथमन्मथ इति मुनिवचनानुसारेण, 'यत्त्रैलोक्यमहीयसोऽपि महितं सम्मोहनं मोहनात् कान्तं कान्तिनिधानतोऽपि मधुरं माधुर्यधुर्यादपि। सौन्दर्योत्तरतोऽपि सुन्दरतरं त्वद्रूपमाश्चर्यतोऽप्याश्चर्यं भुवने न कस्य कुतुकं पुष्णाति

विष्णो विभो ॥' इति नारायणीयवचनानुरोधेन च सर्वमोहनमूर्तिः केशवो वः क्लेशं हरत्विति सर्गसमाप्तिसमुचितया आशिषा चिरं चिन्तयन्नित्युत्तरसर्गप्रतिपाद्यार्थबिन्दुरप्युपक्षिप्त इति सर्वं शिवमेवेत्यवगन्तव्यम् ॥ ५ ॥

इति श्रीगीतगोविन्द इत्यादि ॥ राधावर्जमन्यासां गोपीनामनुगृहीतत्वात् कृतकृत्यम्मन्यतया क्लेशरहितः केशवो यस्मिन् सोऽक्लेशकेशवः इत्यन्वर्थस्य सर्गस्य संज्ञा वेदितव्या ॥

इति श्रीमदखिलविद्यापरिवारश्रीदक्षिणामूर्तिमहादेवलब्धवेदविद्यावैशद्यपूर्वोत्तर-
मीमांसाशब्दतर्कसाहित्यसार्वभौमकोण्डुभट्टोपाध्यायानुजन्मना
सर्वाम्बिकागर्भशुक्तिमुक्तामणिना लक्ष्मीधरसूरिणा
विरचितायां श्रीगीतगोविन्दव्याख्यायां
श्रुतिरञ्जिन्याख्यायामक्लेशकेशवसंज्ञित-
द्वितीयसर्गसर्गसौष्ठवविमर्शः ॥

तृतीयः सर्गः

मुग्धमधुसूदनः

गीतम् ॥ ७ ॥

अथ पूर्वसर्गान्तोपक्षिप्तं श्रीकृष्णचिन्ताप्रकारं प्रपञ्चयितुमारभते— कंसारिरपीति ॥ कंसारिः श्रीकृष्णोऽपि। राधा यथा श्रीकृष्णविरहखिन्ना सख्यै निजमनोरथं निवेद्य रहसि क्वचिल्लतागृहे न्यवात्सीत्, तथैव श्रीकृष्णोऽपीत्यपिशब्दः समुच्चिनोति। अथवा, कंसादिघातकत्वेन कृतावतार इवान्यैः प्रतीयमानः परमात्मापीति वा। स्वस्य निर्लेपत्वेऽपि परप्रत्यायकतयाङ्गीकृतस्य संसारस्य जननादेर्वासनादिभिरध्यासप्रकारैर्बद्धा निर्मिता शृङ्खला निगळो यस्य तादृशः सन्। अस्वतन्त्राङ्गत्वसम्पादकत्वादतिदृढत्वाच्च संसारवासनानां निगळसमवायिकारणत्वं समारोपितम्। तदारोपस्य शाब्दत्वेऽपि ममतायाः शृङ्खलात्वारोपस्यार्थत्वादेकदेशविवर्तिरूपकमिदम्। राधां हृदये आधाय कृत्वा व्रजसुन्दरीस्तत्याज। अन्या वल्लवीरत्याक्षीदित्यर्थः। असाधारणानुरागायां मयि साधारणप्रणयोऽयमिति कुपितामनुक्त्वा प्रस्थितां राधामेव चिन्तयन् सर्वा गोपीस्त्यक्तवानिति भावः। फलोन्मुखराधाभागधेयपरिपाकसमाकृष्टत्वादिति शेषः। वृत्तमिदमानुष्टुभम्। 'युजोर्जनसरिद्भर्तुः पथ्यावक्त्रं समीरितम्' इति लक्षणात् पथ्यावक्त्रसंज्ञितम् ॥ १ ॥

अन्यवल्लवीत्यागादनन्तरकृत्यमाह—इतस्तत इति ॥ सः माधवः कृतः प्राप्तः अनुतापः मय्यकृत्रिमानुरागां मत्प्रणयिनीं राधां मयि कुपितां प्रस्थितां क्वचितिरोहितामेतावतापि कालेन नालोचितवानस्मीति पश्चात्तापो येन तादृशः। किञ्च, अनङ्गस्य कामस्य ये बाणा अरविन्दाशोकादयः पञ्च सायकास्तैर्यानि व्रणानि क्षतानि। 'तृतीया तत्कृते'त्यादिना समासः। तैः खिन्नं दुःखितं मानसं मनो यस्य तादृशश्च सन्। तदुक्तम्—'अप्रत्यक्षो देहश्चापो बाणोऽपि पुष्पनिष्पन्नः। जीवा मधुभृतजीवाश्शिव शिव कुसुमास्त्रसमरसन्नाहः ॥' इति। अत एव तादृशपश्चात्तापनिवृत्तये तां राधिकामितस्ततोऽनुसृत्य अन्विष्य। क्वचिदपि तामदृष्ट्वा श्रमाकुलस्सन्निति शेषः। कलिन्दनन्दिन्या यमुनायास्तटान्तकुञ्जे तीरसमीपलतागृहे निषसाद

निषीदति स्म । राधैव राधिकेति स्वार्थे कः । 'प्रत्ययस्थात् कात् पूर्वस्यात इदाप्यसुपः' इति अत इत्त्वम् । वृत्तमिदं वंशस्थम् । 'जतौ तु वंशस्थमुदीरितं जरौ' इति तल्लक्षणम् ॥ २ ॥

निप्रसाद माधव इत्युक्तप्रकारमभिनेतुं गीतमाह— मामिति ॥ गुर्ज्जरीरागेणेति । तत्रायमभिप्रायः । गुण्डक्रियोपस्थानानन्तरं तत्सपत्न्या एवोपस्थापनं युक्तमिति । अथवा, कवेः प्रियत्वाद्वा तदुपस्थापनम् । रूपकताळेनेति । तल्लक्षणन्तु 'द्रुतद्वयन्तं विरामान्तं रूपकं परिकीर्तितम्' इति । अत्र हरीत्यारभ्य कुपितेवेत्यन्तं ध्रुवपदम् । इयं राधा वधूनिचयेन वल्लवीवृन्देन वृतं परिवृतं मां विलोक्य दृष्ट्वा चलिता मत्समीपं परित्यज्यान्यत्र प्रस्थिता । वधूनिचयावृतत्वरूपेणापराधेन सह वर्तत इति सापराधः तस्य भावस्तत्ता । तया हेतुना । अतिभयेन अत्यन्तभयशालिना मयापि न वारिता न गन्तव्यं त्वया मत्समीपादिति न निरुद्धा । अपराधदर्शनकुपितजनप्रसादनस्यापराधिनैव प्रायशः कर्तुमशक्यत्वादिति भावः । हृतः अपगमितः तत्तादृशः आदरो बहुमतिर्यस्यास्तस्या भावस्तत्ता, तया । 'त्वतलोर्गुणवचनस्य पुंवद्भावो वक्तव्यः' इति पुंवद्भावः । तया हेतुना कुपितेव कोपवतीव । वस्तुतस्तु मयि तस्याः कोपो नास्त्येवेति भावः । सा गता सा राधा अनुचितकारिणं मामनादृत्य तादृशस्थास्य पुरतोऽवस्थानमनुचितमित्यन्यत्र प्रयातवती । तद्गमनजनितखेदद्योतक हरि हरीति । द्विरुक्तोऽयं शब्दः खेदसंभ्रमादिद्योतकः । प्रयोगोऽयं लोकव्यवहारानुकारीति केचित् । अव्ययगणे पठित इत्यपरे । व्याकरणान्तरसिद्ध इत्यन्ये । वयन्तु ब्रूमः, 'मिदेर्गुणः' इति ज्ञापकात् संज्ञापूर्वकविधेरनित्यत्वात ह्रस्वस्य गुणः इति गुणो नात्र । किन्तु, 'एङ् ह्रस्वात् संबुद्धेः' इति संबुद्धिलोपस्त्वस्त्येव । अतो हरिशब्दसंबुद्धिरियं द्विरुक्तेति । हरति संसारमुपासकानामिति हरिशब्दः परं ब्रह्म प्रतिपादयति । 'सकृदुच्चरितं येन हरिरित्यक्षरद्वयम् । बद्धः परिकरस्तेन मोक्षाय गमनं प्रति ॥' इति प्रसिद्धेरिदं खेदसंभ्रमहर्षविस्मयादिपूच्चारितमैहिकामुष्मिकसुखदमिति ॥ १ ॥

किमिति ॥ सा राधिका चिरं चिरकालं विरहेण मद्वियोगेन हेतुना किं कार्यं करिष्यति विरहवेदनामसहमाना विषपानोद्बन्धनादिना प्राणत्यागं वा विधास्यति । किं वदिष्यति प्राणसमां मां परित्यज्य निष्करुणहृदयः कृष्णः क वर्तते इत्यादि मां मत्सयिष्यति वा । सर्वथा तामपश्यतो मम धनेन गोधनेन किं फलम् । जनेन स्निग्धबन्धुजनेन वा किम् । सुखेन सुखसाधनेन पदार्थान्तरेण रमणीयवस्तुताम्बूल-

सुगन्धानुलेपनादिना वा किम्। गृहेण भवनादिना वा किम्। न किमपि फल-मित्यर्थः। कृतानुताप इति पूर्वोक्तस्य प्रपञ्च एवायम् ॥ २ ॥

चिन्तयामीति ॥ कोपभरेण कोपातिशयेन 'अतिशयो भरः' इत्यमरः। कुटिले वक्राकारे भ्रुवौ यस्मिंस्तत्। मदुपेक्षाजनितकोपातिशयवक्रितभ्रूयुगमित्यर्थः। तादृशं तस्या आननं मुखम् अहं चिन्तयामि स्मरामि। किमिव—उपरि ऊर्ध्वभागे भ्रमता सञ्चरता भ्रमरेण भृङ्गेण आकुलं व्याप्तं शोणपद्मम् अरुणकमलमिव। अतो-पमालङ्कारः। भावोदयश्च ॥ ३ ॥

अथ विरहातुरस्तन्मार्गणाय पुनरपि प्रस्थातुकामः प्रतिनिवृत्य सोन्मादवदाह—तामहमिति ॥ अहं हृदि सङ्गतां हृदयस्थितां तां राधिकामनिशं सर्वदा भृशं रमयामि अत्यर्थं प्रसादयामि। वने तां किं किमर्थमनुसरामि अन्वेषयामि। हृदयस्थितायास्तस्या वनेऽन्वेषणं ग्रीवास्थग्रैवेयकस्य कासारजले मार्गणवत परिहासा-स्पदमेवेति भावः। इह वने किं किमर्थं वृथा निष्प्रयोजनं विलपामि परिदेवयामि। बाह्यसंभोगादान्तरसंभोगस्य श्लाघ्यत्वम् 'अहमिहैव वसन्नपि तावकस्त्वमयि तत्र वसन्नपि मामकः। न वपुषोर्घटनं प्रियसंगमो हृदयसंगम एव हि संगमः॥' इत्यादिभिः प्रसिद्धमिति भावः ॥ ४ ॥

एवं निश्चित्य हृदयस्थितां राधां प्रसादयितुं सल्लपति—तन्वीति ॥ तन्वि हे राधे कुतः कस्मात् कारणाद्गतासि मां परित्यज्यान्यत्र गतवत्यसि। तत्कारणमहं न वेद्मि न जाने। तव हृदयमसूयया खिन्नम् ईर्ष्यया दुःखितम्। न तु मत्कृते-नापराधेन दुःखितमित्यहमाकलयामि निश्चिनोमि। तेन तादृशेन निश्चयेन हेतुना ते तुभ्यं त्वां प्रसादयितुम्। 'तुमर्थाच्च भाववचनात्' इति सम्प्रदानत्वम्। अहं नानुनयामि न सान्त्वयामि। सह्यर्षिभिः सह गुणाभ्यधिकैर्दुरासम्' इति माघोक्तरीत्या असूयाया अनुनयाद्यसाध्यत्वादनुनयनैष्फल्यमनुचिन्तयन्नहं तवानुनयं न कृतवान-स्मीत्ययमपराधो ममाप्यनुमत एवेत्यर्थः ॥ ५ ॥

अथ तांच्चिन्तयातादूप्यमिति न्यायेन 'प्रासादे सा पथि पथि च सा पृष्ठ-तस्सा पुरस्सा पर्यङ्के सा दिशि दिशि च सा तद्वियोगाकुलस्य ॥' इति प्राचां वाचोयुक्तिमनुसृत्यानुनयति—दृश्यस इति ॥ हे तन्वि राधे त्वं मया दृश्यसे इतस्ततोऽन्विष्य कथञ्चिदिदानीं दृष्टासि। अथ त्वं मे पुरतः अग्रभागे गता-

गतं गमनागमनं विदधास्येव करोष्येव। पुरेव प्राग्वत् ससंभ्रमं यथा तथा परिरम्भणमाश्लेषं न ददासि। तत् किं कस्मात्कारणात्। इतः पूर्वं मम पुरतस्त्वं तदा तदा गतागतं कृतवत्यसि। विजने परिरम्भणञ्च दत्तवत्यसि। इदानीन्तु मत्पुरोभागे गतागतं विदधासि। परिरम्भणन्तु न ददासि च। तत् किं कस्मात् कारणात्। तत्कारणं न वेद्मीति पूर्वस्मादनुषङ्गः ॥ ६ ॥

अथ 'सेव्यो जनश्च कुपितः कथञ्च दासो निरपराधः' इति कालिदासोक्तिमनुसृत्यात्मनः सापराधत्वमभ्युपगम्यार्थयते—**क्षम्यतमिति** ॥ हे राधे क्षम्यतां मत्कृतापराधः सर्वोऽपि त्वया सह्यताम् अशङ्कमपराधं कृत्वा क्षम्यतामित्युक्ते कथं क्षम्यत इत्याशङ्क्याह—हे सुन्दरि अहं कदापि इत ऊर्ध्वं सकृदपीदृशमीदृक्प्रकारमपरमन्यम्। अपराधमिति शेषः। तव त्वत्सम्बद्धे वस्तुनि। त्वद्विषय इत्यर्थः। न करोमि नाचरामि। यद्येवं सर्वं मया क्षान्तमेव। किं पुनस्ते मया कार्यमित्याशङ्कायामाह—हे सुन्दरि अनवद्यहृद्यगात्रि राधे त्वं मम दर्शनं देहि त्वद्रूपसौन्दर्यदर्शनं मम प्रयच्छ। भ्रान्तिदर्शनस्य मध्ये तिरोहितत्वादेवमुक्तिरिति मन्तव्यम्। सन्त्यन्यास्सुन्दर्यस्तवानुकूलाः, केवलाया दुश्शीलाया मम दर्शनं किमिति प्रार्थ्यत इत्याह—मन्मथेन यथार्थसंज्ञेनामुना कामेन हेतुना अहं दुनोमि परितप्ये। स च परितापो मम सर्वाङ्गीणस्त्वयैकया केवलमपनेतुं शक्यः, नान्याभिरिति भावः ॥ ७ ॥

वर्णितमिति ॥ प्रवणेन प्रह्वेन। हरिभक्तेनेत्यर्थः। तिन्दुबिल्व इति जयदेवकवेर्जन्मदेशस्य संज्ञेति केचित्। तद्वंशस्येत्यपरे। स एव वैपुल्यात्समुद्रः। तस्मात्संभवतीति तत्संभवः। तादृशो रोहिणीरमणश्चन्द्रः। चन्द्रो यथा स्वजन्मस्थानसमुद्रोल्लासकरः तद्वदयमपीति स्ववंशोल्लासक इति भावः। एवं विशेषणद्वयविशिष्टेन जयदेवकेन। निरहङ्कारत्वद्योतनायाल्पार्थे कः। अथवा, स्वार्थे कः। हरेरिदं वर्णितम्। चरितमिति शेषः। तच्च गातॄणां श्रोतॄणाञ्च भुक्तिमुक्तिसुखदं भूयादित्यभिप्रायः ॥ ८ ॥

एवं गीतेन राधानुसन्धानद्वारा मन्मथेन दुनोमीति प्रसङ्गे मूर्तं प्रहर्तुमुद्यतं मन्मथमग्रतो दृश्यमानं मन्यमानस्तदुद्यमञ्च भ्रान्तिमूलं निश्चिन्वानस्तस्मै तत्त्वं निवेदयति श्लोकेन—**कुवलयेति** ॥ पाठभेदेन हृदि विलसतेति प्रथमपादः, कुवलयदळेति द्वितीयपाठश्च केषाञ्चित्। हे अनङ्ग कामदेव। संबुद्धिरियं

हरे शरप्रहारस्यावश्यकार्यत्वद्योतनार्थम् । तेनैव तस्याङ्गहीनत्ववैलक्षण्यापादनात् । अत एव प्रहरणनिवृत्तिप्रार्थनायाश्चोपपत्तिः। हृदि मम वक्षसि अयं दृश्यमानः पदार्थः भुजङ्गमनायको हारो न भवति । किन्तु बिसलताहारः विरहतापनिवृत्त्यर्थं धृता मृणाळमाला। कण्ठे या परिदृश्यते सा गरळद्युतिः कवळितकाळकूट-काळिमा न भवति। किन्तु कुवलयदळश्रेणी विरहतापशान्तये धृता नीलोत्पल-दळपङ्क्तिः। यत् पुनस्सर्वाङ्गीणतया विलिप्तं दृश्यते, तदपि भस्म भसितं न भवति । परन्तु मलयरजः तापापनोदनार्थश्चन्दनाङ्गरागः । यतस्तत्त्वमेवं, ततो हेतोः प्रियारहिते प्रियतमाविरहसन्तप्ते मयि मद्विषये त्वं हरभ्रान्त्या हरो महादेवोऽयमिति भ्रमान्न प्रहरं बाणान्मा मुचः । क्रुधा हरविषयया रुषा किमु किमर्थं धावसि मदभिमुखं वेगादभिगच्छसि । प्रहर्तव्यबुद्ध्या अप्रहर्तव्यं प्रति शरप्रहरणाद्धनुष्मतामकीर्तिरेव स्यात्, न वीरलोकाभिमान इति भावः। धावसीति सर्वेर्धावादेशः। अत्र भुजङ्गत्वादिनिषेधेन बिसलतान्व-साधनेन अपह्नुत्यलङ्कारः, । 'विषयं यन्निषिध्यान्यत्साध्यते सा त्वपह्नुतिः' इति लक्षणात्। तया भ्रान्तिमदलङ्कारोत्थितया सङ्करः काव्यलिङ्गसंसृष्टः ॥ ३ ॥

ननु नाहं हरभ्रान्त्या त्वामभिपतामि, त्वामेव विजिगीषुः प्रजिहीर्षामीति तदुक्तिमाशङ्क्य, तर्हीदं विष्टपेषनिर्विशेषमित्याह — पाणाविति ॥ क्रीडया लीलया । अनायासेनेत्यर्थः। निर्जितं वशीकृतं विश्वं जगद्येन तस्य संबुद्धिः। लीलोचितैरेव पदार्थैर्जगज्जयित्वात्त्वदन्यो वीरो जगति नास्तीति भावः। तदुक्तं रतिरहस्ये—'परिजनपदे भृङ्गश्रेणी पिकाः पटुबन्दिनो हिमकरसितच्छत्रं मत्तद्विपो मलयानिलः। कृशतनुधनुर्वल्ली लीलाकटाक्षशरावली मनसिजमहाराजस्योच्चैर्जयन्ति जगज्जितः ॥' इति। इदं हेतुगर्भं विशेषणम्। क्रीडानिर्जितविश्व हे मनसिज कामदेव त्वं मद्विषये अमुं चूतसायकं सहकारकोरकरूपं शरं पाणौ मा कुरु। हस्तेन तूणान्नोद्धर। चापमिक्षुमयं मा आरोपय नाधिज्यं कुरु। मूर्छित-जनानां निश्चेष्टानां मादृशानामाघातेन प्रहारेण किं पौरुषं कियान् पुरुषकारः। न किमपीत्यर्थः। जगज्जितो महावीरस्य तव पौरुषहानिरेव स्यादनेनेति भावः। ननु प्रकृतिस्थस्य ते कथं मूर्छितत्वमित्याशङ्कायामाह---मृगया मृगाङ्गनाया दृशाविव दृशौ यस्याः सा तथा। तादृश्यास्तस्या राधाया एव प्रेङ्खन्तः प्रसरन्तो ये कटाक्षा अपाङ्गास्तेषामेवाशुगानां शराणां याः श्रेण्य आवलयस्ताभिः कर्त्रीभि-र्जर्जरितं शकलीकृतं मे मनो मानसमद्यापि इदानीमपि जर्जरीभावप्राप्तिसमयमारभ्य

बहुन्तरव्यापिनि वर्तमानकालेऽपि मनागपि ईषदपि। किमुत साकल्येनेति शेषः। न सन्धुक्ष्यते न समाधीयते। विशीर्णकीर्णानामवयवानां मेळनरूपं समाधानमत्र सन्धुक्षणशब्देन लक्ष्यते। दहनदग्धखण्डितशीर्णकीर्णेन्धनशकल-सन्धानं धुक्षतेर्मुख्यार्थः। तद्बाधेन तत्सम्बन्धरूपपूर्वावस्थाप्राप्तिफलकेन समाधा-तार्थेनात्र लक्ष्यार्थः कल्पनीयः। समाधानलेशहीनं शकलीभूतमन्मन एव शराणां लक्ष्यम्। तत्र त्विदानीं शरप्रहारः पिष्टपेषकल्प एवेति भावः। अत्र रूपको-पमाकाव्यलिङ्गसंसृष्टिः। वृत्तं शार्दूलविक्रीडितम्। पूर्वश्लोके हरिणीवृत्तम्। तयोर्लक्षणं पूर्वमेवोक्तम् ॥ १ ॥

अथ सङ्कल्पसन्निधापितां प्रियामेवोपालभते—भ्रूचाप इति ॥ हे तन्वि राधे भ्रूचापे भ्रूलतारूपे कार्मुके निहितो न्यस्तः कटाक्षविशिखस्त्वदपाङ्गरूपो बाणः मम मर्मव्यथां मर्मवेदनां निर्मातु करोतु। विशिखप्रयोगस्य मर्मभेदनफलत्वान्नात्र खेद इति भावः। किञ्च, श्यामात्मा नीलवर्णमूर्तिः मलिनमनाश्च कुटिलः ऊर्मिमान्। 'ऊर्मिमत् कुञ्चितं नतम्' इत्यमरः। वक्रमनाश्च एतादृशः कबरी-भारः त्वत्केशभारोऽपि मारोद्यमं मारणोद्योगं करोतु। 'मारो मारणम्' इति ण्यन्ताद्धञ्। अथवा, मारस्य कामस्य, उद्यमं मम मर्मव्यथाकरणे साहायक-मित्यर्थः। लोके हि यो मलिनमनाः कुटिलस्वभावश्च, स एवं कुर्यादेव। ततो नेदमतिखेदावहमिति भावः। अपि च, हे तन्वि अयं परिदृश्यमानो रागवान् अरुणरूपवान् अनुरागवांश्च यस्तव बिम्बाधरः बिम्बकल्पोऽधरः दन्तच्छदः। बिम्बाधर इति मध्यमपदलोपी समासः। गत्यन्तराभावात् प्रयोगबाहुल्याच्च। यदुक्तं वामनेन—'बिम्बाधरवृत्तौ मध्यमपदलोपः स्यात्' इति। मोहमज्ञानम्। विवेकराहित्यमिति यावत्। तावदिति वाक्यालङ्कारे। तनुतां विधत्ताम्। लोके हि यो बुद्धिनाशको रोगी च सः परं व्यामोहयेदेव। तच्च तत्स्वभावसिद्धत्वान्न खेदकरमिति भावः। अत्र बिम्बाया बुद्धिनाशकतया तत्फलकल्पस्याधरस्यापि मोहसम्पादकत्वं युक्तमेव। 'सद्यो बुद्धिहरा बिम्बा सद्यो मतिकरी वचा' इति वचनादिति यावत्। बिम्बशब्दस्य फलपरत्वेऽपि स्त्रीत्वं 'छायायां बिम्बक-फले' इत्यभिधानाद्बोध्यम्। हे तन्वि सर्वमेतत्सङ्गतमेव। किन्तु, सत् विद्यमानं वृत्तं वर्तुलाकारत्वं यस्य सतां विदुषां वृत्तमिव वृत्तं चरित्रं यस्य स च सद्वृत्तः तादृशोऽयं तव स्तनमण्डलः स्तनभारो मम प्राणैः करणभूतैः क्रीडति लीलां करोति। सदाचारस्य पुरुषस्य परप्राणव्याकुलीकरणमयुक्ततरमेवेति

भावः। अत्राद्यपादे मर्मव्यथानिर्माणे चापनिहितशरत्वारोपात् कटाक्षस्य तद्धेतुकत्वाच्च रूपकोत्थापितं काव्यलिङ्गम्। द्वितीयतृतीयपादयोस्तु श्यामात्मा कुटिल इति रागवानिति च श्लेषोत्थापितं काव्यलिङ्गम्। बिम्बाधर इत्युपमाभेदः। चतुर्थपादे सद्वृत्त इति श्लेषः। असत्पुरुषकृत्यरूपविरूपकार्यकरणाद्विषमालङ्कारभेदः। 'विरूपकार्यस्योत्पत्तिरत्रानर्थस्य वा भवेत्। विरूपघटना चासौ विषमालङ्कृतिस्त्रिधा ॥' इति लक्षणात्। एषां यथायोगं संसृष्टिसङ्करौ द्रष्टव्यौ। सङ्करलक्षणन्तु, 'क्षीरनीरनयाद्यत्र सम्बन्धः स्यात् परस्परम्। अलङ्कृतीनामेतासां सङ्करः स उदाहृतः॥' इति ॥ ५ ॥

अथ विरहवेदनानिदानं विमृशन् स्वयमेवाह --- तानीति ॥ सहसंभोगकाले यानि स्पर्शसुखानि आलिङ्गनजन्यानि सौख्यानि, इदानीमपि तान्येव भावनयानुभूयन्ते। तरळाश्चञ्चलस्वभावाः स्निग्धाश्च 'स्निग्धं तद्यस्य विषयः स्वप्रभामिळितो भवेत्' इति लक्षिताश्च ये दृशोर्नेत्रयोर्विभ्रमा विलासाः प्रत्यक्षदर्शनकालीनास्ते च त एवाधुना भावनागोचराः, यत् पुरा सामीप्ये साक्षादनुभूतचरं वक्त्राम्बुजस्य मुखपद्मस्य सौरभं सुगन्धप्राचुर्यम्, तदपि तादृशमेवाद्यानुस्मार्यते। सुधास्यन्दी अमृतधारावर्षी या गिरां वाचां वक्रिमा वक्रत्वम्। हृदयाकर्षणपाटवमिति यावत्। स च स एव सम्प्रति भाति। अनुभूतपूर्वा बिम्बाधरस्य माधुरी च या सैव साम्प्रतं सङ्कल्पेन सन्निधापिता सतृष्णमास्वाद्यते। इति विषयासङ्गे एवमीदृशे विरहकालेऽपि बाह्येन्द्रियाणां पञ्चानामपि स्वस्वविषयसमुत्थापनं विधाय तदनुग्राहि मम मानसं स्वयमपि तस्यां राधायामेवादृश्यमानायामपि लग्नः आसक्तः समाधिः सङ्कल्पसंगमो यस्य तादृशं भवति चेद्विरहव्याधिर्विरहवेदनारूपो व्याधिर्महामयः कथं वर्तते केन प्रकारेण भवति हन्त। विरहामयनिवर्तकस्य कथितविषयपञ्चकरूपौषधयोगस्य सेवने सादरमनन्यपरतया क्रियमाणेऽपि विरहामयानिवर्तनं कष्टमिति भावः। अत्र विशेषोक्तिरलङ्कारः। 'कार्याजनिर्विशेषोक्तिः सति पुष्कलकारणे।' इति लक्षणात्। विषयासङ्गे सति समाधिसंभवस्य विरुद्धत्वं विषयाणां तदङ्गरूपत्वेन समाहितत्वमिति विरुद्धाभासत्वाद्विरोधालङ्कारश्च। वक्त्राम्बुजसौरभमिति रूपकम्। बिम्बाधरेत्युपमा। समाधिसंभवे रोगासंभवस्य विरुद्धता विरहस्वभावतया समाहितेत्यन्यो विरोधालङ्कारः। आधेर्व्याधित्वारोपादन्यरूपकम्। वियोगिनः स्वस्य विशेषणसाम्याद्योगिव्यवहारसमारोपात्समासोक्तिश्चेत्यमितालङ्कारमञ्जूषिकायितोऽयं श्लोको वेदितव्यः। सुधा-

स्यन्दीति 'सुप्यजातौ' इति णिनिः। वक्रिमेति पृथ्व्यादिपाठादिमनिच्। माधुरीति ब्राह्मणादित्वात् ष्यञ्। पित्वाङ्ङीप्। वृत्तं शार्दूलविक्रीडितम्। ॥ ६ ॥

अथ राधायाः स्वस्य विरहव्यथाविशेषाधायित्वे हेतुत्वेन मदनजैत्रास्त्र-न्यासभूमित्वमाह—भ्रूवल्लरीति[1] ॥ भ्रूवल्लरी चिल्लीलता सैव धनुश्चापः अपाङ्ग-तरङ्गितानि कटाक्षप्रसरा एव बाणाः शराः श्रवणपालिः कर्णशष्कुली सैव गुणः मौर्वी। सङ्कोच्य वर्तुलीकृता मौर्वीति मन्तव्यम्। कर्णशष्कुल्यास्तादृशाकार-त्वादारोपोऽयम्। इति एवंप्रकाराणि। इयन्तीत्यर्थः। निर्जितानि वशीकृतानि जगन्ति त्रयो लोकाः यैस्तान्यस्त्राणि आयुधानि कर्मभूतानि स्मरेण कामेन कर्त्रा अस्यां राधायामर्पितानि किम्। कीदृश्याम्—अनङ्गजयजङ्गमदेवतायाम् अनङ्गस्य तस्य कामस्य जये विजये जङ्गमदेवतायां जङ्गमायां देवतायाम्। प्रतिमायामित्यर्थः। यथा लोके कश्चित् पुमान् परदेवतामासेव्य तत्प्रसाद-लब्धैरायुधैर्लोकं जयति, जित्वा च तान्यायुधानि पुनः प्रतिमारूपिण्यै परदेव-ताया एव प्रत्यर्पयति, तथा स्मरोऽपि कृतवान्। परदेवताप्रतिमा तु तस्येयं जङ्गमेति विशेष इति यावत्। अत्र सावयवं व्यस्तरूपकं व्यतिरेकसंसृष्टमुत्प्रेक्षाङ्ग-मिति सङ्करः। तदलङ्कृतो वस्तुध्वनिर्मदनो लोकत्रयवीर इति। अनङ्गजय-जङ्गमदेवताया अस्या अनुग्रहात्। अनेन नित्यब्रह्मचार्यपि अहमेवमवशोऽ-स्मीत्यनुरणनरूपो ध्वनिश्च ॥ ७ ॥

अथ कविः सर्गमिमं समापयिषुः सर्गसंज्ञागर्भिणीं रासक्रीडासमयवृत्तं श्रीकृष्णराधाविषयमेव चरितविशेषं विप्रलम्भशृङ्गाराङ्गतया प्रकाशयन्तीमाशिष-माह—तिर्यगिति ॥ तिरश्चा तिर्यगञ्चता 'स तिर्यङ्यस्तिरोऽञ्चति' इत्यमरः। कण्ठेन हेतुना विलोलश्चञ्चलो यो मौलिः केशबन्धः तस्मिन् तरळो विलोलो बर्ह-मालामय उत्तंसः शेखरो यस्य तादृशस्य मधुसूदनस्य श्रीकृष्णस्य मधुरे मनोज्ञतरे राधामुखेन्दौ राधाया वदनचन्द्रे विषये मृदुस्पन्दं यथा भवति तथा कन्दलिताः प्ररूढाः। श्रीकृष्णमुखादुद्भूय राधामुखेन्दुं प्रति सञ्चरन्त इति यावत्। कटाक्षोर्मयः ऊर्मिवन्मुहुरुदयिनः कटाक्षा इत्यर्थः। वो युष्मभ्यं मत्प्रबन्धगाथा-श्रोतृभ्यश्चिरं बहुकालभावि क्षेमं कुशलम्। 'कुशलं क्षेममस्त्रियाम्' इत्यमरः। ददतु वितरन्तु। कीदृशाः सम्मुग्धाः सम्यङ्मुग्धाः मनोहराः। पुनः कीदृशाः—वंशाद्वेणुनाळादुच्चरन्त्या उद्गच्छन्त्या गीतेर्ग्रामरागस्य स्थानेषु त्रिषु षड्जर्षभगान्धाररूपेषु कृतमवधानं चैतकाग्र्यं याभिस्तादृशीनां ललनानामन्यवल्ल-

1. इदं पद्यं पाणौ मा कुरु इति पद्यस्यानन्तरं मुद्रितपुस्तके। भ्रूवल्लरीत्यस्य स्थाने भ्रूपल्लवमिति च तत्र पाठः

वीनां लक्षैः। समूहैरिति यावत्। न संलक्षिता अदृष्टाः। अत्र तिर्यक्कण्ठेति विलोलमौलीति तरळोत्तंसस्येति एकस्मिन् पादे तिस्रः स्वभावोक्तयः। गीतिस्थानकृतावधानललनालक्षैर्न संलक्षिता इति श्रोतृस्वभावोक्तिः। मृदुस्पन्दं कोमळप्रसरं यथा तथेति सानुरागकटाक्षस्वभावोक्तिरिति स्वभावोक्तिमाला वेदितव्या। मुखेन्दौ कटाक्षोर्मयः इति रूपकं सावयवम्। तच्च पूर्णेन्दोस्समुद्रतरङ्गाणाञ्चान्योन्याभिमुख्यमिवात्र राधामुखमाधवनयनाभिमुख्यमित्युपमाव्यञ्जकम्। अतोऽलङ्कारेणालङ्कारध्वनिः। शाब्दश्चालङ्कारश्छेकानुप्रास इति शिवम् ॥ ८ ॥

इति श्रीगीतगोविन्द इति पूर्ववत्। मुग्धो रागिवत् कृत्याकृत्यमौढ्यमापन्नो मधुसूदनः श्रीकृष्णोऽस्मिन्नित्यन्वर्था सर्गसंज्ञा। त्रयाणां पूरणस्तृतीयः। 'त्रेस्संप्रसारणञ्च' इति तीयप्रत्यः सम्प्रसारणञ्च ॥

इत्यखिलविद्यापरिवारश्रीमद्दक्षिणामूर्तिमहादेवप्रसादलब्धसाङ्गवेदपूर्वोत्तरमीमांसाशब्द-
तर्कसाहित्यसार्वभौमचरकुरुकोण्डुभट्टमहोपाध्यायानुजेन सर्वाम्बिकागर्भशुक्तिमुक्ता-
मणिना लक्ष्मीधरसूरिणा विरचितायां गीतगोविन्दव्याख्यायां
श्रुतिरञ्जिनीसमाख्यायां मुग्धमधुसूदनाख्यः
तृतीयसर्गभावार्थविमर्शः

चतुर्थः सर्गः ।

स्निग्धमधुसूदनः ।

गीतम् ॥ ८ ॥

अथ कविर्द्वितीयसर्गोक्ताया राधाव्यथायास्तृतीयसर्गाविष्कृतायाः श्रीकृष्णव्यथायाश्चान्योन्यबोधनाय सखी प्राप्तेति श्लोकेनाह—यमुनेति ॥ राधिकाया राधायाः सखी यमुनातीरे कालिन्दीतटे यद्वानीरनिकुञ्जं वञ्चुळलतागृहं तस्मिन् मन्दं यथा तथा आस्थितम् आसीनम् प्रेमभरेण राधाविषयेण स्नेहातिशयेन उद्भ्रान्तम् इतस्ततस्तामन्विष्यादृष्ट्वा श्रमेण तत्र तत्र तिष्ठन्तं माधवं श्रीकृष्णं प्राह उक्तवती। आहेति भूते प्रमादो णलन्तभ्रमादिति वामनोक्त्यां सत्यामपि प्रयोगबाहुळ्यात् । आस आह इत्यव्ययं तिङन्तप्रतिरूपकमिति केचित् । श्लोकोऽयमानुष्टुभः । ॥ १ ॥

अथ सखी राधाया विरहसन्तापं श्रीकृष्णाय निवेदयति गीतेन—निन्दतीति ॥ कर्णाटरागेण गीयत इत्युक्तम्। तत्रायमभिप्रायः। 'कृपाणपाणिर्गजदन्तपत्रमेकं वहन् दक्षिणकर्णपूरम् । संस्तूयमानः सुरचारणौघैः कर्णाटरागः शिखिनीलकण्ठः ॥' एतेन तस्य रूपं ध्यात्वा तेन रागेणेदं गीतं गातव्यमिति । एकताळेन वाद्यत इति । तल्लक्षणं पूर्वमुक्तम् । अत्र सा विरह इत्यारभ्य लीनेत्यन्तं ध्रुवपदम् । तत् प्रथमं व्याख्यायते । हे माधव श्रीकृष्ण तव विरहे वियोगे सति दीना क्षीणा सा मनसिजस्य कामस्य विशिखेभ्यः शरेभ्यः भयादिव । 'भीत्रार्थानां भयहेतुः' इत्यपादानसंज्ञायां 'अपादाने पञ्चमी' इति विशिखशब्दात् पञ्चमी । पञ्चसंख्यत्वात् 'बहुषु बहुवचनम्' इति बहुवचनम् । तच्च 'पञ्चमी भयेन' इति समासे तिरोहितम् । अत्र हेतूत्प्रेक्षा । भावनया अनुसन्धानेन त्वयि लीना मदनशरलक्ष्यभूतेन मनसा सह त्वामनुप्रविष्टा । वर्तत इति शेषः । एवं त्वय्येव लीनचित्ता सती शरीरमात्रेण तत्र स्थित्वा पूर्ववासनया यानि कान्यपि चेष्टितानि करोति, तान्यपि त्वदेकविषयाण्येवेति शिष्टैः पादैः सप्तभिः प्रतिपादयति —— निन्दतीत्यादि । चन्दनं पाटीरद्रवं निन्दति कुत्सयति । णिदि कुत्सायाम् । मया तस्यास्सर्वाङ्गीणं तापमपनेतुमुद्दिश्य हिमाम्बुपङ्किलीकृतं प्रतिमुहुस्तदङ्गे विलिप्यमानं मलयजरसं सा दूषयति । हे सखि त्वयेदमियन्तं कालं चुल्यामारोप्य क्वथितं वा, सम्यगातपे निहितं वा समा-

हृत्य मदङ्गेषु लिप्यते इत्यादयः कुत्सनप्रकाराः कथं निवेद्यन्तामिति भावः। इन्दुकिरणं चन्द्रमयूखम् अनु लक्षीकृत्य अधीरं यथा भवति तथा खेदं विन्दति दुःखं लभते। अविद्यमाना धीरा यथा भवन्ति, तथेति वा खेदप्राप्तिक्रिया विशेष्यते। ततश्च स्निग्धसखीनां परिचारिकाणाञ्च अहो अत्याहितमिति यथा महद्भयमुदेति तथा खेदं प्राप्नोति। 'लीना वल्लीभवनकुहरे पत्ररन्ध्राच्चकोरी चञ्चुत्रस्तं शशिकरकणं वीक्ष्य मूर्छामुपैति' इतिवत्। किञ्च, मलयसमीरं विषमिव कलयति मनुते। 'क्ष्वेळस्तु गरळं विषम्' इत्यमरः। तत्र हेतुमपि स्वयं वदति—व्याळनिलयमिळनेन, चन्दनतरुषु भुजङ्गास्सर्वदा वसन्तीति प्रसिद्ध्या व्याळनिलयाश्चन्दनतरवस्तैर्मिळनमस्त्यस्य मलयानिलस्य। मिळनं मेळनं सम्पर्क इत्यर्थः। भुजङ्गवेष्टितचन्दनद्रुमपरिचयवशाद्गरळमयोऽयमिति वाचोयुक्त्या मलयवायुं दूरतः परिहरतीत्यर्थः। हे माधव तव विरहे दीना सा राधा एवमेवञ्च करोतीत्यन्वयः। अत्र मलयसमीरस्य विषमेवेत्यध्यवसितत्वादतिशयोक्तिः। 'अध्यवसाये व्यापारप्राधान्ये उत्प्रेक्षा, अध्यवसितप्राधान्ये त्वतिशयोक्तिः' इत्यलङ्कारसूत्रात्। द्विविधश्चानुप्रासः ॥ १ ॥

अविरळेति ॥ हे माधव सा राधा अविरळमनल्पं यथा भवति तथा निपतितात् स्वशरीरे नितरां पतितात् मदनशरादिति जातावेकवचनम्। कामबाणेभ्यः सकाशादिति भीत्रार्थानामित्यपादानत्वम्। भवतः निजहृदयदेशे निरन्तरावस्थितस्यावनाय त्राणाय इव विशालं विस्तृतम्। 'वेः शालच्शङ्कटचौ' इति शालच्। वर्मकरणौचित्याभिप्रायगर्भविशेषणम्। सजलानां जलकणान्वितानां नळिनीदळानां पद्मिनीपलाशानां जालं समूहं स्वहृदयमर्मणि निजोरसि वर्म कवचं करोति। अत्र हेतूत्प्रेक्षया राधायाः स्वात्मापेक्षया तवैव रक्षणीयत्वबुद्धिरित्यलङ्कारेण वस्तुध्वनिः ॥ २ ॥

कुसुमेति ॥ हे माधव सा राधिका कुसुमशयनीयं प्रसूनतल्पं मया कल्पितं पुनः स्वयमेव अनल्पविलासकलाभिः बहळविभ्रमशिल्पैः कमनीयं स्पृहणीयम्। विरचय्य इति शेषः। तत् कुसुमविशिखशरतल्पं करोति। अहमिदानीं मदनशरतल्पे शयितास्मीति सङ्कल्प्य तत्र शेते। कामस्य पुष्पबाणत्वात्तच्छरतल्पत्वं कुसुमशयनीयस्य वास्तवमेव। तत्र शयने क्रियमाणे महती वेदना विरहाग्न्युदीपकत्वाद्भवति च। सा तया सह्यत एव। किमर्थमित्यत्राह—तव परिरम्भः आश्लेषः तेन यत्सुखं तदाप्तुं व्रतमिवेत्युत्प्रेक्षा। व्रतानामसिधारा-

शरशय्याशयनादीनां दुःखरूपत्वेऽपि पुनरुदर्कसुखत्वात्, परित्यागे चावकीर्णित्वात् परितापः सह्यत इति भावः। 'क्लेशन्तु धीरा सुखतः प्रवृत्तं भाविप्रियावाप्तिरसात् सहन्ते' इति वचनादित्यभिप्रायः। अत्र व्रतिव्यवहारारोपात्समासोक्तिः ॥ ३ ॥

वहतीति ॥ हे माधव सा राधा उदारमत्यन्तदर्शनीयतया ख्यातमानन-कमलं मुखपद्मं विगळितलोचनजलभरं निर्यदश्रुधारं वहति बिभर्ति च। अथापि तदुदाग्मेव भवतीति यावत्। तदुक्तं माघे — 'रुरुदिषा वदनाम्बुरुहश्रियस्सुतनु सत्यमलङ्करणाय ते। तदपि सम्प्रति सन्निहिते मधावधिगमं धिगमङ्गळ-मश्रुणः ॥' इति। काळिदासश्च, 'किमिव हि मधुराणां मण्डनं नाकृतीनाम्' इति। अत्रोपमामाह — विधुन्तुदो राहुः। 'सैंहिकेयो विधुन्तुदः' इत्यमरः। 'विध्वरुषोस्तुदः' इति, 'खशि खित्यनव्ययस्य' इति मुम्। विकटः क्रूरो यो विधुन्तुदः तस्य दन्तदळनात् दंष्ट्राभिः खण्डनात् गळिताः निर्यत्यः अमृतधारा यस्मात्तादृशं विधुं पार्विकेन्दुमिम। शोच्यदशाप्राप्तावपि प्रियदर्शनत्वं सामान्यधर्मः उदारमि-त्यनेन दर्शित इति पूर्णोपमेयम्। अश्रुपीयुषधारयोर्बिम्बप्रतिबिम्बभावाच्च। तथा च सर्वपालकेन दीनानुकम्पिना त्वया त्वद्विरहदीना सा किन्नानुग्राह्येति वस्तु ध्वन्यते ॥ ४ ॥

विलिखतीति ॥ हे माधव सा राधा रहसि विविक्ते। रहोवृत्तेष्वेव वर्ण्यमानेषु। पुना रहसीत्युक्त्या प्रियसखीं मामपि वञ्चयित्वेति द्योत्यते। कुरङ्ग-मदेन कस्तूरिकया असमशरभूतं कोटिकन्दर्पसुन्दरं भवन्तं विलिखति। क्वचित् फलक इति शेषः। लिखितस्य रूपस्याधोदेशे मकरं महाझषम्। लिखित-मिति शेषः। करे लिखितस्य रूपस्य पाणौ नवं नूतनजातं चूतं सहकारकोरकं शरञ्च विनिधाय प्रणमति नमस्करोति। सर्वमिदं मामपि शोचयित्वा करोतीति तस्या अभिप्रायः प्रायो मया निरचायि च। स च कामोपालम्भरूपः साहसपर्यव-सायी। हे कन्दर्प किमिति त्वमतीव दृप्यसि। त्वत्तः कोटिगुणं सौन्दर्यं मत्प्रियस्य विद्यते। किञ्च, तेन जैत्रोऽयं केतुः पातितस्ते पादे लगति। त्वं त्वेतत् किमप्यजानन् मामतीव बाधसे च। तव मद्बाधनेनैव धन्यम्मन्यत्वं यदि, गृहाणामोघं नवचूतशरम्, निगृहाण माम्, भवतु ते चरितार्थतेति। मयै-वमालोचितम्। तदेव वान्यद्वा तदाकूतमिति त्वयैव मतिमता विमृश्यतामिति भावः। अयञ्चार्थः, 'काचिद्बाला रमणवसतिं प्रेषयन्ती करण्डं तन्मूले सा निभृतमलिखद्व्या-ळमस्योपरिष्टात्। गौरीकान्तं पवनतनयं चम्पकं चात्र भावं पृच्छत्यार्यानुपरि-

धिषणान्मल्लिनाथः कवीद्रः ॥' इत्यादिवत् कविचातुर्यकल्पितः सरससहृदयजनमनस्कारचमत्कारातिशयकारीति ज्ञेयम्। ईदृशेन च भावार्थेन स्वतः सुकुमाराङ्ग्यपि दुस्सहत्वद्विरहसन्तापदीनापि सर्वोत्तरत्वद्गुणपक्षपाताज्जीवितनैराश्याच्च न सा विश्वविजयिनमपि मदनं मनागपि बहुमन्यत इति वस्तुना वस्तुध्वनिः॥ ५॥

प्रतिपदमिति ॥ हे माधव सा राधा न केवलं मदनरूपं त्वां प्रणमति, अपि तु प्रतिपदं प्रतिव्यवसितिं। 'पदं व्यवसितित्राणस्थानलक्ष्माङ्घ्रिवस्तुषु' इत्यमरः वीप्सायामव्ययीभावः। स्थानासनशयनचङ्क्रमणादिष्वनवस्थितिलक्षणाया अरतेरुद्दीपनविभावैर्मन्दानिलेन्दुकिरणादिभिरापादितोदयत्वाद्व्यवसितीनामप्यनेकत्वं वीप्सया व्यज्यते। प्रतिकाललवं स्थानाशनशयनाद्युद्यमेषु प्रत्येकमिदं वक्ष्यमाणं वचनमपि निगदति ब्रूते। इदंपदार्थं विवृणोति — हे माधव। राधोक्तिरियम्। भुवनहिताय मधुकुलाविर्भूत हे श्रीकृष्ण अहं तव चरणे पतिता अनन्यशरणतया केवलं त्वत्पादारविन्दमेव शरणं गता। तादृश्यां दास्यामस्याम्मदनाहितायामापदीयमुदासीनता सर्वभूतानुकम्पिनस्ते न युक्तेति भावः। अतोऽहमीदृशी त्वरितमनुग्राह्येति यावत्। अकरणे प्रत्यवायञ्च सोपपत्तिकं वक्ति — त्वयि महानुभावे भवति मयि मद्विषये विमुखे अन्यानुग्रहवैयग्र्यादविदितमदीयमदनकदने मदनुग्रहधुरापराङ्मुखे सति सपदि तत्क्षणमेव। न तु कालान्तरे। सुधानिधिरपि चन्द्रोऽपि। अपिस्समुच्चयेऽनुक्तानां चन्दनमन्दानिलकोकिलादीनाम्। तनोर्विरहतापशोषितत्वात्कृशायास्तनोर्मदीयशरीरस्य। तन्लोपात्तत्वात्तनुशब्देनार्थद्वयक्रोडीकारोऽवगन्तव्यः। दाहं भस्मावशेषतां तनुते कुरुते। अत्र देहदाहकरणरूपस्य कार्यस्य यत् प्रसिद्धं कारणम्, तदभावस्य सुधानिधिपदेनोक्तत्वाद्विभावना वा, मृतसञ्जीवनेऽपि समर्थोऽयम्, किं पुनस्तत्पनिर्वापण इत्यर्थापत्त्यलङ्कारोत्थापकस्य सुधानिधिशब्दस्य तत्कार्यानुदयस्तनुदाहकरणात्मकेन वैधर्म्येण प्रतिपादित इति विशेषोक्तिर्वालङ्कार इति साधकबाधकप्रमाणाभावात्तयोस्सन्देहसङ्कर इत्यादिबहुविमृष्टव्यसत्तायामपि ग्रन्थविस्तारभयाद्विरम्यते ॥ ६ ॥

ध्यानलयेनेति ॥ हे माधव सा राधा ध्यानलयेन। ध्यानं नाम सप्तमं योगाङ्गम्। तत्स्वरूपन्तु सजातीयविजातीयतिरस्काररराहित्येन धिय एकस्मिन्नेव वस्तुनि धारावाहितया प्रवर्तनम्। तेन शीलितेन जायमानो यो लयः ध्येयतादात्म्याधिगमः तेन हेतुना भवन्तं पुरः परिकल्प्य अग्रभागे प्रत्यक्षतया दृष्ट्वा।

'उपदिशति कामिनीनां यौवनमद एव ललितानि' इतिवदनभ्यस्तयोगानामपि कामिनामीदृशध्यानपाटवोपदेशदेशिको मदन एवेति व्यज्यते। ननु प्रत्यक्षत एव द्रष्टुं शक्ये मयि स्थिते कुतो ध्यानलयेन पुरोऽनुसन्धानमिति चेदत्राह—अतीव दुरापमिति। अन्यासां बह्वीनामधीनत्वान्मया रहसि द्रष्टुमिष्टं विज्ञापयितुञ्च प्रयासे कृतेऽपि न लब्ध इति विचार्यातिदुर्लभं त्वां ध्यानलयेन पुरतः स्थितं कल्पयित्वेत्यर्थः। एवं पुरतः परिकल्प्य किं पुनः करोतीत्याशङ्कायां बह्वीश्चेष्टाः करोतीति पञ्चचेष्टाप्रकाशनद्वारा बोधयति—प्रथमत एव विलपति। परिदेवनं करोति। 'विलापः परिदेवनम्'' इत्यमरः। तच्च, 'माधम तव चरणे पतिताहम्' इत्याद्येवेत्यवगन्तव्यम्। हसति विलापानुपदं भवतः प्रसादसौमुख्यसामवाक्याद्यनुसन्धानजनितहर्षा हसति। प्रसन्नवदना भूत्वा हासं करोति। तवौदासीन्यमनुसन्धाय विषीदति विषादमुपैति। पुनस्तवादर्शनमनुकल्प्य रोदिति अश्रूणि मुञ्चति। पुनश्चलति अदृष्ट्वा त्वामन्वेष्टुमत इतो भ्रमति। पुनर्ध्यानलयेन पुरस्त्वां दृष्टं सङ्कल्प्य तापं विरहसन्तापं मुञ्चति त्यजति क्षणमात्रं सुखेनावतिष्ठते। अत्र विलापादीनामनेकासां क्रियाणां कर्त्र्या एकस्या एव राधाया दुःखितसुखिताद्यौपम्यस्येवाद्यनुपादानाद्गम्यत्वेन प्रस्तुताप्रस्तुतविषयतया च प्रतिपादनाद्दीपकालङ्कारभेदः। 'प्रस्तुताप्रस्तुतानाञ्च सम्यक्सामान्यधर्मतः। औपम्यं गम्यते यत्र तद्दीपकमुदाहृतम्॥' इति लक्षितस्य दीपकस्य दीपयति प्रकाशयति बहूनर्थानित्यन्वर्थता। तच्चादिदीपकं मध्यदीपकमन्तदीपकमिति त्रिविविधम्। प्रत्येकं पुनर्द्विविधम्। एकस्याः क्रियाया अनेककर्तृगामित्वादेकस्य कर्तुरनेकक्रियायोगित्वाच्च। तेषु च 'तृष्णां छिन्धि भज क्षमां जहि मदं पापे रतिं मा कृथास्सत्यं ब्रूह्यनुयाहि साधुचरितं सेवस्व विद्वज्जनम्। मान्यान् मानय विद्विषोऽप्यनुनय प्रख्यापय प्रश्रयं कीर्तिं पालय दुःखिते कुरु दयामेतत्सतां लक्षणम्॥' इतिवदनेकक्रियाणामेककर्तृकत्वरूपमिदम्। अन्यत्तु, 'नागो भाति मदेन' इत्यादिषु द्रष्टव्यम् ॥ ७॥

श्रीजयदेवेति॥ हे जनाः हरेः श्रीकृष्णस्य विरहेण वियोगेन सन्तापेन आकुलाया वल्लवयुवतेः गोपस्त्रियो राधायास्सख्या वचनं श्रीजयदेवेन कविना भणितमिदं गीतरूपेण जातं नटनीयं यदि नटनमभिनयः तस्मै हितं यदि मनसा अनन्यपरेण चित्तेन पठनीयं पठितुं शक्यम्। युष्माभिरिति शेषः। सङ्गीताभ्यासरहितैरपीदं गातुं शक्यम्, तालरागयोरनतिगहनत्वादिति भावः ॥ ८॥

अथ सखी प्रकारान्तरेणापि राधाया दशां कृष्णाय निवेदयति श्लोकेन—आवास इति ॥ हे माधव श्रीकृष्ण त्वद्विरहेण तव वियोगेन तस्या आवासः वासस्थानं विपिनायते विपिनमरण्यमिवाचरति। 'कर्तुः क्यङ् सलोपश्च' इति क्यङि 'अकृत्सार्वधातुकयोर्दीर्घः' इति दीर्घः। एवं सर्वत्र प्रक्रिया द्रष्टव्या। त्वद्विरहेणेत्यस्य सर्वत्रान्वयः। प्रियसखीनां माला पङ्क्तिः जालायते जालमानाय इवाचरति। अत्यन्तान्तरङ्गत्वप्रदर्शनाय प्रियग्रहणम्। अपिः समुच्चये। तापः विरहजनितोऽङ्गतापः निश्वसितेन चिन्ताद्युपोद्बलितेन श्वासवातेन सुहृदा सह दावदहनस्य वनवह्नेर्ज्वालाकलापः अर्चिष्पटलः इवाचरति। सा राधापि हरिणीरूपं मृगीकाय इवाचरति। हन्त कष्टम्। सकलगुणसम्पन्नायास्तस्याः कामादेवंविधा दशा जातेति खेदः प्रकाश्यते। एवं मृगयासामग्र्यां सत्यां मृगयुमपि समुचितमुपस्थापयति—कन्दर्पः कामोऽपि तस्यामकारणविरचितमारणसमुद्यमत्वात् शार्दूलो व्याघ्रः तस्य विक्रीडितं विलासं विरचयन् सन् यमायते यम इवाचरति। मृग्या यमो व्याधः। स चादृश्यतया स्थित्वा शरैः प्रहृत्य तां सुखेन व्यापादयितुमुद्युङ्क्ते। हा कथमसावेवंविधामापदमवाप्ता साध्वीति खेदातिशयो व्यज्यते। अत्र क्यङ्भिरौपम्यप्रतीतेरुपमाभेदः। शार्दूलविक्रीडितसंज्ञास्य वृत्तस्येति सूचनाच्च कविचातुर्यं बोद्धव्यम्। 'सूर्याश्वैर्मसजस्ततास्सगुरवश्शार्दूलविक्रीडितम्' इति लक्षणम् ॥ २ ॥

॥ गीतम् ९ ॥

अथ सखी पुनरपि राधाया विरहदुर्दशां गीतान्तरेण श्रीकृष्णाय कथयति—स्तनविनिहितेति ॥ देशाक्षीरागेणेति। तत्रायमभिप्रायः—स्त्रीरागा मितेष्वपि सन्तीति। 'देशेषु प्रणिहितदृष्टिरिष्टमात्रा केशेषु प्रणिहितगर्भका प्रगल्भा। काशाभस्मितरुचिभासुरारुणोष्ठी देशाक्षी दिनमुखहर्षुलाम्बुजास्या ॥' इति तदनुसन्धानविधिः। रूपकतालेनेति। तल्लक्षणं प्रागुक्तम्। राधिकेत्यादि केशवेत्यन्तं ध्रुवपदम्। हे केशव तव विरहे सा राधिका स्तनविनिहितं हारमपि अतिभारं मनुते। तत्र हेतुः—कृशा विरहतापशुष्का तनुर्यस्यास्तादृशी सती भवच्चित्तानुरञ्जनप्रयोजनस्य हारधारणस्य नैरर्थक्यं भवद्विरहे मन्वाना स्तनविनिहितमस्माभिस्तस्या हृदयतापशान्तये कुचयोरुपरि न्यस्तमुदारं मूल्याधिकं सन्तापशान्तिदानशौण्डञ्च। 'उदारो महति ख्याते दानशौण्डविदग्धयोः' इत्यभिधानात्। ईदृशं हारमतिभारं मनुते दुर्वहोऽयं भारो निष्फल इति निश्चि-

नोति। निरस्यति चेति शेषः। तस्याः कृशतनुत्वान्नायं दोष इत्यस्माभिस्तूष्णीं स्थीयते चेति भावः। अपिशब्देन हारस्याप्यतिभरत्वेन मनने किं वक्तव्यमितरेषामतिगुरूणां भूषणानामधारणमित्यर्थापत्तिरलङ्कारः प्रकाशितः ॥ १ ॥

सरसेति ॥ हे केशव तव विरहे राधिका सरसं रसेन द्रवीभावेन सह वर्तमानं हिमजलार्द्रमत एव मसृणं स्निग्धं मलयजपङ्कं चन्दनकर्दमम्। अपिर्विरोधद्योतकः। वपुषि विषमिव सशङ्कं सभयं पश्यति आलोचयति। अत्रोपमालङ्कारः ॥ २ ॥

श्वसितपवनमिति ॥ हे केशव राधिका तव विरहे अनुपमपरिणाहम् अनुपमोऽन्यविलक्षणः परिणाहो विशालता यस्य तादृशं सर्वाङ्गीणदैर्घ्यं श्वसितपवनं निश्वासवातं सदाहमूष्मळं यथा भवति तथा वहति धत्ते। किमिव—मदनदहनमिव कामाग्निमिव। अत्राप्युपमा ॥ ३ ॥

दिशि दिशीति ॥ हे केशव राधिका तव विरहे विगळितनाळमिव नयननळिनं नयनरूपं पद्मं दिशि दिशि किरति सर्वासु दिक्षु विक्षिपति। विगळितं भ्रष्टं नाळं मृणाळं यस्मात्तादृशम्। नाळशब्दस्त्रिलिङ्गः। नाळो नाळी नाळा नाळमिति। स्त्रियान्तु टाप् ङीप् च। अत उभयथा रूपम्। अत एव'मृदुत्वमप्रौढमृणाळनाळया' इति श्रीहर्षः। इह तु नाळशब्देन नाळीति स्त्रीलिङ्गतया बोद्धव्यम्। अतो ळडयोरभेदान्नाडीति सिरापर्यायतया ग्राह्यम्। 'द्वे पादमध्ये पृथुसन्निवेशे सिरे गते ते बहुधा च नेत्रे। ता म्रक्षणोद्वर्तनलेपनादीन् पादप्रयुक्तान् नयनं नयन्ति ॥' इति वाग्भटः। एवंभूतसिराद्वयाश्रयं नयनं तस्मात्सिराद्वयाद्भ्रष्टमिव भवति। प्रतिमुहुः प्रतिदिशं त्वदागमनदिदृक्षया तत्र प्रक्षिपति। एतद्द्रष्ट्रीणामस्माकं त्रुटितमृणाळवृन्तबन्धनपद्मारोधनवद्भातीत्यर्थः। नयनस्य नळिनौपम्यं विशेषणेनाप्याह— जलकणा अश्रुबिन्दवस्तैस्सहितम्। पद्मपक्षे जलकणा एव। तत्साहित्येनाम्ळानशोभा प्रत्याय्यते। अत्र श्लेषानुगृहीतं रूपकमलङ्कारः। 'उपमैव तिरोभूतभेदा रूपकमिष्यते' इत्युपमापर्यवसायित्वं चास्य प्रसिद्धम्। दिशि दिशि किरतीत्यनेनौत्सुक्यातिशयव्यक्तेर्भावध्वनिः ॥ ४ ॥

नयनेति ॥ हे केशव तव विरहे राधिका किसलयतल्पं पल्लवशयनीयम् मया रचितमिति शेषः। विहितः इन्धनयोजनेन दीपितो यो हुताशनः पावकः

तत्कल्पं तत्समं कलयति मनुते। कीदृशम्—नयनविषयमपि प्रत्यक्षदृश्यमपि। इदं किसलयशयनमेवेति स्वयमेव दृष्ट्वा निश्चेतुं शक्यमपि। अत्र पल्लवानां कामोद्दीपकत्वेन अङ्गतापदाहहेतुत्वात्तथा मननमित्यवगन्तव्यम्। असम्बन्धे सम्बन्धरूपातिशयोक्तिः ॥ ५ ॥

त्यजतीति॥ हे केशव तव विरहे राधिका पाणितलेन कपोलं न त्यजति। त्वद्वियोगक्षणमारभ्येयन्तं समयं करतलनिहितकपोलैवास्ते। सायं शुक्लपक्षप्रतिपदि सायङ्कालसन्ध्या बालशशिनं कलाद्वयमालं चद्रमिव। अलोलं कपोलविशेषणम्। अचञ्चलमित्यर्थः। निश्चलत्वेन सात्त्विकभावस्य स्तम्भस्य सम्भवः प्रत्येतव्यः। 'गडि वदनैकदेशे' इति धातुनिष्पन्नस्य गण्डशब्दस्य कपोलपर्यायतया पूर्णचन्द्रनिभराधामुखैकदेशस्य कपोलस्य बालशशिसाम्यमित्यवगन्तव्यम् ॥ ६ ॥

हरिरिति॥ हे केशव राधिका तव विरहे निकामं सकामं यथा भवति तथा हरिरिति हरिरिति जपति। 'महत्या व्यापदः प्राप्तौ स्मर्तव्यो भगवान् हरिः' इति पुराणवचनप्रामाण्यात्। सर्वदुःखसंहारिणं भगवन्तं महाविष्णुमनुस्मृत्य हरिर्हरिरिति जपति। विरहव्यथामूर्छनायां सत्यां प्रतिमुहुर्जप्यमानत्वद्योतनाय द्विरुक्तिः। विरहेण त्वद्वियोगेन विनिहितमासन्नीकृतं मरणं प्राणनिर्याणं यस्यास्तादृशी सती इयमेवं जपति। इति द्रष्टृणामस्माकं भाति च। इतः परं किमस्माभिर्विज्ञापनीयम्। 'निवेद्यते रक्ष्यजनेन दुःखं ततः परस्तात्प्रभवः प्रमाणम्' इति भावः ॥ ७ ॥

श्रीजयदेवेति॥ इति अनेन प्रकारेण श्रीजयदेवेन कविना भणितम् उक्तं केशवस्य श्रीकृष्णस्य पदं चरणतलमुपनीतं प्रापितम्। तत्रार्पितमित्यर्थः। तादृशं गीतं सुखयतु। श्रोतॄन् गातॄंश्चेति शेषः ॥ ८ ॥

एवं बहुधा राधाविरहव्यथायां विज्ञापितायामपि निश्चलमवस्थितं श्रीकृष्णं सखी सोपालम्भमाह—स्मरेति[1] श्लोकेन॥ हे उपेन्द्र दैवतवैद्यावश्विनौ तद्वद्हृद्य मनोज्ञगात्र। अश्विनावतिसुन्दराविति प्रसिद्धिः। तथा च श्रीहर्षः—'एको नळः किमयमन्यतमः किमैळः कामोऽपरः किमु किमु द्वयमाश्विनेयौ। किं रूपधेयभरसीमतया समेषु तेष्वेव हन्त नळमोहमहं वहे वा॥' इति। अथवा, दैवतवैद्याभ्यामश्विभ्यां हृद्य ततोऽप्यतिहृद्यगात्रचरित। सौन्दर्येण तदधिकः, रोगहारित्वेन चाधिकः, धन्वन्तरिरूपेणावतीर्णत्वात्। किञ्च, संसाररोगहारिता चासाधा-

1. इदं पद्यं सा रोमाञ्चतीत्यनन्तरं मुद्रितपुस्तके।

रणत्वेन विद्यत इति दैवतवैद्याभ्यामप्यतिहृद्यस्त्वमेव। तादृशीं तव हृद्यतामस्वी-कृत्यैव नित्यं बाधते राधां मन्मथः। ततस्तद्बाधाविमोचनार्हता द्योत्यते। किञ्च, हृद्यतया परोपकारित्वं सिद्धम्। तेन च त्वं राधामनन्यशरणामनुरागिणीं विमुक्त-बाधां न कुरुषे यस्मात्तस्मात् कारणात्त्वं वज्रादपि दारुणोऽसि कुलिशादपि कठि-नोऽसि। तादृश्या अकरुणतया तव काचिदकीर्तिश्च भवितीत्याह—राधाविशे-षणेन स्मरातुरामिति। त्वदेकाश्रया सा स्मरेण परिभूयते। त्वञ्चालोपेक्षसे चेद्भगवान् वासुदेवो भक्तवत्सलो न भवतीति सर्वे त्वामवमन्येरन्निति। ननु दुस्सा-धकृत्याकरणादकीर्तिश्चेत्किं कर्तव्यमिति विचार्योदास्यत इति न शक्यं वक्तुमि-त्याह—त्वदङ्गसङ्गामृतमात्रसाध्यामिति। त्वदङ्गीयः सङ्गः सङ्गमः आलिङ्गन-चुम्बनादिः स एवामृतम् अजरामरत्वपरमानन्दप्रदत्वात्पीयूषं तन्मात्रेण तेनैव केवलेन साध्यां शक्यप्रतिक्रियाम्। न पुनरन्येनामृतेन मृतसञ्जीवन्यादिभिर्वा निवर्तनी-यार्तिमूर्छामित्यर्थः। अतस्तस्यां तव दयालवोदयमात्रस्यैवापेक्षितत्वात्। तद-भावस्य च दृश्यमानत्वादुक्तम् उपेन्द्र वज्रादपि दारुणोऽसीति। दैवतवृन्दवन्द्येति पाठान्तरे दैवतानाममराणां वृन्दैर्वन्द्यस्त्वम्। तादृशस्य ते तस्या बाधाविमोचन-ममृतेनापि सुशकम्। अत्र तु तावान् प्रयासो नापेक्षितः, यतस्त्वदङ्गसङ्गामृत-मात्रसाध्या सेत्यभिप्रायः। यद्वा, दैवतवृन्दवन्द्यत्वे हेतुर्ज्ञातः। इन्द्रो वज्रधरः। अतस्तस्माद्बिभ्यति। तं वन्दन्ते च सर्वे देवाः। त्वं तस्यावरजत्वादुपेन्द्रः, स्वयं वज्रादपि दारुणश्च। तत एवातिबिभ्यतो देवास्त्वामपि वन्दन्त इत्यभ्यू-ह्यम्। वज्राधिकदारुणोऽसीति पाठे अधिकमत्यन्तं दारुणः अधिकदारुणः। वज्रादप्यधिकदारुण इत्यर्थः। कुरुष इति क्रियाफलस्य कर्तृगामित्वद्योतनाया-त्मनेपदनिर्देशः। तच्च तस्याः स्वास्थ्ये सम्पादिते तया करिष्यमाणमनोनुगुण-शुश्रूषारूपो निष्क्रय इति तेनैव ध्वन्यत इत्यलमध्वन्यस्य योजने गन्तव्ये, समासन्ने च सायङ्काले मार्गतरुफललिप्साप्रयासविलम्बनवदनवमानेन वचनेनेति विरमामः। उपेन्द्रवज्रेति वृत्तनाममुद्रितोऽयं श्लोकः कविचातुर्यं स्फोरयति, 'उपेन्द्रवज्रा जतजा-स्ततो गौ' इति लक्षणात्। 'पदान्तलघोर्गुरुत्वञ्च' इति छन्दस्सूत्राद्विकल्पितगुरुत्वं तुर्यपादान्ते सकारस्यावसेयम्। अत्र संबुद्धेस्साभिप्रायत्वात्परिकरालङ्कारः। अङ्गसङ्गामृतेत्यत्र रूपकम्। बाधां राधामित्यत्रानुप्रासः, स्मरातुरामिति च। किञ्च, वज्रादपि दारुणत्वं साध्यम्। तच्च बाधाविमोचनाभावरूपेण व्यतिरे-किणा हेतुनानुमितमित्यनुमानालङ्कारः ॥ ३ ॥

अथेदृशोपालम्भहेतुं तस्या दशान्तरमाह—सा रोमाञ्चतीति। सा राधा इदानीमनियतमनेकं व्यसनमुपैति। किमिति चेदुच्यते—रोमाञ्चति रोमाञ्चयुक्ता भवति। रोमाञ्चशब्दादर्श आद्यचि आचारार्थः क्विन्तः। पश्चात् सीत्करोति सीत्कारं कुरुते। त्वदङ्गालिङ्गनचुम्बनसङ्कल्पवशादिति द्वाभ्यां व्यज्यते। विलपति हा हा कितव त्वं क्व गतोऽसि मां विहायेत्यादि परिदेवयति। पुनरुत्कम्पते स्वापराधेन कुपितं गतं त्वां विचिन्त्य वेपते। कर्तव्यमूढतया विरहव्यथावृद्धया च ताम्यति क्लान्तिमुपैति। ध्यायति त्वद्दर्शनोपायं चिन्तयति। उद्भ्रमति इतस्ततः पर्यटति। मध्ये प्रमीलति त्वददर्शनतापासहनतया नेत्रे निमीलयति। पतति छिन्नपातं भुवि पतति। तदानीमेव पुनरुद्याति उत्तिष्ठति। पश्चादपि मूर्छति मोहं गच्छति। अपि-रनुक्तसमुच्चायकः। पुनरपि बहुविधविकृतीः प्राप्नोतीत्यर्थः। एतावति उक्तप्रमाणे अतनुज्वरे मदनमहामये। सत्यपीति शेषः। वरतनुः त्रैलोक्य-सुन्दरी सा राधा ते तव सम्बन्धिनो रसात् पुनरपि त्वदङ्गसङ्गानुरागवशात्। तद्विषयया प्रत्याशयेत्यर्थः। न जीवेत् किम्। जीवेदेवेति यावत्। तदपि पुनस्त्वं प्रसीदसि यदि तव प्रसादलेशसद्भावे सा जीवेदेव। अन्यथा त्वत्प्रसादा-भावे त्यक्ता। अस्माभिरिति शेषः। अस्माभिरशक्यसमुज्जीवनत्वात्सा त्यक्तैव। तव प्रसादाभावेऽन्यत् परं यत्किञ्चिदन्यदेव दशान्तरम्। वक्तुं स्मर्तुमप्यशक्यं स्यादिति शेषः। अत्र पूर्वार्धे आख्यातमाला नामा-लङ्कारः। स्ववैद्यावश्विनौ तत्प्रतिम तदुपम इत्यनया संबुद्ध्या सौन्दर्यभिषग्वर-त्वप्रत्यायिकया त्वत्कृतो व्याधिस्त्वयैव शमयितुं शक्य इति द्योतिताभिप्रायत्वात्परि-करालङ्कारः। ते रसात्त्वदौषधबलादिति श्लेषः ॥ ४ ॥

अथ तस्यास्तापशान्तेरन्यदुष्करत्वात्त्वदेकसुकरता च निश्चितेत्याह—कन्दर्पेति ॥ हे केशव कन्दर्पेण कामेन कृतो यः संज्वरः सन्तापः। उभयत्र 'तृतीया तत्कृत' इत्यादिना समासः। एतेन संज्वरेण आकुला तनुर्यस्यास्तादृश्या अस्या राधायाश्चित्तं चेतः कर्तृ चन्दनस्य चन्द्रमसः कमलिन्याश्च चिन्तासु। अस्यास्तापशान्तये चन्दनं वा चन्द्रमा वा कमलिनी वा शक्नुयादित्यस्माकं सखीनां विचारेषु सत्सु चिरं दीर्घकालमत्यर्थं भृशं ताम्यति तान्तिमुपैति। मूर्छतीत्यर्थः। तर्हि साध्यैव मयापीति चेन्नेत्याह—किन्तु विशेषः कश्चिदस्ति। अस्माभिः परिचारिकाभिः उज्झितपरिसरा सती स्वयं क्लान्तिवशेन क्लमाधीनतया तदुपशमो-

पायोऽयमिति मन्यमाना मनसा शीतळतनुं सर्वसन्तापनिर्वापणक्षणशैतल्यशालि-शरीरं त्वामेकमेव प्रियं ध्यायन्ती चिन्तयन्ती रहसि निर्जने देशे अस्माभिः प्रियसखीभिः अपि रहिते एकाकिन्येव स्थिता कथमपि महता यत्नेन क्षणं अल्पकालम्। अत्यन्तसंयोगे द्वितीया। प्राणिति जीवति। आश्चर्यमस्याश्चिरमिति पाठान्तरे आश्चर्यमेतदित्यन्वयः। पार्श्ववर्तिनीभिरस्माभिः शिशिरोपचारप्रकार-परिगणनमात्रस्य क्रियमाणत्वे ग्लानिर्मूर्छापर्यवसायिनी, एकाकिन्या रहसि स्वयमेव त्वां चिन्तयन्त्यास्तस्याः प्राणनञ्च किन्त्वाश्चर्यमित्यर्थः। सर्वथापि त्वदेकायत्त-जीवितव्या सा जातेति यावत्। अत्र छेकानुप्रासः। अयोगे योगरूपाति-शयोक्तिः ॥ ५ ॥

यद्येवं तर्हि मयि तत्समीपं प्रति प्रस्थितायां सेदानीमेकाकिनी रहसि स्थिता प्राणितीति न प्रत्येतव्यमित्याह — क्षणमिति ॥ हे केशव नयनयो-र्निमीलितं निमेषः। भावे निष्ठा। तेन खिन्नया। त्वद्दर्शनसुखप्रतिबन्धक-निमेषदुःखितयेत्यर्थः। तादृश्या यया राधया ते तव विरहः विश्लेषः। 'आश्लेषे भुजलतयोः क्षणश्लथत्वमालापे विरमणमीक्षणे निमेषः। शय्यायां सुरतपरिश्रमेण सुप्तिः कान्तानामिति विरहो मृतिस्तु शेषः॥' इति वचनात्। स एव विरह इति निश्चिन्वानयेत्यर्थः। क्षणमपि स्वल्पकालमपि। अत्यन्तसंयोगे द्वितीया। न सेहे न सोढः। सहेः कर्मणि लिट्। 'अत एक-हल्मध्येऽनादेशादेर्लिटि' इत्येत्वाभ्यासलोपौ। असौ राधा। इदानीमिति शेषः। ते चिरविरहेऽपि बहुतरकालीनेऽपि त्वद्विरहेऽनुभूयमाने सति। किञ्च, पुष्पिताग्रां सञ्जातपुष्पाग्रभागां रसालशाखां सहकारलतां विलोक्य दृष्ट्वा कथं श्वसितु केन प्रकारेण प्राणितु। प्राणनहेतुभूतत्वद्दर्शनाद्यभावे तद्विरोधिनि मधुसमयजृम्भिते च सति तादृशस्य समयस्य द्राघीयस्त्वे च विद्यमाने कथमपि प्राणितुं न शक्नुयादेवेति यावत्। अतोऽविळम्बमेव त्वया सोज्जीवनीयेति भावः। अत्र श्वसितु इति पूर्वत्र च 'रुदादिभ्यः सार्वधातुकः' इतीडागमः। अयञ्च वृत्तनाममुद्रितश्लोकः। 'अयुजिनयुगरेफतोयकारो युजि तु न जौ जरजाश्च पुष्पिताग्रा।' इति लक्षणात् ॥ ६ ॥

अथ कविरिममपि सर्गं समापयिषुराशिषमाह — वृष्टिव्याकुलेति ॥ वृष्ट्या कुपितेन्द्रकारितयातिवृष्ट्या व्याकुलस्य विवशस्य गोपकुलस्य व्रजवासिजनस्य अवने रक्षणे रसाद्रागात् गोवर्धनं गिरिमुद्धृत्य बिभ्रत् धारयन् वल्लववल्लभाभिः

गोपीभिः अधिकानन्दं यथा भवति तथा चिरं चुम्बितश्च सन् गोपपतेः कंसद्विषः श्रीकृष्णस्य बाहुः भुजदण्डो भवतां श्रेयांसि तनोतु विस्तारयतु। सः कीदृशः— ताभिः गोपीभिः अर्पितानाम् अधरतटीनां सिन्दूरमुद्राभिः अङ्कितः चिह्नितः। अधरतटीषु सिन्दूररागयोजनं गोपीनां स्वभावः। दर्पेणेव। अत्राङ्कितशब्दार्थोऽपि योजनीयः। भुजस्य यो दर्पः अहङ्कारः अन्तर्गतः स बहिरिव निर्गतः। तेनाङ्कित इवेत्युत्प्रेक्षालङ्कारः। तदर्पिताधरेत्यनेनान्यादृशं माधुर्यातिशयं प्रकाशयति। मंगि अळं धे बळमो डिचुविए अंवणा अउवणमिएएं कंमिविआआ इरे अंण्णाहोऽतिरसमेआ' इति वचनात्। अत्र 'भवति विधृतशैले गोपिकाभिर्वयस्यैरपि विहितविलासं केळिलापादिलोले। सविधमिळितधेनूरेकहस्तेन कण्डूयति सति पशुपालास्तोषमैषन्त सर्वे॥' इति प्रतिपादितस्य भगवतः श्रीकृष्णस्य गोवर्धनोद्धरणलीलाविशेषस्यानुस्मरणम्। 'खिन्नोऽसि मुञ्च शैलं बिभृमो वयमिति वदत्सु शिथिलभुजः। भरभुग्नविधुरबाहुषु गोपेषु हसन् हरिर्जयति॥' 'गोधूळिधूसरितकोमळकुन्तळाग्रं गोवर्धनोद्धरणकेळिकृतप्रयासम्। गोपीजनस्य कुचकुङ्कुममुद्रिताङ्गं गोविन्दमिन्दुवदनं शरणं भजामि॥' इत्यादिबहुकविजनवर्णितत्वादैहिकपारत्रिकसुखदत्वाच्च कविनेदमनुसंहितमिति मन्तव्यम् ॥ ७ ॥

इति श्रीगीतगोविन्द इत्यादि पूर्ववत्। स्निग्धमधुसूदनो नामेति। 'चिक्कणं मसृणं सिग्धम्' इति पर्यायत्वेनाभिधानान्मसृणमधुसूदन इत्यर्थः। मसृणत्वञ्चात्र मधुसूदनस्य राधाविरहव्यथायां बहुधा निवेदितयामपि तदुचितप्रतिपत्तौ मौढ्यमित्यवसेयम्॥

इत्यखिलविद्यापरिवारश्रीमद्दक्षिणामूर्तिमहादेवप्रसादलब्धसाङ्गवेदपूर्वोत्तरमीमांसा-
शब्दतर्कसाहित्यसार्वभौमचरकुलकोण्डुभट्टमहोपाध्यायानुजेन सर्वाम्बिकागर्भशुक्ति-
मुक्तामणिना लक्ष्मीधरसूरिणा विरचितायां गीतगोविन्दव्याख्यायां
श्रुतिरञ्जिनीसमाख्यायां स्निग्धमधुसूदनाख्यः चतुर्थसर्गविमर्शः॥

पञ्चमः सर्गः ।

। साकाङ्क्षपुण्डरीकाक्षः ।

गीतम् ॥ १० ॥

अथ सखीविज्ञापनकौशलद्रवीभूतमानसोऽपि माधवस्तदुक्ताधिकराधाविरहव्यथातुरतया तत्सन्निधिं गन्तुमशक्तस्सादरं तामेव सखीं प्रियतमानयनार्थमादिदेश। सापि तद्दशादौस्थ्यदर्शनजनितप्रत्यया प्रत्येत्य तदवस्थादौस्थ्यं राधायै न्यवेदयदितीममर्थं श्लोकेनाह कविः—अहमिहेति ॥ श्लोकार्थोऽपि व्याख्यातप्रायः। किन्तु, हे सखि त्वयैव द्रष्टव्या मदीया दशा। पदमपि गन्तुम्मया न पार्यते। सापराधतयाहं तस्या भीतोऽस्मि च। सर्वोऽपराधः क्षम्यताम्। इतः परमीदृशमपराधमहं कदापि न करिष्यामि। हे सुन्दरि त्वं प्रसीद। देहि मे दर्शनम्। इत्यादिना मद्वचनेन त्वं तां राधामनुनय। सान्त्वनार्थमधुनैव याहि। प्रसाद्य वाग्भिस्तामिहानयेथाः, अविलम्बमेव समानय च। 'सम्माननोत्सञ्जनाचार्यकरणे'त्यादिना तङ्। सम्माननं पूजनम्। सम्मानपूर्वकमानयेरर्थः। नयते शास्त्र इत्यत्र सम्माननं शास्त्रस्य युक्तिभिः स्थिरीकरणम्। शिष्याणाञ्चैवंविधा प्रतिपादनेति धातुवृत्तावुक्तम्। तद्वदिहापि मद्वचनेनानुनीय प्रसाद्य तस्यां मयि च बहुमानेन तां मत्समीपं प्रापय्येति भावः। अथवा 'अकर्त्रभिप्रायार्थोऽयमारम्भः' इति तत्रैव वचनादिह कर्त्रभिप्राये वा तङ्। कर्त्र्याः सख्या अभिप्रायस्तु राधाया दुःखनिवृत्तिरेवेति बोध्यम्। इति एवम्प्रकारेण मधुरिपुणा श्रीकृष्णेन नियुक्ता सखी पुना राधामेत्य स्वयमिदं वक्ष्यमाणं वचनं जगाद गदितवती ॥ १ ॥

तदुक्तिप्रकारमेवाह — वहतीत्यादिगीतेन ॥ वराळिरागेणेति। वसन्तरागस्य पूर्वमुपसंगृहीतस्य पत्नीयम्। 'रामक्रिया वराळी च कौशी वासन्तयोषितः' इत्युक्तत्वात्। तस्याश्चन्द्रांशुजातत्वात्, 'एते रागा विशेषेण प्रातःकालेऽतिनिन्दिताः। सायमेषान्तु गानेन चोन्नतां श्रियमाप्नुयात् ॥' इति वचनाद्रात्रौ तस्या औचित्याच्च सा गृहीतेति मन्तव्यम्। तत्स्वरूपन्तु 'परमरुचिरतालीपल्लवाटङ्कशुम्भद्द्विजनिकरनिभास्या पीनवक्षोजकुम्भा। अमरनरविरश्चामन्तरङ्गं हरन्ती शुचिरसकरलोलापाङ्गपाळी वराळी ॥' इति। एकताळेनेति। तल्लक्षणं पूर्वमुक्तम्। तवेत्यादि राधेत्यन्तं ध्रुवपदम्। तत्तु सुगमार्थम्। अतः किञ्चिदेव व्याख्येयम्। हे सखि राधे तव विरहे वनमाली सीदति अवसादं

प्राप्नोति। मया तत्समीपं प्राप्य तस्य व्यथा दृष्टा। अतस्सत्यं वदामि। तद्विरहे तवावसादो मनागपि नास्त्येवेति तद्वेदनां दृष्टवत्या मम भातीत्यर्थः। तव वेदनायास्साक्षिणी तावदहमस्मि किल। तद्वेदनायास्साक्षीभूतस्तादृशः परिजनोऽपि नास्त्येव। केवलमेकाकी वानीरनिकुञ्जेऽवस्थितस्सीदन्मयावलोकितः। यद्यपि रहस्येकाकी स्थित्वा दूयते, तथापि तद्दुःखसाक्षिणः केचन सन्ति। त एव तत्त्वतो जानते तद्वेदनाप्रकारमित्याह—मलयसमीरे वासन्तिके मन्दवायौ मदनमुपनिधाय ऊढ्वा वहति वाति सति। अथवा उप उपरि स्वस्योर्ध्वभागे निधाय वहति बिभ्रति सति। मन्मथमुपरि निवेश्य गमनं स्यन्दनकृत्यं तस्य तद्रथत्वात्। तदुक्तम्—'मलयमरुदायोधनरथः' इति। किञ्च कुसुमनिकरे पुष्पसमूहे स्फुटति विकसति सति। किमर्थमेतस्य विकसनमित्यत्राह—विरहिणां वियोगिजनानां हृदयदळनाय : मनोलक्ष्यवेधाय। सन्नद्धं मन्मथं निजोपरि निवेश्योद्वता मलयमरुत्यभिमुखमापतति तत्सन्नाहदर्शनदर्पितेषु मन्मथास्त्रभूतेषु अशोकचूतादिपुष्पेष्वपि हर्षादिव विकसत्सु सत्सु सम्पूर्णस्वाभियोगसम्भारं मारमालक्ष्य तव विरहे वनमाली सीदति वेदनाभिभूतः कृत्यमूढो भवतीत्यन्वयः। अत्र कुसुमनिकरविकासस्य प्रभुरस्मानेव विरहिहृदयलक्ष्यवेधने नियोक्ष्यति, तच्च तदास्माकं सुकरमिति हर्षस्य हेतुत्वेन सम्भावनात् तस्य च 'मन्ये शङ्के ध्रुवं प्रायो नूनमित्येवमादिभिः। उत्प्रेक्षा व्यज्यते शब्दैरिवशब्दोऽपि तादृशः॥' इत्युक्तानामुत्प्रेक्षाव्यञ्जकानां शब्दानामन्यतमस्य प्रयोगाभावाच्च गम्योत्प्रेक्षा। सा च यथा लोके शक्तित्रयसम्पन्ने गजाधिरूढे कस्मिंश्चित् प्रभौ बद्धवैरे सर्वसन्नाहेनाभियुञ्जति सति तदभियोज्यः प्रचुरव्यसनाभिभूतोऽवसीदेत्, तथाद्य त्वद्विरहे वनमाली सीदतीत्यौपम्यस्य गम्यमानत्वाद्दीपकालङ्कारमुत्थापयतीति तयोरङ्गाङ्गिभावरूपस्सङ्करः ॥ १ ॥

दहतीति॥ हे राधे हे सखि इत्याभ्यां विस्रम्भातिशयव्यञ्जिकाभ्यां सम्बुद्धिभ्यां सम्यगेव दृष्टं सत्यमेव मया निवेद्यते, ततस्त्वया स्वदृष्टवदेवेह प्रत्ययो विधेय इति द्योत्यते। 'अखिलं विदुषामनाविलं सुहृदा च स्वहृदा च पश्यताम्। सविधेऽपि न सूक्ष्मसाक्षिणी वदनालङ्कृतिमात्रमक्षिणी॥' इति श्रीहर्षवचनन्यायेनेति यावत्। एवं पूर्वकृतस्वसौन्दर्यसर्वस्वापहारवैरप्रतिनिर्यातनायाभियाते सर्वाभिसारेण स्मरमहाराजे वनमालिनो दुर्दशा मया दृष्टा। त्वया श्रूयताम्। शिशिरमयूखे चन्द्रे। मदनसेनापताविति शेषः। दहति

स्वकिरणैः सर्वाण्यङ्गानि सन्ताप्य भस्मीकर्तुमारब्धे सति स्वस्य तत्प्रतिविधानाशक्तौ सत्यां मरणमनुकरोति मरणतुल्यां दशामुपैति। शत्रुशक्तिवारणाशक्त्यां सत्यां युद्धे म्रियेतेति क्षत्रधर्माश्रयेण तस्य मदनसेनान्योऽग्रे मुमूर्षा प्रकाश्य वर्तते। यद्भवभूतिः—'भावप्रेम्णा सरसबिसिनीपत्रमात्रान्तरायस्ताम्यन्मूर्तिश्श्रयति बहुशो मृत्यवे चन्द्रपादान्'इति। तद्वदनुतिष्ठति। तदा चन्द्रो न मारयति। किन्तु नितरां तापयित्वा दिधक्षत्येव। ततो वनमाली मरणे प्रत्यासन्ने यानि दुःखानि तानि सर्वाण्यनुभवतीत्यर्थः। किञ्च पुनर्मदनस्यैव विशिखे शरे सायके पतति। जात्येकवचनम्। मदनबाणेषु स्वशरीरे पतत्सु सत्वित्यर्थः प्रयोक्तुरनङ्गत्वात्तं प्रति किञ्चित् प्रतिविधातुमशक्यत्वाच्च बहु विलपति अनेकप्रकारं यथा भवति तथा परिदेवति। विकरोति बहुविधा विकृतीश्च प्राप्नोति। एवं तव विरहे वनमाली सीदतीत्यन्वयः ॥ २ ॥

ध्वनतीति ॥ हे सखि राधे मधुपसमूहे मधुकरनिकुरुम्बे ध्वनति शब्दायमाने सति वनमाली श्रवणं कर्णमपिदधाति छादयति। 'श्रवणं श्रवः' इत्यमरः। मधुकररुतस्य विरहिणां कर्णशूलायमानत्वात्करयुगेन कर्णद्वयमाच्छादयतीत्यर्थः। मनसि वलितविरहे वर्धितविरहव्यथे सति। विरहशब्देन तज्जन्यवेदना गृह्यते। कार्ये कारणव्यपदेशात्। निशि निशि रात्रौ रात्रौ। रुजं महतीं वेदनाम्। उपयाति प्राप्नोति। निशि निशीति वीप्सया न केवलमस्यामेकस्यामेव रात्रौ तस्य दुःखम्, अपि त्वीदृशीषु व्यतीतासु वासन्तिकीषु सर्वास्वपि रात्रिष्वनुवृत्तमेव, किन्तु स्वापराधरुषितां त्वामनुचिन्त्यास्यामाधेर्व्याधित्रयादत्यन्तदुस्सहमित्येतावानेव विशेष इति प्रत्याय्यते। ततश्च अनुनय मद्वचनेनेति मधुरिपुनियोगानुस्मृतिः सख्या सूच्यते ॥ ३ ॥

वसतीति ॥ हे सखि राधे वनमाली विपिनविताने वनविस्तारे। अत्र धर्मस्य विशेषणतया धर्मिण्येव विश्रान्तेरन्वययोग्यता। विस्तीर्णे वन इति। वसति निवसति। वनस्य विस्तीर्णत्वं च विरहिणः कृष्णस्य वेदनातिशयनिरासहेतुभूतस्य तत इतो भ्रमणस्योपयुक्तत्वादुपात्तम्। विपिनवासश्च न कादाचित्क इत्याह — त्यजति ललितधाम। ललितं हृद्यं धाम गृहं त्यजति जहाति। न कदाचिदपि गृहं गच्छति। विपिनवासस्य गृहगमनाभावस्य च फलमाह — धरणिशयने धरणिः भूपृष्ठमेव यच्छयनं शय्या तत्र लुठति शयित्वा बहुधा परिवर्तते।

तत्तु गृहे चेद्बहवः पश्येयुः। कारणञ्च पृच्छेयुरेव। तत्र रहस्यन्न प्रकाशनीयम्। प्रकाशिते हास्यञ्च स्यात्। तत इहैवावासश्श्रेयानिति भावः। न केवलं धरणिलोठनमात्रम्, तव नाम बहु यथा तथा विलपति च हे राधे त्वं ममापराधमखिलं क्षमस्व, यतस्त्वदन्या मे नास्ति गतिः, इतः परं कदापि तवेदृशमपराधमयं दासजनो न करिष्यतीत्यादि त्वन्नामधेयकीर्तनपूर्वकं बहुधा परिदेवनं करोति। अतस्त्वयावश्यमेवाविळम्बितमेव गत्वा सोऽनुग्राह्यः। न चेदन्यदेव किमपि स्यादिति प्रकाश्यते ॥ ४ ॥

भणतीति ॥ कविश्चासौ जयदेवश्च तस्मिन्। एवं विरहविलसितेन राधाविरहविधुरमाधवविलासरूपेण भणति वर्णयति सति। तेन मनसि श्रीकृष्णस्य मनसि रभसविभवे अहो अयं मदेकभक्तो मदीयमेव रहस्यचरितमनुवर्णयतीति रभसो वेगः। त्वरेति यावत्। तस्य विभवः सम्पूर्णता। अनन्यशरणस्य ममानुग्रहत्वरासामग्र्यमित्यर्थः। तस्मिंश्च सति। सुकृतेन मदीयपुण्येन पूर्वजन्मार्जितेन पचेळिमतयाद्य फलोन्मुखेन हेतुभूतेन। अनेन पुण्यश्रवणकीर्तनस्य भगवतः श्रीकृष्णस्य चरितवर्णयितृत्वं पूर्वजन्मसहस्रसञ्चितसुकृतफललभ्यमिति प्रकाश्यते। हरिः श्रीमहाविष्णुः भगवानुदयतु प्रत्यक्षीभवतु। मामनुग्रहीतुं मदग्रे प्रादुर्भूयादिति प्रार्थ्यते। अथवा हरिर्मम मनस्युदयतु। कीदृशे रभसविभवे रभसस्य हरिप्रसादलाभत्वराया विभवस्सम्पूर्णता यस्मिंस्तादृशे। हरिचरितवर्णनश्रवणानुस्मरणादिजनितेन सुकृतेन हेतुनेति वा योज्यम्। तदुक्तम्—'मम गुणगणलीलाकर्णनैः कीर्तनाद्यैर्मयि सुरसरिदोघप्रख्यचित्तानुवृत्तिः। भवति परमभक्तिस्सा हि मृत्योर्विजेत्री' इति। तथाच हरिसाक्षात्कारकामिभिरिदं गीतं पठितव्यं गातव्यं श्रोतव्यं वेति भावः। इयन्तु पञ्चपदी पञ्चरत्नमित्युच्यते। प्रथमगीतस्य दशावतारकीर्तनरूपतया तत्फलप्रशंसनेन चैकादशभिः पदैरेव परिसमाप्तिर्जाता। इतरगीतयोऽष्टपद्यः। इयञ्च पञ्चपदी प्रथमगीत्या सहाष्टपद्यावुभे जाते। ततश्च सर्वा अष्टपद्यो जाता इति कवेरभिप्रायः ॥ ५ ॥

अथ सखी श्रीकृष्णस्य राधाविरहवेदनापारवश्यं श्लोकेनाप्याह—

पूर्वमिति ॥ हे राधे यत्र यस्मिन् निकुञ्जे तेन त्वया समं भवत्या सह रतिपतेः कामदेवात् सिद्धयः परस्परदर्शनस्पर्शनालिङ्गनचुम्बनादिरूपा आसादिताः प्राप्ताः।

अनेन वाक्येन तवापि स्पृहणीयो निकुञ्जरस इति द्योत्यते। तस्मिन्नेव। नतु तादृशेऽन्यस्मिन्निति भावः। निकुञ्जमन्मथमहातीर्थे निकुञ्जरूपे मन्मथस्य कामदेवस्य त्रिभुवनवर्तियुवजनपरदेवताभूतस्य सम्बन्धिनि महातीर्थे पुण्यस्थले। कामदेवनित्यसान्निध्यहृद्यतरे पुण्यक्षेत्रे इत्यर्थः। स्थित्वेति शेषः। माधवः श्रीकृष्णः। पुनरिति। पूर्वलब्धसिद्धिजनितप्रत्ययत्वाद्भूयोऽपि तत्रैवावस्थानभजनादिसाफल्यनिश्चयो ध्वन्यते। त्वामन्यवनितासान्निध्यासहिष्णुतया रुषितां प्रस्थितामितस्ततोऽन्विष्याप्यलब्धदर्शनामनिशं सर्वदा ध्यायन् अनन्यमनस्कतया चिन्तयन् तवैव ये आलापाः निरुपाधिकनिरपायप्रणयविस्रम्भपिशुना रहस्सम्भाषणप्रकाराः त एव ये मन्त्रा जप्यशब्दाः तेषां या आवलिः पङ्क्तिः तामनिशं जपन् गूढमावृत्योच्चारयन्। अपिश्चार्थः। भूयः पश्चात् त्वत्कुचकुम्भयोस्तावकीनस्तनकलशयोर्यो निर्भरः गाढगाढः परिरम्भः आलिङ्गनं तद्रूपं यदमृतमशेषदुःखोच्छित्तिरूपत्वादतिस्पृहणीयो मोक्षः तद्वाञ्छति। अतस्त्वयापि तत्र गत्वा तस्य तपस्सफलीकर्तव्यमिति भावः। अत्र विशेषणसाम्यादप्रस्तुतस्य मुमुक्षुतपस्यारूपस्यार्थस्य गम्यत्वात्समासोक्तिः। 'विशेषणसाम्यादप्रस्तुतस्य गम्यत्वे समासोक्तिः' इति लक्षणात्। सा च सावयवरूपकोत्थापितेति तयोस्सङ्करः। तेन च यथा भक्तेन पुण्यस्थले स्थित्वा तपसाराधिता देवता प्रसाद्याविळम्बितं तस्मै लिप्सितं दद्यात्, तथा त्वयापि तदग्रे प्रादुर्भूय तदीप्सितं तूर्णमेव देयमित्यलङ्कारेण वस्तुध्वनिः। परीरम्भ इत्युपसर्गस्य 'घञ्यमनुष्ये दीर्घम्' इति दीर्घः ॥ २ ॥

गीतम् ११

द्योतितमर्थं गीतेन प्रपञ्चयति — रतीति॥ गौडरागेणेति रागत्रयसाधारणं वचनम्। तेषां सहजत्वात्। तदुक्तम्—'चूतायुधोद्दीपनचारुवेषाश्चेताहराश्चिलतरप्रचाराः। गौडस्तथा माळवगौडरागः केदारगौडस्सहजास्त्रयोऽमी॥' इति। एकताळलक्षणं प्रागुक्तम्। हे राधे गोपीनां यौ पीनौ स्तनौ तयोर्मर्दने गाढाश्लेषे निर्दयं निष्करुणञ्च चञ्चलं तूष्णीमस्थानासहिष्णु च यत्करयुगं तेन शाल्यते श्लाघ्यत इति तच्छाली। तादृशो वनमाली श्रीकृष्णो यमुनातीरे वने वसति त्वदागमनं प्रतीक्ष्य वर्तते। वनं विशिनष्टि—धियं रान्ति विविधरतविशेषप्रवृत्तिनिस्तुषसमुन्मेषरूपां व्यवसायात्मिकां बुद्धिं ददतीति धीराः। तादृशास्समीरा मन्दमारुताः यस्मिंस्तादृशे। 'आतोऽनुपसर्गे कः' इति रादान इत्यस्माद्धातो. कः। अहमिहैव वसामि। त्वं तूर्णं याहि। राधां मद्वचनेनानुनय। अनुनयप्रसादितां तामिहानयेथाश्च। माभूद्विळम्ब इति तेन त्वद्विरहवेदनाविवशेन

सन्दिष्टास्मि च। अतस्त्वं तं हृदयेशमनुसराभिगच्छ। ननु यदि मे सोऽनुकूलस्तर्हि मामभिगच्छतु। नाहं तत्र गन्तुं शक्नोमीति चेत्तथा न मन्तव्यम्। यतोऽसौ तव हृदयेशः हृदयस्य मनस ईशः। तदभिसरणे चिकीर्षिते तव मनःक्लेशास्सर्वेऽप्यस्तमयेरन्। 'मनश्शरीरयोस्तापः परस्परमनुव्रजेत्। आधाराधेयभावेन तप्ताज्यघटयोरिव॥' इति वचनान्मनस्तापहेतुकस्य शरीरतापस्यापि व्यपगमे गन्तुमपि शक्नोष्येवेति मया निश्चितमेव। ततो हृदयेशं तमनुसरेत्युक्तमिति भावः। किञ्च, त्वत्सन्तापालस्यादिनिवेदनेन तमत्रानेतुमशक्नुवत्या मया निर्बध्यस इति मद्वचनस्याश्रद्धेयता च मा शङ्कीति बोधयितुं राधाधिष्ठितान्निकुञ्जादपि कृष्णाधिष्ठितो देशस्सुख इति बोधयितुञ्च यमुनातीरं विशिनष्टि---रतिसुखसार इति। रतिजन्यस्य सुखस्य सारो बलं यस्मात्, सारः स्थिरांशो यस्मिन्निति वा विगृह्य व्यधिकरणो बहुव्रीहिः। देशसारस्येन रतिसारस्यम्, अस्माद्देशात्स एव देशो बहुगुण इति मन्यमानया मया तमत्रानेतुन्नाविप्रयासः कृतः। परं तन्नियोगलाभानन्तरमेवात्रागतमिति भावः। अपिच, अभिसारे अभिसरन्त्यस्मिन् प्रियं प्रिया इत्यभिसारम्। स्वैरविहारसमुचितमिति यावत्। तादृशे यमुनातीरे यद्वनं तत्र गतं स्थितमित्यर्थः। सर्वत्र त्वामन्विष्य परिश्रमात्तत्र गतं प्राप्तम्। देशगुणाधिक्योद्दीपितविरहव्यथत्वात्ततः प्रचलितुमशक्तत्वात्तत्रैव स्थितमिति गतशब्दार्थः। कीदृशं तमित्याशङ्कायामाह — मदनवत् कामदेववन्मनोहरवेषम्। शषयोरैक्यमनुप्रासादौ कविसम्मतम्। मदनापेक्षया मनोहरवेषमिति वा। कोटिकन्दर्पसुन्दरमित्यर्थः। अथवा, अनुप्रासानुगुणे पाठान्तरे मनो हरति वैचित्र्यमुत्थापयतीति मनोहरः। मनोहरश्चासौ वेश आवेशश्च मनोहरवेशः। मदनकर्तृको मनोव्यामोहन आवेशो यस्येति वा। अहो अनितरसाधारणं तव सौभाग्यम्। यदयमन्या विहाय त्वदेकसक्तो दूयत इति व्यज्यते। अतस्त्वं तादृशं तं हृदयेशमनुसर। अस्थाने विचारेणालम्। हे नितम्बिनि प्रशस्तजघने हे सखि राधे गमने विळम्बनं कालक्षेपं न कुरु। अधुनैव प्रस्थितयापि त्वया परिमितोऽप्यध्वा चिरेणैव लङ्घनक्षम इति सम्बुद्धेरभिप्रायः। किमुत वृथा विचारेण काले क्षिप्त इति शेषः। तदालस्यं मित्रवद्रिपुरिति न्यायमालोच्य गुणगणैकप्रवणमनास्सती गन्तुं त्वरस्वेति यावत्। सुखसार इत्यत्र 'सुस्थिर' इति घञ्। अभिसार इत्यत्र 'अकर्तरि च कारके' इत्यादिना घञ्। अत्रोपमार्थापत्त्योः संसृष्टिः ॥ १ ॥

नामेति ॥ हे राधे यो नाम्ना भवदभिधानेन समेतमङ्कितं यथा भवति तथा कृतस्सङ्केतस्त्वदागमनसमयो यस्मिन् कर्मणि तद्यथा तथा वेणुं वंशनाळं मृदु श्रुतिसुखं यथा तथा वादयते नादयति। अथवा, कृतस्सङ्केतः स्थानसमयो यत्रेति व्युत्पत्ताविदं वेणुविशेषणम्। किञ्च, ननु हे राधे यश्च वनमाली ते तव तन्वा शरीरेण सङ्गतस्सम्बद्धो यः पवनो वायुः तेन चलितम् उत्थितरेणुमपि भूपरागमपि। किमुत भवतीमित्यर्थः। बहुमनुते गौरवेण गणयति। अथवा, तन्वा सङ्गतः पवनचलितश्चेत्युभयं रेणुविशेषणम्। अस्मिन् पक्षे अङ्गरागभूतचन्दनपरागो विवक्षितः। परम्परया तनुसम्बद्धसम्बन्धेऽप्यादरः किल। साक्षात्तव सम्बन्धे किमुत वक्तव्यमिति भावः। स वनमाली यमुनातीरे वसतीत्यन्वयः। अत्रार्थापत्तिरलङ्कारः। 'कैमुत्येनार्थनिष्पत्तिरर्थापत्तिरुदीरिता' इति लक्षणात् ॥ २ ॥

पतनीति ॥ यो वनमाली पतत्रे वृक्षाद्वृक्षान्तरं प्रतिसञ्चरतां पक्षिणां पक्षे। गरुदीत्यर्थः। पतति चलतीत्यर्थः। अथवा, पतत्रे पक्षिणि। अत्रावयवेनावयवी लक्ष्यते। पतति सशब्दमुत्पततीत्यर्थः। किञ्च, पत्रे शुष्कपर्णे विचलति सस्वनं वातधूते सतीत्यर्थः। विचलितपत्र इति पाठान्तरम्। तत्र विचलितं सञ्चलितं पत्रं पलाशं येन तादृशे पतत्र इत्यन्वयः। शङ्कितं तर्कितं भवत्या उपयानमागमनं यस्मिन् कर्मणि तद्यथा तथा शयनं रचयति क्रीडोचितकुसुमशयनीयं निर्माति। चकितमपराधजनितं भयं तेन सहिते सचकिते। तादृशे नयने नेत्रे यस्मिन् कर्मणि तद्यथा तथा भवत्याः पन्थानमागमनमार्गं पश्यति वीक्षते। स वनमाली यमुनातीरे वसतीति योजना। भवदुपयानमित्यत्र सर्वनाम्नो वृत्तिमात्रे पुंवद्भावः। अत्रौत्सुक्यातिशयो ध्वन्यते ॥ ३ ॥

इदानीमभिसरणानुकूलसामग्रीमाह—मुखरमिति ॥ हे सखि राधे यो वनमाली एवं त्वदागमनौत्सुक्येन यमुनातीरे वसति, तदभिसरणानुकूल्याय मुखरं नादशीलम् अधीरं गमनसमये चञ्चलं केळिषु रतिक्रीडासु लोलमितस्ततो भ्रमणशीलम्। रिपुपक्षे मुखरत्वं योषिन्मण्डलमध्ये वाचालत्वम्। अधीरत्वं धैर्यरहितत्वम्। अत एव केळिषु वीरकेळिषु रणविधिषु लोलत्वं पलायनपरत्वञ्च बोद्धव्यम्। एतादृशं मञ्जीरं नूपुरं रिपुमिव इष्टकार्यप्रतिपक्षमिव त्यज विसृज। अन्यथा नूपुरनादेनेतरजनज्ञाने जारविहारभङ्गप्रसङ्गादिति भावः। किञ्च, नीलनिचोळं नीलमावरणपटम्। 'निचोळः प्रच्छदपटः'

इत्यमरः। शीलय आवृणु। नीलनिचोळशीलनौचित्यमाह — सतिमिरेति। तिमिरपुञ्जोऽन्धकारपटलम्। तेन सह वर्तत इति सतिमिरपुञ्जम्। अनेन-जारविहारयोग्यता सूचिता। तादृशं कुञ्जं कृष्णस्य वासभूतं लतागृहं प्रति-चल प्रतिष्ठस्व। अन्यथा व्यर्थः समयः स्यादिति भावः ॥ ४ ॥

उरसीति ॥ पीते सुवर्णवर्णे हे राधे उपहिता धृता हारा यस्मिंस्तादृशे अत एव तरळाश्चञ्चला वलाका धवळसर्वाङ्गाः पक्षिविशेषा यस्मिंस्तादृशे। अथवा, तरळो हारमध्यमणिः। 'तरळो हारमध्यगः' इत्यमरः। तत्तुल्या वलाका यस्मिंस्तादृशे। घने नीलमेघ इव स्थिते मुरारेः श्रीकृष्णस्य उरसि वक्षःस्थले। सुकृतानां पूर्व-जन्मसु त्वया सञ्चितानां पुण्यानां विपाके फलौन्मुख्ये सति। अथवा, सुकृतानां विपाकः फलं यस्मिंस्तादृशे रतिविपरीते विपरीतरते उपरिसुरते। 'वल्गत्कुचं व्याकुलकेशपाशं स्विद्यन्मुखं स्वीकृतमन्दहासम्। पुण्यातिरेकात्पुरुषा लभन्ते पुम्भावमम्भोरुहलोचनानाम् ॥' इति वचनात्पुण्यसञ्चयलभ्यत्वं पुरुषायितस्य स्त्रीणामपि सिद्धमेव। तत एवमुक्तिः। तटिदिव विद्युल्लतेव राजसि। वर्त-मानसामीप्याद्वर्तमानवद्भविष्यदर्थे लट्। राजिष्यसीत्यर्थः। यथा वलाका-जालपरिवृतप्रान्ते नीलमेघे विद्युल्लता भासते, तथा हारमालाभासुरे मुरारेरुरसि पुरु-षायितविहारिणी पीतवर्णा त्वमपि प्रकामं प्राप्तपरभागभासुराङ्गी नचिरात्प्रकाशि-ष्यस इत्यर्थः। अत्र बिम्बप्रतिबिम्बभावेन पूर्णोपमालङ्कारः। तदर्थी च वन-माली यमुनातीरे वसतीति योज्यम् ॥ ॥ ५ ॥

उक्तार्थस्मृत्या त्रपमाणां तत्पूर्वरङ्गभूतायामेव रतावुद्योजयति — विगळितेति ॥ पङ्कजनयने कमललोचने हे राधे त्वं तत्र गत्वा जघनं नितम्ब-बिम्बं किसलयशयने घटय श्रीकृष्णेन स्वयमत्यादरेण निर्मिते पल्लवशयनीये योजय। तत् कीदृशम् —विगळितं विस्रस्तं वसनमंशुकं यस्मा-त्तादृशम्। किञ्च, परिहृता श्रीकृष्णेनैव निरस्ता रशना काञ्ची यस्मात्तादृशञ्च। तादृशस्य त्वदीयजघनस्य नान्यदुपमानं पश्यामि। निधिमिव अमितमणिकनक-पूरितं निधानमिव। तुल्यधर्ममाह—हर्षनिदानं हर्षस्यादिकारणम्। अपिधानं पिधानेनाच्छादनेन रहितम्। विगळितवसनत्वात्। धनार्थी दरिद्र इव यदर्थी वनमाली यमुनातीरे वसति। स पूर्णकामो भवतु। अतस्त्वरितं प्रतिष्ठस्व। अत्रापि पूर्ववदुपमा ॥ ६ ॥

तर्हिं सोऽत्रागच्छतु इत्यत्राह–हरिरिति ॥ हे राधे यो यमुनातीरे वसति, स हरिः श्रीकृष्णः अभिमानी अभिमानधनः। अतोऽत्र नायातीति भावः। अहमखिलजनदुःखहारी मद्दुःखशमनार्थमन्यत्र कुत्र यामीत्यभिमानीति वा। तर्ह्यहं यदि तत्र यामि तदा केऽपि मां पश्येयुरिति त्वया तु नाशङ्क्यमित्याह— रजनिरिदानीम्। इदानीं अयं समयः रात्रिः खलु वर्तते। सर्वजनदृष्टिशक्तिहारिण्या रात्रेर्वर्तमानत्वात्त्वया निश्शङ्कमेव तत्र यातुं शक्यते। के वाधुना त्वां पश्येयुरिति। तर्हि मा त्वरय। क्षणमपि तूष्णीं स्थित्वा मनः स्थिरीकृत्य त्रपामप्यपाकृत्य पश्चाच्छनैर्यातुमारभ इति चेत्तत्राह—इयमुपयाति विरामम्। इयमिदानीमहमिव त्वदनुवर्तनमात्रपरा न भवति रात्रिरपि। किन्तु, विराममवसानं प्राप्नोत्येव। वर्तमानसामीप्ये भविष्यदर्थे लट्। विनाडिकानाडिकामुहूर्तयामक्रमेण विरंस्यत्येवेत्यर्थः। एवं स्थिते त्वं मा मनागपि संशयं कार्षीरित्याह–त्वरया सहिता रचना निर्माणं यथा भवति तथा सत्वररचनं मम वचनं मदुक्तमर्थं कुर्वनुतिष्ठ। किं त्वयोक्तम्,मया विस्मृतम्,पुनरपि ब्रूहीति तदुक्तिं शङ्कित्वाह—शीघ्रमभिसृत्य मधुरिपोः श्रीकृष्णस्य काममभिलाषं पूरय यद्यदस्मै रोचते तत्तदाचर। तथाच तस्य हृदयं त्वदायत्तमेव जायेत। ततस्तव दुःखपरम्परा समूलनाशा स्यात्। तदुक्तं माघे। 'यद्यदेव रुरुचे रुचितेभ्यस्सुभ्रुवो रहसि तत्तदकुर्वन्। आनुकूलिकतयैव हि यूनामाक्षिपन्ति हृदयानि रमण्यः॥' इति। अन्यथा मधुरिपोःदुःखम्। तव च दुःखम्। ममापि दुःखम्। सर्वमिदं तव त्रपालस्यापादितं भविष्यतीत्यहो तेऽविवेकितेति भावः। अत्र मधुरिपुपदेन श्रीकृष्णार्थप्रतिपादनं तत्कामपूरणे त्वया कृते विरहसमये स्वरसन्तापसम्पादकवसन्ततत्परिवारक्रूरतानिर्वापणमधुनैव स एव करिष्यतीति राधां बोधयितुं सख्या कृतमित्यपि वेदितव्यम् ॥ ७ ॥

श्रीजयदेव इति ॥ कृता विरचिता हरिसेवा श्रीकृष्णभजनं येन तादृशे श्रीजयदेवे परमरमणीयमत्यन्तहृद्यं यथा भवति तथा भणति वर्णयति सति प्रमुदितं प्रकर्षेण मुदितं सन्तुष्टं हृदयं मनो यस्य तादृशम्। अतिसदयमतीव दयाशालिनं हरिं नमत नमस्कारं कुरुत। हे जना इति सम्बोधनमध्याहार्यम्। सुकृतान्येषां सन्तीति सुकृतास्सुकृतिनः। अर्श आद्यच्। तैः कमनीयमभिलषणीयम्, तेषामेव हरिभक्त्युदयात्। 'दानव्रततपोहोमजपस्वाध्यायसंयमैः। श्रेयोभिर्विविधैरन्यैश्च कृष्णे भक्तिर्हि साध्यते॥' इति भागवतवचनात्। अन्येषान्तु पूर्व-

दुरितवासनावशादशान्तचेतसाम् 'एतल्लब्धमिदं लभे पुनरिदं लब्ध्येत्यभिध्यायतां चिन्ताजर्जरचेतसां बत नृणां का नाम शान्तेः कथा' इति वचनादभिलाषाविषयमिति भावः। अतस्सुकृतिनो हे महाजनाः यूयमतिसदयमतीव दयाशालित्वेन सुखसेव्यं हरिं नमतेत्यर्थः। गमनीयमिति पाठे सुकृतिभिः प्राप्यमित्यर्थः ॥ ८ ॥

अथ स्वोक्ते कर्तव्ये सन्दिहानमानसां राधां माधवस्य विरहचेष्टितानां स्वदृष्टानामनुवर्णनैरभिसरणकरणीयताबोधनेन पुनरपि प्रोत्साहयति—विकिरतीति श्लोकेन ॥ हे कान्ते सौन्दर्यभाग्यादिसर्वगुणसम्पन्ने राधे त्वं किमेवं कर्तव्ये सन्दिक्षे। तव प्रियः श्रीकृष्णः इदानीं श्वासान् त्वद्विरहसन्तापभराददीर्घानत्युष्णांश्च निश्वासवातान्मुहुर्विकिरति विविधं यथा तथा किरति परितो विक्षिपति। मुहुरिति सर्वत्रैकार्थं पौनःपुन्यद्योतकमेकमेव पदमव्ययं न केवलं पुनरुक्तिदोषानापदकम्, अपित्वतीव सारस्यापादनेन सहृदयहृदयमुदावहमवसेयम्। तदुक्तमाचार्यदण्डिना— 'अनुकम्पाद्यतिशयो यत्र कश्चिद्विवक्ष्यते। न दोषः पुनरुक्तेऽपि प्रत्युतेयमलङ्कृतिः ॥' इति। अस्यैव मुद्राराक्षसेऽपि प्रयोगश्च द्रष्टव्यः— 'मुहुर्लक्ष्योद्भेदा मुहुरधिगमाभावगहना मुहुस्सम्पूर्णाङ्गी मुहुरतिकृशा कार्यवशतः। मुहुर्नश्यद्बीजा मुहुरपि बहुप्रापितफलेत्यहो चित्राकारा नियतिरिव नीतिर्नयविदः ॥' इति। तत्र नीतिविषयोऽर्थः। अत्र शृङ्गारपरः। तत्र विशेषणपदैः मुहुश्शब्दार्थान्वयः। अत्र विरहचेष्टाविशेषवर्णनवाक्यैरित्येतावानेव भेदः। किञ्च, पुरोऽग्रभागे आशां दिशं त्वदागमनपदवीमित्यर्थः। मुहुरीक्षते पुनःपुनः पश्यति। मुहुरनेकवारं कुञ्जं लतागृहं प्रविशति। प्रविश्य च गुञ्जन् अव्यक्तवर्णं शब्दं कुर्वन् बहु यथा भवति तथा मुहुस्ताम्यति पुनः पुनः ग्लानिं प्राप्नोति। 'शमाष्टानाम्' इत्यादिना दीर्घः मुहुः शय्यां तल्पं रचयति कुसुमशयनीयं सज्जीकरोति। पर्याकुलस्सन् मुहुर्वलते भ्रमति। एवं मदनकदनेन मन्मथबाधया क्लान्तः खिन्नः। इदं सर्वत्र हेतुत्वेन गृहीतं बोध्यम्। अत्र विकिरति मुहुः श्वासानित्यनेन निश्वासोच्छ्वासवैवर्ण्यादिभिरनुभावैरुक्तैर्भगवतः श्रीकृष्णस्य राधाविरहवेदनाजनितो निर्वेदनामा व्यभिचारिभावः प्रतीयते। 'निर्वेदः शून्यचित्तत्वं वेदाद्वित्तादिनाशनात्' इति तन्निरुक्तिर्भावप्रकाशे द्रष्टव्या। तस्मिन् सति योगीव ध्यानरतो भवति हि निर्वेदतः पुरुषः। आशां पुरो मुहुरीक्षते इत्यनेनौत्सुक्यं प्रतीयते। पविशति मुहुः कुञ्जमित्यविमृश्यकारितारूपा चपलता। बहु ताम्यतीति ग्लानिः।

1. वेदः तत्त्वज्ञानम्।

रचयति मुहुश्शय्यामिति चावेगः। पर्याकुलो वलते मुहुरिति विषादः। क्लान्त इत्यनेन श्रमः। 'कालक्षेपासहिष्णुत्वमौत्सुक्यं प्रियसङ्गमे। ग्लपनाद् ग्लानिरुदिता वाङ्मनःकार्यकर्मसु॥ अदेशकालविहितो वेग आवेग उच्यते। मनसो विविधस्सादो विषाद इति कीर्तितः॥ श्रृणोति हन्ति योऽङ्गानि श्रमस्स परिकीर्तितः।' इत्येतेषां लक्षणानि। एभिर्व्यभिचारिभिरभिहितैः कचिद्व्यञ्जितैश्चात्र विप्रलम्भश्रृङ्गारस्य परिपोषः कृतः। तदप्युक्तं भावप्रकाशे—'विशेषादाभिमुख्येन चरन्तो व्यभिचारिणः। पुष्णन्तः स्थायिनः स्वांश्च तत्र यान्ति रसात्मताम्॥ यथाभिधीयमानास्ते रसमाहर्तुमीशते। तथैव व्यज्यमानाश्च रसं पुष्णन्ति नित्यशः॥' इति। यत एवं त्वद्विरहवेदनाविवशः श्रीकृष्णो वर्तते, ततस्त्वरितं त्वया तत्समीपं प्रति गन्तव्यमिति तात्पर्यम्। अत्र हरिणीवृत्तम्। तल्लक्षणं प्रागुक्तम्॥

अथाभिसरणसौकर्यञ्चाह—त्वदिति॥ हे मुग्धे कार्याकार्यविचाराचतुरे राधे विधातुर्विधेः त्वयि वाम्येन वैपरीत्येन समं सह तिग्मांशुस्सूर्यः अस्तमदर्शनं गतः प्राप्तः। गोविन्दस्य मनोरथेन त्वत्समागमविषयेणाभिलाषेण समं सह तमोऽन्धकारं कर्तृ सान्द्रतां निबिडत्वं प्राप्तञ्च। अस्मिन्वाक्यद्वये सहोक्तिरलङ्कारः। पूर्ववाक्ये श्लेषभित्तिकाभेदाध्यवसायरूपातिशयोक्तिमूला सहोक्तिः। अस्तशब्दस्य श्लिष्टत्वात् अस्तमदर्शनमस्तगिरिश्चेति। इयन्तं समयं तिग्मांशुश्च स्थितः। अधुना तेन सह तिग्मांशुरस्तं गत इति तुल्यकक्ष्यत्वमुभयोर्ग्राह्यम्। ननु 'उपमानोपमेययोरेकस्य प्राधान्यनिर्देशे परस्य सहार्थसम्बन्धे सहोक्तिः' इत्यलङ्कारसूत्रे गुणप्रधानभावप्रतिपादनात् कथं तुल्यकक्ष्यत्वमिति चेत्सत्यम्। शाब्दश्चात्र गुणप्रधानभावः। वस्तुतस्तु विपर्ययोऽपि स्यादिति मङ्खुवचनात्, विवक्षितस्य चोपमानोपमेयभावस्य सहार्थसामर्थ्येन प्रतीयमानत्वात्, आलङ्कारिकमतेन तादृशविशेषपरिहारेण सहोक्तिमात्रस्यालङ्कारत्वव्यवहारसम्भवात्। 'अनेन सार्धं विहराम्बुराशेस्तीरेषु' इत्यादिष्विव चमत्कारविशेषाभावात्तुल्यकक्ष्यत्वमेव सेत्स्यति। उत्तरवाक्ये गोविन्दस्य मनोरथेन च समं प्राप्तन्तमस्सान्द्रतामित्यत्र गोविन्दमनोरथानां तमसश्च सान्द्रतासेभिन्नत्वेऽप्यभिन्नत्वेन वचनादतिशयोक्तिमूलेयं सहोक्तिः। 'कुमुदवनैस्सह सम्प्रति विघटन्ते चक्रवाकमिथुनानि' इत्यादिवदश्लिष्टशब्दगतेति मन्तव्यम्। किञ्च, कोकानां चक्रवाकपक्षिणामिथुनानाम्। पुमान् स्त्रियेत्येकशेषः। करुणस्वनैः परिदेवितरूपकूजितैः सदृशी तुल्या मम त्वत्प्रियवयस्याया

अभ्यर्थना दयितमभिसरेत्यर्थना च दीर्घा चिरकालानुवृत्ता वर्तत इति। अत्र पूर्णोपमा। यस्मात्सर्वमिदमेव वर्तते तत्तस्मात्कारणाद्विलम्बनं कालक्षेपो विफलं निष्फलम्। असावभिसारक्षणः। अवयवेनावयवी लक्ष्यते। अभिसरणकालः। रम्यः रमणीयः। अथवा, अभिसारोऽभिसरणं स एव क्षण उत्सवः। तस्य तव चाभिमततमत्वादभिसरणे उत्सवत्वारोपः। रम्यत्वान्नातिक्रमणीय इति यावत्। अनेनाभिसरणस्य करणे अभ्युदयोऽपि, अकरणे प्रत्यवायोऽपि सूच्यते। वृत्तं शार्दूलविक्रीडितम् ॥ ४ ॥

उक्तकार्यस्य करणे अभ्युदयं प्रयोजनप्रशंसया बोधयति श्लोकान्तरेण— आश्लेषादिति ॥ अन्यार्थमन्यकार्यार्थं गतयोः प्रस्थितयोः भ्रमान्मार्गभ्रंशहेतुभूताद्दिग्भ्रमाद्धेतोः मिळितयोरन्योन्यगात्रसंस्पर्शं प्राप्तयोः सम्भाषणैः का त्वम्, कस्त्वमित्यादिप्रश्नोत्तररूपैः जानतोरवबुध्यमानपरस्परतत्त्वसमुद्यमयोश्च दम्पत्योरन्योन्यानुरागजनितरिरंसाव्याकुलयोर्जायाजारयोः। 'जारस्तूपपतिः' इत्यभिधानात्पतिवम्भावात्तस्मिन् परे जायाया दम्भावः। निशि रात्रौ तमसि सन्तमसे आश्लेषात् स्पृष्टकादिक्रमेण प्रवर्तितादालिङ्गनादनु पश्चाच्चुम्बनान्निमित्तकादिक्रमेण विहितादधरास्वादनादनु अनन्तरं नखोल्लेखात् छुरितकादिनखक्षतकरणाद् अनु पश्चात्। अत्र नखक्षतसहभाविनां मूढकादिदशनच्छेद्यविधीनामप्युपलक्षणमेतत्। स्वान्तजस्य मनोभवस्य उद्भोध उद्दीप्तता। स प्रकृष्टः कृत्यान्तरचिन्तानवकाशः प्रोद्बोधः तस्मात्तदुदयात् अनु अनन्तरम्। अनेन कामशास्त्रविहितप्रकारानुचिन्तनविधानादिसावधानमानसतातिक्रान्ता दशा दर्शिता। सम्भ्रमादितिकर्तव्यभ्रमरूपाद्रतित्वरातिशयाद् अनु पश्चात्। 'शास्त्राणां विषयस्तावद्यावन्मन्दरसा नराः। रतिचक्रे प्रवृत्ते तु नैव शास्त्रं न च क्रमः' ॥ इति वचनात् क्रमविचाराक्षमा दशा सम्भ्रमशब्देनोक्ता मन्तव्या। तदनन्तरं रतानां सुरतविशेषाणामाभ्यन्तराणां यथाप्रतिभानमारम्भात् प्रवर्तनादनु पश्चात्काल इत्यर्थः। प्रीतयोः भावप्राप्तिलाभात्सन्तुष्टयोः यो 'व्रीळाविमिश्रो लज्जासङ्कुलितो रसः सुखं स को नु को नु। वीप्सया आदावेव समग्राभोगत्वमाश्लेषादिक्रियाभिः प्रापितप्रकर्षत्वञ्च प्रत्याय्यते। अतश्चापरिच्छेद्यस्वरूपतया परमानन्दलक्षणतया च स्पृहणीयतातिशयश्च प्रतिपद्यते। एतावानिति निर्देष्टुमशक्य इति यावत्। अन्यचोदनया भारवहनादिवदस्वारस्यनिवर्तनार्थं स्वभावमाधुर्यञ्चाद्यन्तव्यापि द्योतयितुं व्रीळाविमिश्रत्वविशेषणम्। व्रीळैव हि मध्ये मध्ये दर्शित-

तिरोभावाविर्भावा निधुवनविधिषु माधुर्यमादधातीति प्रसिद्धेः। तदाभावे मिथुनकृत्यस्य तिर्यक्चेष्टितनिर्विशेषत्वापत्तेश्च। अत्र स्वभावत एव बाह्याभ्यन्तरसुरतविहृतीनामपरिमितानन्दप्रदत्वेन वर्णितेन किमुत असाधारणप्रणयतादिभिर्लोकोत्तरयोर्युवयोरिति अप्रकृतेन प्रकृते कर्तव्यता प्रकाशितेत्यर्थापत्त्यलङ्कारेण वस्तुध्वनिः। वृत्तं पूर्वमेव ॥ ५ ॥

अथैवं कार्यतया बोधितस्याभिसरणस्य प्रयत्नबाहुल्येऽपि प्रशस्तफलत्वमाह—सभयेति॥ हे सुमुखि शोभनवदने सखि राधे पथि मार्गे तिमिरे तमसि भयेन साध्वसेन यच्चकितं वैक्लव्यं तत्सहितं यथा भवति तथा दृशं नयनं विन्यस्यन्तीं विक्षिपन्तीम्। तमसोऽतिगाढत्वात्किमपि द्रष्टुमशक्यत्वे सत्यपि निम्नोन्नतादिदिदृक्षया मार्गे नयनं विक्षिपन्तीमिति भावः। प्रतितरु प्रतिवृक्षतलं मुहुः पुनः पुनः स्थित्वा गमनश्रमव्यपनयनाय वृक्षमूलेषु प्रत्येकं विश्रम्य विश्रम्येत्यर्थः। पश्चान्मन्दं शनैः पदानि वितन्वतीं पदविक्षेपान् कुर्वतीं कथमपि कृच्छ्रेण रहो विजने प्राप्तामात्मसमीपमागतामनङ्गेन मदनेन तरङ्गितैस्सञ्जाततरङ्गैरङ्गैः करचरणादिभिरवयवैरुपलक्षितान्त्वां पश्यन् विलोकयन् सुभगस्सौभाग्यसम्पन्नः स श्रीकृष्णः कृतार्थतां कृतकृत्यम्मन्यतामुपैतु प्राप्नोतु। अहो सुभगोऽहं कृतकृत्योऽहमित्यात्मानं सम्भावयत्विति यावत्। प्रियतमचित्ताह्लादनाय प्रयतन्ते खलु सर्वनार्यः। तव तु तदन्तिकप्राप्तिपर्यन्त एव प्रयासः। तच्चित्ताह्लादस्तदा त्वद्दर्शनमात्रेणैव सम्पत्स्यत इत्यहो तव सौभाग्यमसाधारणमेवेति भावः। अनेन राधामाधवयोरनितरसाधारणो मिथोऽनुरागपरिपोषः प्रकाशितः। अत्र स्वभावोक्तिकाव्यलिङ्गयोस्संसृष्टिः। हरिणीवृत्तम् ॥ ६ ॥

अथेमं सर्गं समापयितुकामः कविराशिषं प्रयुनक्ति— राधेति॥ देवकीनन्दनः श्रीकृष्णस्त्वावमतु भवन्तं रक्षतु। त्वामिति जातावेकवचनम्। युष्मान्। सामाजिकानित्यर्थः। अथवा, सामाजिकजनाध्यक्षस्य सम्बोध्यत्वादेकवचनम्। तथाच 'पान्तु त्वामकठोरकेतकशिखासन्दिग्धमुग्धेन्दवो भूतेशस्य भुजङ्गवल्लिवलयसङ्नद्धचूडा जटाः' इत्यादिभवभूत्यादिप्रयोगः। कीदृशो देवकीनन्दन इत्याकाङ्क्षायां विशिनष्टि — राधामुग्धमुखारविन्दमधुपः राधाया मुग्धं सुन्दरं यन्मुखं वदनं तदेव यदरविन्दं नळिनं तस्मिन्मधुपः तन्मधुरसपायी भृङ्गः। अनेन पूर्वोक्त एव तयोरन्योन्यानुराग उत्तरसर्गबिन्दुत्वेन निवेशित इति बोध्यम्। किञ्च त्रैलोक्यमौलिस्थल्या भुवनत्रयीसीमन्तस्य नैपथ्ये उत्तंसत्वे उचितं योग्यश्च

तन्नीलरत्नं महेन्द्रमणिश्च तादृशः। अवन्या भूमेर्भारावतारे भारहरणे अन्तकः संहाररुद्रः। भूभारभूतानां दुष्टराजन्यानां वंशविच्छेदरूपे कृत्ये साक्षात्संहाररुद्र एवेत्यनेन दुष्टकुलसमूलोन्मूलनसामर्थ्यमुक्तम्। किञ्च, स्वच्छन्दं स्वैरं यथा तथा व्रजसुन्दरीजनानां गोपकामिनीजनानां मनस्तोषे हृदयसन्तोषणे प्रदोषः रजनीमुखभूतः। 'प्रदोषो रजनीमुखम्' इत्यमरः। प्रदोषस्य सुन्दरीजनमनस्तोषकारित्वं रिरंसानुगुणत्वात्। तथाच माघः — 'मुहुरन्तराळभुवमस्तगिरेः सवितुश्च काचिदमिमीत दृशा' इति। 'सर्वासामपि गोपीनां चित्तसन्तोषदायकः। विशेषतश्च राधाया मुखाब्जमधुपो हरिः॥' इत्यर्थः। चिरं कालान्तरे यत् कंसध्वंसनं कंसनिग्रहः तत्सूचको धूमकेतुः केतुविशेषः। तदवसरं प्रतीक्ष्य व्रजे वसन्नित्यर्थः। स्वच्छन्दं चिरमवत्विति अवनक्रियाविशेषणत्वेनापि योजनीयम्। अत्र निरवयवरूपकमालालङ्कारः। तथा श्रीकृष्णविषयभावध्वनिः ॥ ७ ॥

इति श्रीगीतगोविन्द इति॥ पूर्ववत्। आकाङ्क्षा इच्छा तया सह वर्तत इति साकाङ्क्षस्तादृशः पुण्डरीकाक्षः श्रीकृष्णो यस्मिन् स तथा। सखी राधामानेष्यतीत्याकाङ्क्षया यमुनातीरवानीरकुञ्जे वर्तमानत्वाच्छ्रीकृष्णस्यान्वर्था सर्गसंज्ञेति भावः। पञ्चानां पूरणः पञ्चमः॥

इत्यखिलविद्यापरिवारश्रीमद्दक्षिणामूर्तिमहादेवप्रसादलब्धसाङ्गवेदपूर्वोत्तर-
मीमांसाशब्दतर्कसाहित्यसार्वभौमचरकोण्डुभट्टमहोपाध्यायानुजेन
सर्वाम्बिकागर्भशुक्तिमुक्तामणिना लक्ष्मीधरसूरिणा विरचितायां
गीतगोविन्दव्याख्यायां श्रुतिरञ्जिनीसमाख्यायां साकाङ्क्ष-
पुण्डरीकाक्षसंज्ञपञ्चमसर्गार्थविमर्शः समाप्तः॥

षष्ठः सर्गः

धृष्टवैकुण्ठः

गीतम् ॥ १२ ॥

एवं श्रीकृष्णाभिसरणाय राधां निर्बध्य तदौन्मुख्यसम्पादने कृतेऽपि राधायास्त्रपापारतन्त्र्यं विलोक्य सख्याश्चेष्टितमाह—**अथ तामिति** ॥ अथ राधायाः कृष्णाभिसरणौन्मुख्यसम्पादनानन्तरं सखी गन्तुमशक्तां पदमपि चलितुमपारयन्तीम्। अत्र हेतुमाह—चिरमनुरक्तां चिरकालविरहवेदनाग्लानाङ्गीमिति यावत्। लतागृहे दृष्ट्वा स्वयं विलोक्य तदीयां ग्लानिमपि विचार्य हे सखि राधे त्वमत्रैव वासकसज्जिका वर्तस्व। अहं माधवमत्रानेतुं यतिष्य इत्युक्त्वा गत्वा तच्चरितं तस्या राधायाश्चरितं वृत्तं गोविन्दे श्रीकृष्णे विषये प्राह उक्तवती। कीदृशे गोविन्दे—मनसिजेन मन्मथेन हेतुना मन्दे अलसे। अथवा, मनसिजविषये मन्दे अनुत्साहे। अनेनैतद्द्योत्यते—स्नेहाधिक्यात्सोत्साहयापि सख्या सम्पादितस्सम्भोगो न स्वारसिकस्य यादृच्छिकस्य बाह्यस्यापि वा सम्भोगस्य षोडशीमपि कलां लभत इत्युदासीन इति। तच्च युक्तं पूर्णानन्दस्य पुरुषोत्तमस्य भक्तवात्सल्यव्रतावकीर्णिताभयादेवाङ्गीकृतेदृशविलासस्येति वेदितव्यम्। तच्चरितं गोविन्दे प्राहेति सख्या राधायां प्रेमविस्रम्भादिकं प्रकाशयति। प्राहेति भूते प्रयोगस्तु 'आहेति भूते णलन्तभ्रमात्' इति वामनसूत्रस्य बालशिक्षातात्पर्योपक्षीणमूलत्वात् प्रयोगबाहुल्याच्च साधुरिति वेदितव्यम्। अत्रानुप्रासः स्वभावोक्त्या विजातीयया संसृष्टः। वृत्तमार्या नाम मात्रावृत्तम्। तल्लक्षणन्तु—'यस्याः पादे प्रथमे द्वादशमात्रास्तथा तृतीयेऽपि। अष्टादश द्वितीये चतुर्थके पञ्चदश सार्या ॥' इति श्रुतबोधे, 'लक्ष्मैतत्सप्तगणा गोपेता भवति नेह विषमे जः। षष्ठो यत्र लघुर्वा प्रथमेऽर्धे नियम आर्यायाः ॥' इत्यादिवृत्तरत्नाकरे श्लोकद्वयोक्तं द्रष्टव्यम् ॥ १ ॥

अथ सखी प्राहेति यदुक्तन्तद्गीतेनाह—**पश्यतीत्यादि** ॥ अत्र यद्यपि येन केनापि रागेणौचित्यानुगुणं गातव्यमित्येव पर्यवस्यति, तथापि कश्चिदवष्टम्भः कल्पनीय इत्यभिप्रायेण शङ्कराभरणरागेणेत्युक्तम्। 'भृङ्गादिव सरोरुहिणीं स्वामङ्गनान्नवरसामभिचुम्बन्। अङ्गार्तिभृदनङ्कुशचारी शङ्कराभरणराग उपास्यः ॥' इति तदुपस्थानविधिः। अटताललक्षणं प्रागुक्तम्। नाथेत्यादि

गृह इत्यन्तं ध्रुवपदम् । तस्यार्थः — हे नाथ अनाथसाधुरक्षक हरे सर्वार्ति-संहारक राधा वासगृहे लतागृहे सीदति अवसादं प्राप्नोति । विषीदतीति यावत् । ध्रुवपदस्यावर्तनीयत्वान्मध्ये जगन्नाथ गोपीनाथ विश्वनाथेत्यादयो यथाप्रतिभानं प्रयोक्तव्याः । अवसादप्रकारान्निवेदयति—पश्यतीत्यादिभिः पादैः । दिशि दिशि भवन्तं पश्यति सर्वासु दिक्षु त्वां प्रत्यक्षमालोकयति । भावनया साक्षाद्वीक्षत इत्यर्थः । 'कृष्णोऽग्रे पार्श्वयोः पश्चात् कृष्णो ह्येष विदिक्ष्वपि । रमयन्नितरा गोपीः किमयम्मामुपेक्षते ।' इति मन्वाना त्वां वीक्षत इत्यर्थः । किञ्च, तासां पूर्वदृष्टानामधुना सङ्कल्पदृष्टानाञ्च स्वव्यतिरिक्तानां गोपीनामधरे यानि मधुरमधूनि तानि पिबन्तमास्वादयन्तञ्च पश्यति साक्षात्करोति । अथवा, त्वच्छब्दस्य सर्वादिषु पठितस्यान्यशब्दपर्यायत्वात्त्वदधरेति पाठः श्रेयान् । अक्लिष्टार्थत्वात् । अन्यासामधरमधूनि पिबन्तमिति । अत्र प्रथमसर्गे 'कापि कपोलतले मिळिता लळितं लपितुं किमपि श्रुतिमूले । चारु चुचुम्ब नितम्बवती दयितं पुळकैरनुकूले ॥' इत्यादिना वर्णितानां विहाराणां दृष्टत्वात्तत्प्रकारानेव सङ्कल्पसन्निधापितान् साक्षात्प्रेक्षत इति भावः । एवं भ्रान्तिदर्शनस्य रत्युद्दीपकत्वादवसीदतीत्यर्थः ॥ १ ॥

नन्वहमिह निवसामि । त्वं याहि । मद्वचनेन राधामनुनय । आनयेथाश्चेति मयोक्ता गत्वा तामिह किन्नानीतवतीत्यत्राह— त्वदभीति ॥ हे हरे संश्रितार्तिहर मया त्वदादेशेन गत्वानुनीता सती वीतरोषा सानुरागा त्वामभिसर्तुमेवोद्यता । तदानीं त्वदभिसरणे रभसेन वेगेन चलन्ती गाढान्धकारेण रागान्धकारेण च मार्गभ्रंशवशात्तिर्यग्गच्छन्ती मया पथि प्रतिनिवर्तिता कियन्ति स्वल्पानि पदानि पदन्यासान् चलन्ती सञ्चरन्ती च सती पतति चलितुमप्यशक्ता भूमौ पतिता शेते । न पुनः प्रतिनिवर्तते । एवञ्च सीदतीत्यन्वयः ॥ २ ॥

विहितेति ॥ विहिता निर्मिता विशदानां नूतनानीतत्वाद्धवळानां बिसानां मृणाळानां किसलयानां पल्लवानाञ्च वलया भूषणविशेषा यस्यास्तादृशी सती पुनस्तव रतिकलया त्वत्कर्तृकया भविष्यन्त्या रतिकलया क्रीडाचातुर्येण । आशाविषयीकृतयेति शेषः । परं केवलम् । न तु मदीयेन शिशिरोपचारकौशलेनेत्यर्थः । जीवति प्राणान् धारयति । इह तव रतिकलयेत्यन्वयः । अत्रागत्य तव रतिकलानुभवं माविनं सम्भाव्य तद्वशेन केवलं प्राणितीति भावः । एवं सीदतीत्यन्वयः ॥ ३ ॥

मुहुरिति ॥ हे नाथ राधा मुहुः पुनः पुनरवलोकिता दृष्टा मण्डन-लीला अभिसरणोचिताभरणधारणरूपा लीला विलासो यया तादृशी सती। मुहुरित्यनेन मध्ये मध्ये दीर्घोष्णनिश्वासबाष्पाद्याविर्भावादस्थिरचित्तत्वाच्च सम्य-गवलोकनासम्भवात्पुनः पुनरवलोकनमिति द्योत्यते। तादृशी सती औत्सुक्य-मात्रेण प्रस्थिताप्यहं प्राणनाथमभिसर्तुं न शक्नोमि। तदत्रैव स्थित्वा एवं करोमीति धिया त्वदनुस्मरणशरणा भूत्वा अहं मधुरिपुः श्रीकृष्ण एवास्मीति भावनशीला ध्यानतत्परा च सती। मुहुरित्यत्रापि योज्यम्। पुनः पुनस्समाधिभङ्गप्रसङ्गात् सीदतीत्यन्वयः ॥ ४ ॥

त्वरितमिति ॥ हे हरे राधा अनुवारं प्रतिक्षणमित्यर्थः। हे सखि हरिः श्रीकृष्णः कथं केन प्रकारेण। प्रकारवैविध्यसम्भवात्प्रश्नावकाशः। अभिसारमभिसरणं मत्समीपागमनं त्वरितन्नोपैति न प्राप्नोति। केन प्रकारेण न करोतीति यावत्। त्वरितमागमिष्यामीत्युक्त्वा कालेनैतावतापि नागत इति सखीं वयस्याम्। मामित्यर्थात्। वदति पृच्छति। प्रतिक्षणं पृच्छया प्रस्तुत-विस्मरणमपि प्रतिक्षणं व्यज्यते। एवमसम्बन्धप्रलापिनी सीदतीत्यन्वयः ॥ ५ ॥

श्लिष्यतीति ॥ हे नाथ राधा मदुक्तं न शृणोति। किञ्च हरिरुपगत इत्यनल्पं जलधरकल्पं तिमिरं श्लिष्यति आलिङ्गति चुम्बति च। आश्लेषस्य चुम्बनस्य चालक्षत्वज्ञानान्मध्ये मध्ये सीदतीत्यन्वयः। जलधरकल्पत्वादनल्प-त्वाच्च तिमिरस्य त्वदागमनभ्रान्तिकरत्वं सर्वेषामपि विद्यत एव। किमुतास्वस्थ-मनसस्तस्या इत्यर्थापत्तिध्वनिः ॥ ६ ॥

भवतीति ॥ त्वयि विलम्बिनि विलम्बितवति सतीत्यनेन त्वं श्रीकृष्ण-मभिसर्तुं प्रस्थितासि, न तु श्रीकृष्णस्त्वामभिसरतीति निवेदितापि तन्न शृणोतीति सूच्यते। स्वनिश्चिते त्वदागमने विलम्बदर्शनाद्विगलितलज्जा त्यक्तत्रपा सती स्वयं वासकसज्जा किलेति निश्चयेन विलपति अहो कितवो नागतः किल, वञ्चित-वानेव मामित्यादि वदति। वक्तुमशक्ता गद्गदिकादिलुप्तवर्णस्वरवचना सती रोदिति अश्रु मुञ्चति च। इतः परमपि बहवोऽवसादप्रकारास्सन्ति। किं वा निष्फलैस्तैर्वर्णितैरिति भावः। एवं बहुधा राधा सीदतीत्यन्वयः ॥ ७ ॥

श्रीजयेति ॥ श्रीजयदेवकवेरुदितमुद्भूतमिदं गीतम्। षष्ठीपक्षे तस्य उदितं वचनम्। सूक्तमित्यर्थः। रसिकजनं सङ्गीतसाहित्यरसज्ञं जन-

मतिमुदितमतीव सन्तुष्टमानसं तनुतां करोतु। 'तनु करण' इत्यस्माद्धातोरुभयपदिनो लोटि त इत्यस्य 'टित आत्मनेपदानां टेरे' इत्येत्वमास्य 'आमेत' इत्येत आमादेशो रूपमिदम् ॥ ८ ॥

अथ श्लोकाभ्यां राधाचरितमावेदयति—विपुलेति॥ हे कितव धूर्तवृत्तिपर हे श्रीकृष्ण। अन्यानुरक्तस्सन्नुदासीनतामालम्ब्य चिरानुरक्तामनन्यशरणां त्वद्विरहवेदनावशात्प्राणसंशयं प्राप्तां तां राधां न धिनोषीति कितवशब्देन यदुपालम्भनं तद्राधाकर्तृकञ्चेद्यथा रसानुगुणं तथैव तत्सखीकर्तृकमपीत्यवसेयम्। तदेकाश्रयत्वात्तस्यास्तद्विरहोत्कण्ठाकुण्ठितविवेकत्वाच्चेति मन्तव्यम्। मृगाक्षी सुन्दरी राधा रसजलनिधिमग्ना रसः शृङ्गाररसः स एव यो जलनिधिरपारत्वात्समुद्रः तस्मिन्मग्ना दूरावगाढा। ध्यानलग्ना ध्यानं त्वद्रूपानुसन्धानं तत्र लग्ना आसक्ता सती अनन्यशरणत्वात्तदेव शरणं मन्वाना तव चिन्तां विधत्ते त्वदनुस्मरणमेवाचरति। कथमित्याशङ्कायां चिन्ताविधानक्रियाविशेषणमाह — विपुलपुळकपाळीस्वेदसीत्कारम्। पुळकपाळी रोमाञ्चपरम्परा। स्वेदो घर्मजलम्। सीत्कारो ध्वनिविशेषः। तेषां द्वन्द्वः। विपुला निरन्तरप्रवृत्ताः पुळकपाळीस्वेदसीत्कारा यथा भवन्ति तथा। अनेन विशेषणेन विशेष्यभूतस्य चिन्ताविधानस्यापि नैरन्तर्यं गम्यते। किञ्च, अन्तरभ्यन्तरे जनितो जडिमा शैतल्यं कार्यान्तरानभिज्ञता वा यथा भवति तथा। एवं त्वच्चिन्तनस्य फलरूपतयाऽन्तश्शैत्यं ततस्तापशान्तिश्च तस्या जायते यथा तथेत्यर्थः। तस्यास्तात्कालिकं विशेषणमाह — काकुः कारणभूतभीतिशोकासूयामर्षादिजनितो ध्वनिभेदः। 'काकुः स्त्रियां विकारो यश्शोकभीत्यादिभिर्ध्वनेः' इत्यमरः। तादृग्लक्षणया काका व्याकुलं सम्मिश्रं यथा भवति तथा व्याहरन्ती यत्किञ्चिद्भाषमाणा सती। चिन्तने कर्तव्ये यत्किञ्चित्तदनुगुणं जप्यमप्यावर्तनीयमिति न्यायात्तत्स्थानीयतया काकुगद्गदिकादिपुरस्सरं त्वदुपालम्भवचनञ्चाभिदधानेत्यर्थः। इतीदृश्यामपि तद्दशायां श्रुतायान्निर्विकारतया सम्बोधयति —मन्दकन्दर्पेति। मन्दः कन्दर्पो यस्य तस्य सम्बुद्धिः। सौन्दर्यसौभाग्यमारस्यादिसम्पन्नस्यापि तव निर्व्यवसायतया निष्कामत्वम्, ततश्च नीरसप्रायता च मया निश्चीयत एवेति यावत्। नो चेत्त्वरयोपेत्य सा त्रातव्येति भावः। अत्रानुप्रासो रूपकञ्च जलगर्भतपस्यापरयोगिव्यवहारारोपात्समासोक्तिश्चालङ्कारः। सप्रपञ्चो रसध्वनिश्चालङ्कार्यः। मालिनी वृत्तम्। 'वसुमुनिविरतिश्चेन्मालिनी नौ मयौ यः' इति तल्लक्षणम् ॥ २ ॥

पुनरपि सखी राधाया दशान्तरं सप्रपञ्चं विज्ञापयति — अङ्गेष्विति॥ हे नाथ एषा राधा दुःस्थहृदयापि मया कथञ्चिदनुनीय, हे सखि त्वमत्रैव वासकसज्जा वर्तस्व, अहं त्वत्प्रियमत्रानेतुं यतिष्य इति प्रतिबोधिता प्रकृतिं प्रपद्य वर्तते। तत्प्रकारोऽपि विचित्रतया श्रोतव्य इति निवेद्यते—अङ्गेष्वाभरणं करोति बहुशः, बहुश अनेकवारम्। आभरणमिति जातावेकवचनम्। उत्तंसमणिताटङ्कनासामौक्तिकग्रैवेयाङ्गदकटकाङ्गुलीयहारकाञ्चिमञ्जीरादिकमाभरणजातमङ्गेषु करोति न्यस्यति। बहुश इत्यनेन योजितस्यापनयनं पुनरपि योजनञ्च ज्ञाप्यते। पत्रे शुष्कपर्णेऽपि वायुवशात्सञ्चारिणि चलति सति त्वां प्राप्तं परिशङ्कते अहो श्रीकृष्ण आगत इति मन्यते। अत्रापि बहुश इति योज्यम्। शय्यां कुसुमशयनीयं वितनुते पूर्वमेव कल्पितं मुहुर्विस्तारयति। प्राप्तस्य तवावस्थानायेति शेषः। अतश्चादरातिशयो ध्वन्यते। चिरं दीर्घकालं ध्यायति त्वदनागमनकारणं विमृशति। इत्यनेन प्रकारेण उक्तानामेव, आकल्परचना विकल्परचना तल्परचना सङ्कल्पश्च तेषां द्वन्द्वः। तेषामनुक्तानां लीलानाञ्च यच्छतं बह्वावृत्त्वात्सङ्ख्याबाहुल्यम्। तत्र व्यासक्ता तदेकविनोदना। अपिर्विरोधे। एवं बहुविनोदनापि सती वरतनुस्सुन्दरी एषा राधा त्वया विना निशात्र नेष्यति त्वद्रहिता चेदिमामेकामपि रात्रिं गमयितुं न पारयिष्यतीत्यर्थः। अतस्त्वया दयानिम्नमनसा त्वरिततरमेव तत्रागत्य सानुग्राह्येति तात्पर्यम्। त्वया विनेति 'पृथग्विना' इत्यादिना विकल्पेन तृतीया। अत्र छेकानुप्रासस्य व्यापित्वम्। रागिणीस्वभाववर्णनात्पूर्वार्धे स्वभावोक्तिः। पूर्वार्धगतवाक्यानां क्रमेण तृतीयपादे पदैः क्रमिकैरन्वयाद्यथासङ्ख्यम्। अन्तिमवाक्ये श्रीकृष्णेन विना राधाया निशानयनसामर्थ्यरूपस्य शोभनत्वस्याभावकथनाद्विनोक्तिः। इत्येषां संसृष्टिः। 'विना किञ्चिदन्यस्य सदसत्त्वाभावे विनोक्तिः' इति सूत्रात्। वृत्तं शार्दूलविक्रीडितम् ॥ ३ ॥

अथ सर्गसमापनाय कविरात्माभिमतां देवतां नमस्यति—किमित्यादि॥ हे भ्रातः सखे पान्थ पथिक त्वं सायं सायङ्काले समासन्ने भाण्डीरभूमीरुहि भाण्डीरकाख्ये वटवृक्षे। तन्मूल इत्यर्थः। किं विश्राम्यसि किमर्थमत्र स्थित्वा श्रमापनयने प्रवृत्तोऽसि। इतः अस्माद्देशात् सानन्दनन्दास्पदं सानन्दमानन्देन सहितं नित्योत्सवविशिष्टत्वादखिलजनश्रमहारि नन्दगोपगृहं न दृष्टिगोचरम्। अत्र काका दृष्टिगोचरमेवेत्यर्थः। ननु किञ्चिदिह विश्रम्य गमने को दोष इत्यत्राह

—कृष्णेति । कृष्णभोगिनः कृष्णसर्पस्य भवनमिदं भाण्डीरसमीपमित्यर्थः । अतः कालदेशानौचित्यादिह मा मनागपि स्थाः । त्वरितं नन्दगृहं गत्वा श्रममपनयेति यावत् । तत् तादृशं राधायाः । वनभुवि कृष्णं प्रतीक्ष्य तिष्ठन्त्या इत्यर्थात् । वचनमध्वगमुखात् अध्वगस्य तद्वचनप्रत्ययाद्द्रुतमेव नन्दगोपगृहं प्राप्तस्य मुखात् । गळितमिति शेषः । नन्दान्तिके पितुस्समीपे गूहतो गूहितुमाच्छादयितुमिच्छतो गोविन्दस्य श्रीकृष्णस्य सायमतिथिप्राशस्त्यगर्भा गिरो जयन्ति । सायं गृहं प्राप्तोऽतिथिः सूर्योढ इत्युच्यते । तस्य यानि प्राशस्त्यानि गृहपतिसुकृतवर्धनत्वादीनि तद्गर्भाः तत्प्रतिपादनपरा गिरो वाचः जयन्ति सर्वस्मादुत्कर्षेण वर्तन्ते । ताश्च 'घृतकुम्भसहस्रेण समिद्भारशतेन च । हुतमादाय गच्छेत्स यस्सायं नुद्यतेऽतिथिः' इति स्मृतिवचसोऽर्थविवरणपरा वाच इति यावत् । यदुक्तं मुरारिणा—'हन्त यथाधर्ममेतत् । 'यत्पीयूषमयूखमालिनि तमःस्तोमावलीढायुषान्नेत्राणामपमृत्युहारिणि पुरस्सूर्योढ एवातिथौ । अम्भोजानि पराञ्चि तन्निजमघं दत्त्वेव तेभ्यस्ततो गौराङ्गीवदनोपमासुकृतमादत्ते पतिर्यज्वनाम् ॥' इति । तदेवोक्तं मुरारिणापीति ध्येयम् । तथाविधा वाचः स्मृत्यर्थसारप्रतिपादकत्वात्सर्वोत्कृष्टा वर्तन्त इत्यतस्ता नमस्याम इति कवेर्भावः प्रकाश्यते । नन्दान्तिके गूहत इत्युक्त्या गूहनीयोर्थस्त्वत्र कृष्णश्चासौ भोगी स्त्रीसम्भोगी च कृष्णभोगी तस्य भवने रतिसङ्केतगृहायमाण इति । अत्र श्लेषालङ्कारः ॥ ४ ॥

इति श्रीगीतगोविन्द इति । सोत्कण्ठः उत्कण्ठया सह वर्तमानो वैकुण्ठः श्रीकृष्णोऽस्मिन्निति तथा । षण्णां पूरणः षष्ठः । षट्कतिकतिपयचतुरान्थुक्

इत्यखिलविद्यापरिवारश्रीमद्दक्षिणामूर्तिमहादेवप्रसादलब्धसाङ्गवेदपूर्वोत्तर-
मीमांसाशब्दतर्कसाहित्यसार्वभौमचरकोण्डुभट्टमहोपाध्यायानुजेन
सर्वाग्निकागर्भशुक्तिमुक्तामणिना लक्ष्मीधरसूरिणा
विरचितायां श्रुतिरञ्जिन्यां षष्ठः सर्गः ॥

सप्तमः सर्गः

नागरकनारायणः

गीतम् ॥ १३ ॥

एवं यमुनातीरवानीरनिकुञ्जे राधाया आगमनं प्रतिपाल्य स्थिते तदनागमनादकुण्ठोत्कण्ठाकुण्ठिते वैकुण्ठे तत्प्रस्थानतन्नियोगयोरन्यतरलाभार्थं निवेद्य वृत्तं विळम्बितायां सख्यां राधाया दुरवस्थां प्रस्तावयितुमुद्दीपनवस्तुजातमूर्धाभिषिक्तस्य चन्द्रस्याविर्भावमाह कविः—अत्रान्तर इत्यादिश्लोकेन। अत्रान्तरे अस्मिन्नवसरे इन्दुः चन्द्रश्च वृन्दावनस्याभ्यन्तरमंशुजालैः किरणनिकरैरदीपयत प्रकाशयति स्म। स कीदृश इत्याकाङ्क्षायामाह— स्फुटा प्रकटा लाञ्छनस्य श्रीः कळङ्कस्य काळिमा यस्य। प्रत्यक्षीभूतनिजलक्ष्मलक्ष्मीक इत्यर्थः। अनेन चन्द्रस्य पूर्णता व्यज्यते प्रायेण। पञ्चषाभिरेव कलाभिर्न्यूनता। सा च श्रीकृष्णसेवासमुद्यतस्य हिमघनाद्यावृतिराहित्येन चान्तर्बहिरौज्ज्वल्यातिशयादलक्षणीयेति यावत्। 'स ते हि जायेत शिते सुलक्षता' इति श्रीहर्षोक्तनीत्या धावळ्यधळधळायमाने चन्द्रे कळङ्ककाळिम्नस्सुलक्षत्वमवसेयम्। काळिम्नां मालिन्ये सत्यपि श्रीशब्देन, प्रतिपादनं 'मलिनमपि हिमांशोर्लक्ष्म लक्ष्मीन्तनोति, इति काळिदासेन ख्यापितत्वादिति मन्तव्यम्। अत्रोत्प्रेक्षते—कुलटानामसतीनां कुलस्य वर्त्मनः प्रियतमाभिसरणमार्गस्य घातेन विहननेन सञ्जातं जनितं यत्पातकं महापापम्। भूतद्रोहस्य निष्प्रयोजनस्य महापातकत्वस्मरणादिति भावः। तद्यस्य स तथा। लाञ्छनं पातकत्वेनाध्यवस्य तद्धेतुत्वेन वर्त्मघातस्य सम्भावनादतिशयोक्तिमूला हेतूत्प्रेक्षेयम्। सा च वर्त्मघातस्य पातकत्वं स्मृत्यभिधेयं व्यनक्तीत्यलङ्कारेण वस्तुध्वनिः। किञ्च, प्राच्या दिश एव सुन्दर्या नायिकाया वदने मुखे चन्दनबिन्दुः मलयजद्रवकणरूपः। सुन्दर्या स्त्रिया ललाटे रचितश्चन्दनतिलको यथा मुखमखिलं तद्द्वारा शरीरमपि सम्यक्प्रकाशयति, तथा पूर्वाशामुखं तत्पुरस्कारेण रोदोविवरान्तर्वर्तिपदार्थजातमपि सम्यक्प्राकाशयदिति द्योतयितुमिदं विशेषणम्। अत्र समासोक्तिरूपकयोरङ्गाङ्गिभावसङ्करः। यद्वा, सावयवरूपकमेव। 'वृत्तं वसन्ततिलकं तभजा जगौ गः' ॥ १ ॥

एवमुदिते चन्द्रे तेन वृन्दावनान्तराळभुवि च उद्दीपितायां राधावृत्तमाह—प्रसरतीति ॥ शशधरबिम्बे चन्द्रमण्डले प्रसरति उदीयोद्गच्छति सति

माधवे विहितविळम्बे कृतकालक्षेपे सति च सा राधा उच्चैर्मुक्तकण्ठं विरचिताः कृता विविधा विलापाः परिदेवनानि यथा भवन्ति तथा परितापं चकार कृतवती। अत्र वृत्तमार्या ॥ २ ॥

तमेव प्रकारं गीतेनाह—कथितेति ॥ आहरिरागेण गीयत इति। तत्स्वरूपन्तु—'शेखरितदिव्यकुसुमः श्रीहरिविधिशर्वशक्रपारिषदः। आहरिरनुषसि भाव्यः शोकरजोहरणकर्मखरपवनः' इति। झम्पताळेन वाद्यत इति। 'लघुर्गुरुः प्लुतश्च स्यात् झम्पोऽसौ तावदन्तरः' इत्यपि तल्लक्षणम्। यामीत्यारभ्याहमित्यन्तं ध्रुवपदम्। तस्यार्थः। हे इति सम्बोधनाभिव्यक्त्यर्थमव्ययम्। केवलस्य च तस्य प्रयोगः सखीजनस्याप्यविश्वास्यतान्द्योतयति। व्यापक ईश्वर एवात्र सम्बोध्य इति मन्तव्यम्। हे ईश्वर अहं कं शरणं यामि कं पुरुषं रक्षितारं प्राप्नोमि। महत्यामप्रतिविधेयायामापदि कं रक्षकं प्राप्नोमि। न कोऽपि रक्षिता लभ्यत इत्यर्थः। इहास्मिन् वने, अथवा इहलोके। यद्वा, इहापदि। का पुनस्तवापदागतेत्याशङ्कायामाह—अहं सखीजनवञ्चिता। अस्मीति शेषः। आबाल्यादियन्तं कालं प्राणनिर्विशेषः सखीजनः इदानीं वचनैर्मामवञ्चयत्। हे सखि राधे त्वमत्रैकाकिनी मुहूर्तं यथाकथञ्चिद्वर्तस्व। अहं श्रीकृष्णं शीघ्रमत्रानेष्यामीति मां वञ्चयित्वा यत्र कुत्रापि गतस्सखीजनः। मम च वेदना महती वर्तते। कोऽपि रक्षिता मया न लभ्यते। तदहं किं करोमीत्यर्थः। ननु श्रीकृष्णे सक्ता तदेकशरणा चासि, तमेव शरणमुपेहीत्यत्राह—हरिः श्रीकृष्णः कथितसमयेऽपि सङ्केतितेऽपि काले वनं मदधिष्ठितं काननदेशं न ययौ न प्राप्तवान्। अत्यन्तापह्नवेऽपि लिड्वक्तव्य इत्यपरोक्षत्वेऽपि लिट्। अन्यैरज्ञात एवात्रागमिष्यामीति सङ्केतं विधाय तदुचितं समयमपि निश्चित्य तस्मिन् समये तथा गूढन्नागतवान्। अतो वञ्चकं कथन्तं शरणं यातुं शक्यत इति भावः। तर्हीदानीमागमिष्यति श्रीकृष्णः, क्षणं क्षमस्वेति चेत्तत्राह--अहहेति। खेदो महान् सोढुन्न शक्यत इत्यर्थः। कस्ते खेदहेतुरित्यत्राह—ममेदं यौवनं विफलम्। 'न पुनरेति गतं चतुरं वयः' इति प्रसिद्ध्या यौवनस्य गतस्य प्रत्यावृत्त्यभावात् चिरकाङ्क्षितार्थसिद्धिविध्वंसके सङ्केतितं समयमपि विस्मृतवति कृतघ्नतां गते श्रीकृष्णे मद्यौवनस्य वैफल्यं जातमेवेति भावः। यौवनं विशिनष्टि—अमलं निस्तुषं रूपं सौन्दर्यं यत्र तादृशमपि। सर्वातिशायिसौन्दर्यसौभाग्यादिसम्पन्नस्य श्रीकृष्णस्योपभोग्यत्वेन विधिना निस्तुषत्वेन सृष्टमपीत्यर्थः। अत

एव खेदस्यापरिहार्यत्वं द्योतितम्। अत्र स्वगुणप्रशंसा राधायाः, 'स्वगुणाविष्क्रियादोषो नात्र भूतार्थशंसिनः' इति न्यायाद्वास्तवत्वाददोष इति बोध्यम्। अत्र वाक्यार्थहेतुकं काव्यलिङ्गमनुप्रासेन संसृष्टम्॥

यदिति॥ किञ्च यस्य श्रीकृष्णस्यानुगमनायानुसरणाय। अन्वेषणायेति यावत्। निशि रात्रौ गमनमपि शीलितं सञ्चरणमपि कृतम्। मयेति शेषः। रात्रौ गमनं निषिद्धमेव। विशेषतः स्त्रीणाम्। तादृशं निषिद्धकर्मापि मया तदन्वेषणपरया कृतम्। स पुनः किं कृतवान्—तेन श्रीकृष्णेन इदं मम हृदयं मनः असमशरकीलितम् असमशरेण प्रयोज्यकर्त्रा कीलितं सञ्जातकीलं कारितम्। कीलः शङ्कुः। शल्यमिति यावत्। कामो मे हृदयं शल्यप्रोतं कृतवान्। श्रीकृष्णस्तथा कारितवानिति भावः। अतः कृष्णस्य कृतज्ञता कथं वक्तव्येति व्यज्यते ॥ २ ॥

ममेति॥ किञ्च मम मरणमेव वरम् दुःखभारवहनदुरपोहाज्जीवितान्मे मृतिरेव साधीयसीत्यर्थः। अतिवितथमत्यन्तमृषाभूतं केतनं सङ्केतो यस्यास्सा तादृशी। श्रीकृष्णस्यानागमनान्निष्फलीभूतसङ्केतेत्यर्थः। अत एवाचेतना आमूलविलुप्तविवेका। इतिकर्तव्यतामूढेति यावत्। तादृशी च सती अहं किमिति कस्मात्कारणाद्विरहानलं श्रीकृष्णवियोगज्वरसन्तापरूपं वह्निं विषहामि विविधं सहामि मृष्ये। अचेतनत्वप्रयुक्तादविवेकादृते किमपि कारणं [विवेकोदये सति] तस्य नास्त्येवेति भावः। अत्र विषहामीति चौरादिकात्सहेराधृषीया 'दाधृषाद्वे'ति विकल्पितणिच्काणिजभावे लटि विपूर्वाद्रूपमिदम्। दैवादिकस्य सहेरनुदात्तेत्त्वादात्मनेभाषत्वात्। 'परिनिविभ्यस्सेवे'त्यादिना षत्वम्। तादृशी कं शरणं यामि। न कमपि शरणं यामि। सहसा म्रिय एवेति यावत्। अनेन सर्वत्र नैराश्यं ध्वनितम् ॥ ३ ॥

दहहेति॥ हरेः श्रीकृष्णस्य विरहो वियोग एव यो दहनो वह्निस्तस्य वहनेन धारणेन हेतुना वलयादिमणिभूषणं कङ्कणाङ्गदहारादिकं कनकरत्नविनिर्मितमाभरणम्। जात्येकवचनमिदम्। सर्वाभरणानीत्यर्थः। बहु अनल्पं दूषणं जनकर्तृकं कुत्सनं यस्य तादृशं लोकापवादरूपदोषभूयिष्ठं कलयामि मन्ये। दहह इति खेदे। कृष्णवियुक्तायाः भूषणधारणमयुक्तमित्येतदियन्तं कालं नालोचितम्। इदानीन्तदवबुद्धमिति भावः। अथवा, हरिविरहदहनवहनेन

तदविनाभूतधूममषीलेपजनितानि बहूनि भूषणानि वर्णहानिमलिनतादिकानि यस्य तादृशं वलयादिमणिभूषणं कलयामि धारयामि। इहह अतिकष्टमिदम्। दुर्लभवल्लभाया दौर्भाग्यमालिन्यपौनरुक्त्यापादकत्वात्परिहास्यमेवैतद्धारणमिति भावः। अतः कमिह शरणं यामीत्यन्वयः। अत्रोज्ज्वलानामपि मणिभूषणानां हरिविनाभावे अनुज्ज्वलत्वप्रतिपादनाद्विनोक्तिरलङ्कारः। सा च विना विनाशब्दं तत्पर्यायविरहशब्दनिष्पादितेति भेदः। तस्याश्चानुप्रासेन संसृष्टिः ॥ ४ ॥

मामिति॥ मधुरा मनोरमा च सा मधुयामिनी वासन्तिकी रात्रिश्च मधुरमधुयामिनी। सा कर्त्री। इहास्मिन्वने मां विधुरयति दुःखितां करोति। विधुराशब्दात्तत्करोतीति णिचि टिलोपः। किञ्च, कृतानि पूर्वजन्मसु सञ्चितानि सुकृतानि पुण्यानि यया सा कृतसुकृता। कृतसुकृता च सा कामिनी च कृतसुकृतकामिनी। अथवा, कृतैस्सुकृतैः कारणभूतैः कामः श्रीकृष्णाभिलाषोऽस्या अस्तीति वा। अस्मिन् पक्षे 'न कर्मधारयान्मत्वर्थीयः' इतीनेर्निषेधो न शङ्क्यः। तस्यानित्यत्वात्। अनित्यत्वञ्च सूत्रकारेण 'एकदेशिनैकाधिकरणे' इति वदता ज्ञापितम्। 'सर्वधनी सर्वकेशी'इति भाष्यकारवचनेन च। अत एव 'आ कैलासाद्बिसकिसलयच्छेदपाथेयवन्तस्सम्पत्स्यन्ते' इत्यादयो महाकविप्रयोगाः। अनेन 'प्रियमनुसुकृतां हि स्वस्पृहाया विळम्बः' इति श्रीहर्षस्य, 'सद्य एव सुकृतां हि पच्यते कल्पवृक्षफलधर्मि काङ्क्षितम्' इति काळिदासस्य च वचनानुसारेण कृतसुकृतायास्तस्यास्सद्य एवाभीष्टसिद्धिर्जातेति तस्यास्स्तवनेन अकृतसुकृताहमित्यात्मनि निन्दा व्यज्यत इति व्याजस्तुत्यलङ्कारः। 'उक्तिर्व्याजस्तुतिर्निन्दास्तुतिभ्यां स्तुतिनिन्दयोः' इति लक्षणात्। तादृशी कापि काचिद्गोपी हरिं श्रीकृष्णमनुभवति एकाकिनं विजने प्राप्तमनुभुङ्क्ते ॥ ५ ॥

कुसुमेति॥ अतिविषममतिक्रूरं शीलं यस्यास्तादृश्या अतनोरनङ्गस्य शराणां बाणानां लीलया विलासेन हेतुना। न तु पराक्रमप्रक्रमेण। स्रगपि कुसुममालापि हृदि हन्ति हृन्मर्मणि प्रहरति। कीदृशीं माम्—कुसुमसुकुमारी पुष्पवदत्यन्तमृद्वी तनुर्यस्यास्ताम्। शिरीषादपि मृद्वङ्गी त्वमिति सखीनां वाचं मत्प्रशंसापरां मन्यमानाहमिदानीं सत्यमुच्यते ताभिरिति श्रद्दधे। यतस्स्रगपि

मां हृदि हन्ति। इति स्वगुणेऽपि दोषपर्यवसायित्वेन निन्दाव्यक्तिः। अत्र वाक्यार्थेन पदार्थसमर्थनरूपं काव्यलिङ्गम् ॥ ६ ॥

अहमिति॥ अत्र यदिशब्दस्य उपरि दूरस्थितेनापिशब्देनानुषङ्गः सिंहावलोकितन्यायेन कार्यः तद्वशात्पुनस्तदनुगुणस्तथापीत्यध्याहारश्च। यद्यप्यहमिहास्मिन् प्रदेशे नविगणिता अबहुमता वेतसा वञ्चुळतरवो यया तादृशी सती। अचिन्तितवञ्चुळतरुमध्यवासदुःखेति यावत्। निवसामि निर्विनोदमवतिष्ठे। तथापि मधुसूदनः श्रीकृष्णः मां चेतसा न स्मरत्यपि। अपिस्सम्भावनायाम्। कुत्रापि दुःखबहुळेऽपि देशे स्थित्वा अन्यवैमुख्येन स्वमेव समुपास्य वसताञ्जनानामीश्वरस्सन्तुष्यतीति प्रसिद्धिरपि मन्दभाग्यायाम्मयि विपर्यस्तैवेत्यभिप्रायः। स्मरतीत्युक्ते अन्येन तदयोगाच्चेतसेति सिद्धावपि तदुपादानं मनसापि मान्नोपेति, किमुत शरीरेणेति कृष्णागमने अत्यन्तनैराश्यं सूचयितुमिति मन्तव्यम्। अतश्चार्थापत्तिरलङ्कारः। किञ्चात्र एकाकिन्या वेतसवने अन्यौत्सुक्येन वसन्त्या मम यथात्रैकस्मिन्वेतसे विशिष्य कोऽपि बहुमानलेशो न जायते, श्रीकृष्णस्यापीदानीं दुष्टदमनशिष्टावनादिकृत्यनित्यसक्तचित्तत्वात्सविधमिळितास्वपि सर्ववनितासु कृत्रिमैवास्था, न मनागपि स्वारसिकी। किं पुनरनक्षिगोचरे देशे स्थितायाम्मयीत्यस्यार्थस्य प्रायो वास्तवत्वे दृष्टान्तो ममैव नविगणितवेतसत्वम्। बहुषु वेतसेषु सत्सु कस्मिन्नास्थाविशेषः। बह्वीषु स्त्रीषु तदेकशरणासु कस्यामत्यादर इत्यावयोरेकरूपैव मनोवृत्तिर्विषयभेदमात्रत एव भिद्यत इति वार्थो योजनीयः। तदा दृष्टान्तालङ्कारः। 'चेद्बिम्बप्रतिबिम्बत्वं दृष्टान्तस्तदलङ्कृतिः' इति लक्षणात् ॥ ७ ॥

हरीति॥ कोमळा मृदुळा कला ताळ इत्यर्थः। अवयवेनावयवी लक्ष्यते। ताळस्य सप्तमोऽवयवः कला। तत्पूर्वमवोचाम, 'यत्र कालो मार्गः क्रियाङ्गानि ग्रहो जातिः कलालयः' इत्यादि ताळप्रमाणलक्षणम्। तद्वती मृदुळताळयुक्ता। तादृशी हरिचरणशरणस्य श्रीकृष्णपादारविन्दाश्रयस्य जयदेवकवेर्भारती वाणी हृदि हृदये वसतु। सरसानां सहृदयानामिति शेषः। युवतिरिव तरुणीव। तरुण्याश्च सरसजनहृदयवासयोग्यतासम्भवादिति भावः। युवतिरपि कोमळकलावती भवति। तत्पक्षे कला कामकला वा कलाविद्या वा 'ग्राह्या। अत्र पूर्णोपमा श्लेषसङ्कीर्णा' ॥ ८ ॥

अथ श्रीकृष्णानागमनकारणं बहुधा विमृशति श्लोकेन—तत्किमिति॥

कान्तः श्रीकृष्णः। सङ्केतीकृते समयविषयीकृते मञ्जौ मनोज्ञे वञ्चुळलताकुञ्जे वेतसलतागृहेऽपि यस्मात्कारणान्नागतः न प्राप्तवान् तत् तस्मात्कारणात् कामपि कामिनीमभिसृतः किम्। कामपि अनिर्देश्यगुणामिति, कामिनीं प्रशस्तकामामिति च। स्वात्मनोऽप्युत्कृष्टरूपगुणसफलाभिलाषत्वादिकं हृदयगतमभिसृत इत्यनेन प्रकाश्यते। कलाकेळिभिः करणभूताभिः वन्धुभिः सखिभिः कर्तृभिः बद्धः किं वा। बद्ध इव बद्धो वेति तर्क्यते। अनेनास्वातन्त्र्यापादनं व्यज्यते। अन्यथा मत्परित्यागायोगादिति भावः। कलाः कलाविद्या गीतादयः। गीतं, वाद्यं, नृत्तम्, नाट्यम्, आलेख्यं, विशेषकच्छेद्यं, तण्डुलकुसुमबलिविकाराः, पुष्पास्तरणं, दशनवसनाङ्गरागाः, मणिभूमिकाकर्म, शयनरचनम्, उदकवाद्यम्, उदकाघातः, चित्रायोगाः, माल्यग्रथनविकल्पाः, शेखरापीडयोजनं, नेपथ्ययोगाः, कर्णपत्रभङ्गाः, गन्धयुक्तिः, भूषणयोजनम्, ऐन्द्रजालं, कौचुमारयोगाः, हस्तलाघवं, चित्रशाकयूषभक्ष्यविकारक्रिया, पानकरसरागासवयोजनं, सूचीवानकर्म, सूत्रक्रीडा, वीणाडमरुकवाद्यानि, प्रहेळिकाप्रतिमाला, दुर्वाजकयोगाः, पुस्तकवाचनं, नाटकाख्यायिकादर्शनं, काव्यसमस्यापूरणं, पट्टिकावानवेत्रवानविकल्पाः, तन्त्रकर्माणि, तक्षणं, वास्तुविद्या, रूप्यरत्नपरीक्षा, धातुवादः, मणिरागाकरज्ञानं, वृक्षायुर्वेदयोगाः, मेषकुक्कुटलावकयुद्धविधिः, शुकशारिकाप्रलापनम्, उच्छादनकेशमर्दनकौशलम्, अक्षरमुष्टिकाकथनं, म्लेच्छितविकल्पाः, देशभाषाज्ञानं, पुष्पशकटिका, निमित्तज्ञानं, यन्त्रमातृका, धारणमातृकाः, सम्पाठ्यं, मानसी काव्यक्रिया, अभिधानकोशच्छन्दोज्ञानं, क्रियाकल्पः, छलितकयोगाः, वस्त्रगोपनादिः, द्यूतविशेषाः, आकर्षक्रीडा, बालक्रीडनकानि, वैनयिक्यः वैजयिक्यः, वैयायामिक्यश्च विद्याः। एवं चतुष्षष्टिः कलाविद्याः। आभिर्याः केळयः क्रीडाः तासां बन्धनकारणत्वं प्रसिद्धमेव। अतस्तत्प्रसङ्गादन्यकार्यविस्मरणमुपपन्नमिति यावत्। यद्वा, अन्धकारिणि बहळान्धकारे वनोपान्ते वनमध्ये भ्राम्यति किमु मार्गमजानन् परिभ्रमति वा। अथवा, क्लान्तमनाः मद्वियोगखिन्नचित्तस्सन् मन्दिरात् पथि मार्गे प्रस्थातुन्निर्गन्तुं मनागल्पमपि अक्षम एव अशक्त एव। किमु इति अत्रापि योज्यम्। अत्रानागमनकारणानां विषयाणां सन्दिह्यमानत्वात्संशय एव पर्यवसानाच्च शुद्धसन्देहालङ्कारो मालारूपः। 'विषयस्य सन्दिह्यमानत्वे सन्देहः' इति लक्षणात्॥ ॥ ३॥

गीतम् १४

अथ सख्यामागतायामपि राधायाः प्रवृत्तिमाह — अथेति॥ अथ अनन्तरं माधवमन्तरेण श्रीकृष्णं विना आगतां प्राप्तां सखीं विषादेन खेदेन मूका

प्रतिवचनासमर्थां वीक्ष्य दृष्ट्वा इयं राधा जनार्दनं श्रीकृष्णं कयापि रमितं, कर्तरि कर्मणि रमेर्ण्यन्तान्निष्ठा, कयाचिद्गोप्या सह रतवन्तं कयाचिद्गोप्या कर्त्र्या रमितम्। रमयित्वा वशीकृतमिति वार्थः। तादृशं विशङ्कमाना सम्भावयन्ती सती दृष्टवत् दृष्टे प्रत्यक्षीकृत इवार्थे विषये एतद्वक्ष्यमाणं वचनमाह उक्तवती। 'तत्र तस्येव'इतीवार्थे वतिः। जनार्दनस्यान्यया सह रतिं प्रत्यक्षतया पश्यन्तीव एवमुवाचेत्यर्थः। वृत्तमुपेन्द्रवज्रा। 'उपेद्रवज्रा जतजास्ततो गौ" ॥ ४ ॥

स्मरसमरेति ॥ केदारबन्धुरागेण गीयत इति। 'मोदेन गन्धर्वसुराङ्गनाभिः पादारविन्दे पतितामिरीड्यः। चूतारविन्दायुधशोभनाङ्गः केदारबन्धुः किल रागराजः॥' इति तद्रूपानुस्मरणविधिः। अटताळलक्षणं प्रागुक्तम्। कापीत्यादि गुणेत्यन्तं ध्रुवपदम्। स्मरसमरे सुरते उचितोऽनुगुणो विरचितः कृतो वेषो मण्डनं यस्यास्तादृशी। सुरतकरणानुगुणवेषरचनेत्यर्थः। किञ्च, गळितानि सम्भोगकालीनकचाकर्षणवशात् करणविशेषभाविगात्रपरिवर्तनादेर्वा कचनिचयस्रस्तानि यानि कुसुमानि तान्येव यो भरस्तेन विलुळिता व्याकुलीकृताः केशाः कुन्तळा यस्यास्तादृशी च। भरवद्गमे कुन्तळानां व्याकुलताया अवश्यभावित्वाद्। दरेति पाठान्तरम्। तत्र विगळितकुसुमा दरविलुळिताश्च केशा यस्यास्तादृशीत्यर्थः। अत एव अधिका लोकोत्कृष्टा मद्गुणेभ्य उत्कृष्टा वा गुणाः सौन्दर्यसौभाग्यादयो यस्यास्सा तादृशी कापि युवतिर्गोपतरुणी मधुरिपुणा श्रीकृष्णेन सह रमते विजने यथासुखं क्रीडति। त्वया गत्वा तद्दृष्टम्। त्वयानुक्तमपि मया ज्ञातञ्चेति शेषः। अत्र स्मरसमरोचितविरचितवेषेत्यनेन 'रोमाञ्चकञ्चुकवती भ्रूचापवती कटाक्षबाणवती। रशनाजयघोषवती रमणी रतिसङ्गराय सन्नद्धा॥' इतिवत्सुरतरणशौर्यं तस्या व्यञ्जितम्। गळितकुसुमभरविलुळितकेशेत्यनेन चिराभिलषिताया मधुरिपुणा सह रतेरवसरलाभात्कुतुकहर्षसम्भ्रमौत्सुक्यलज्जादिव्यभिचारिभावा विभावानुभावाः कैश्यविगळनभुजमूलस्वेदकुचवेपथुनीवीस्रंसनादय उक्तशेषतयोपलक्ष्यन्ते। अधिकगुणा कापि युवतिरित्यनेन तस्या यौवनमेव यौवनं, तस्या गुणा एव गुणाः, तस्या भाग्यमेव भाग्यं पुष्कलफलोन्मुख्यादित्यादि तत्प्रशंसासूचनद्वारा स्वात्मनिन्दा प्रकाशितेति बहवोऽत्र ध्वनिभेदाः। मधुरिपुणेति समरशौर्यं द्योतयता शब्देन विजयी मुरारिरिति वक्ष्यमाणांशो लेशतस्सूचितः वसन्तशत्रुणेति तस्यैवार्थान्तरेण। या रमिता वनमालिना तपति न सेति वक्ष्यमाणबीजावापः कृतश्चेत्यवसेयम् ॥ १ ॥

हरीति ॥ हरेः श्रीकृष्णस्य परिरम्भणेनालिङ्गनेन श्रीकृष्णकर्तृकेण स्वकर्मकेण श्रीकृष्णकर्मकेण स्वकर्तृकेण चेत्यर्थः। ततश्चोभयकर्तृकमप्युपलक्ष्यम्। तादृशपरिरम्भणप्रकाराश्च 'लतावेष्टितकं वृक्षाधिरूढं तिलतण्डुलम्। क्षीरनीरं तथैवान्यदूरुजङ्घोपगूहने॥ स्तनालिङ्गनमित्यन्यल्ललाटिकमतः परम्। इत्यष्टौ जातरत्योरजातरत्योस्तु विद्धकम्॥ स्पृष्टकश्चोद्घृष्टकश्च पीडितश्च तथापरम्॥' इति द्वादशधा कामशास्त्रकारैः प्रतिपादिता द्रष्टव्याः। तादृशेन विविधेनोपगूहनेन ललिता विकाराः मनसि रागवृद्धिः शरीरे तदनुभावा मुखविकासादयो मन्दसीत्कारादयश्च यस्यास्सा। किञ्च, कुचकलशोपरि स्तनकुम्भयोरूर्ध्वभागे तरळिताश्चञ्चलायमाना हारा मणिमाला यस्यास्सा। अनेन विशेषणेन तु 'परस्परालङ्करणं तथालिङ्गनचुम्बने। नखदन्तक्षतिश्चैव करिहस्तक्रिया तथा॥' इति प्रतिपादितबाह्यरतक्रियाविशेषाणामादिमस्यान्योन्यालङ्करणस्यादावेव निर्वर्तितत्वं, ततश्च श्रीकृष्णकरयुगामुक्तमौक्तिकदामालङ्कृतनिजकुचकुम्भयुगळसौभाग्यप्रथनतत्परता तस्याश्च प्रकाश्यते। हरिपरिरम्भणफलितविकारेति पाठान्तरम्। तत्र हरिपरिरम्भणफलिताः श्रीकृष्णालिङ्गनरूपं फलं दर्शितवन्तो विकाराः चक्षुःप्रीत्यादयो मदनदशा यस्या इत्यर्थः। अतश्च धन्यम्मन्यतया कुचकलशयोरुपरि तरळिता मुक्ताहारा ययेति च। ईदृशी कापि युवतिर्मधुरिपुणा विलसतीति ध्रुवपदेन सहान्वयः। अत्र श्रीकृष्णस्य रासक्रीडाप्रियत्वात्तदुपयोगिनी गन्धर्वसत्त्वा कामिनी या कापीति राधया वर्ण्यत इति मन्तव्यम्। 'अशेषोज्ज्वलवेषा च गन्धपुष्पगुणप्रिया। तौर्यत्रिकप्रवीणा च चाटुवादप्रिया तथा॥ उदारशीला गन्धर्वसत्त्वा स्याद्वरवर्णिनी॥' इति कामशास्त्रे निर्णयात् ॥ २ ॥

विचलदिति ॥ विचलद्भिरळकैश्चूर्णकुन्तळैः। 'अळकाश्चूर्णकुन्तळाः' इत्यमरः। ललितस्सुन्दर आननचन्द्रो मुखेन्दुर्यस्यास्तादृशी। अनेनैवंविधेऽपि रते प्रक्रान्ते लज्जाया भयादेश्च मध्ये मध्ये तिरोभावाविर्भावौ ध्वन्येते। किञ्च तस्य श्रीकृष्णस्याधरपाने रभसेन त्वरया कृता तन्द्रा वाग्यवृत्तिर्यस्यास्तादृशी। अनेन बालायामिव मृदुपूर्वमेव निमित्तकादिक्रमेण प्रवर्तितानां श्रीकृष्णकर्तृकाणां चुम्बनविशेषाणां निमित्तस्फुरितघटितानां नवोढाविषयाणां प्रवर्तने सम्यगानुकूल्यं पुना रतित्वरया कृष्णेन पीडितकसम्पुटकरसनारणादिप्रवर्तने

कृतप्रतिकरणासामर्थ्यं तस्यास्त्रपापारतन्त्र्यापत्त्या द्योत्यते । ततश्च 'ललाटनयनं गण्डाधरजिह्वा गळं तथा । उरः स्तनश्च सामान्यचुम्बनस्थानमीरितम् ॥ लाटानान्नाभिजघनं ललाटं कक्षमेव च' इति कामशास्त्रेषु स्थानेषु प्रत्येकं चुम्बने, 'तच्चतुर्दशधा ज्ञेयं निमित्तस्फुरितन्तथा । घटितञ्च समं तिर्यक्प्रान्तञ्चैवाव-पीडितम् ॥ द्विजाग्रहं सम्पुटकं जिह्वायुद्धप्रबोधिके । ऐच्छं सङ्क्रान्तमिति च चुम्बनानि चतुर्दश ॥' इति चतुर्दशधा विहितानां चुम्बनानां प्रयोगे श्रीकृष्ण-स्यौत्सुक्यं तस्यास्तु केषुचित्स्थानेषु केषाञ्चिच्चुम्बनभेदानामनुमतिमात्रं, केषाञ्चित् कृतप्रतिकृतिचातुर्यं, केषुचिद्ग्राम्यश्चावश्यं स्यादेवेति शङ्कया आत्मानुमानतः सम्भाव्य भण्यत इति ज्ञेयम् । प्रकृतव्यापाराद्विरमणानुचिते समये विरमणं तन्द्रा-शब्दार्थः । कृष्णस्य तु 'मंगिअळंघेवळमोडिचुविएअंपणाअउवणमिएएंकंमि-विअआहरेअंणंणों होतिरसमेअ'इति वचनानुसारेण रसभङ्गाभावोऽपि व्यज्यते। तादृशी कापीति पूर्ववत्पल्लवेनान्वयः ॥ ३ ॥

चञ्चलेति ॥ चञ्चलाभ्यां कुण्डलाभ्यां ललितौ प्रतिबिम्बितत्वान्मनोज्ञौ कपोलौ गण्डप्रदेशौ यस्यास्सा । मण्डितकुण्डलयुगळप्रतिफलनधळधळायमान-गण्डयुगळेत्यर्थः । किञ्च मुखरिता वाचालिता रशना यस्मिंस्तन्मुखरितरशनम् । तादृशं जघनं यस्यां तथाविधायां गतौ गमनक्रियायां लोला चञ्चला । तादृश्या गत्या लोला चञ्चलशरीरेति वा । आभ्यां गमनसमयजनितलीलाव्यञ्जकाभ्यां विशेषणाभ्यां बाह्यरतप्रस्तावानन्तरमाभ्यन्तरसुरतप्रक्रमे त्रपापारवश्येन तस्या विश्लिष्य गमनं द्योत्यते ॥ ४ ॥

अथ श्रीकृष्णस्य तद्वशीकरणनैपुण्यमाह—दयितेति ॥ दयितस्य वल्लभस्य श्रीकृष्णस्य विलोकिते दर्शने । भावे निष्ठा । लज्जिता सञ्जातलज्जा चासौ हसिता सञ्जातहासा च । 'अथो हसो हासः' इत्यमरः । रतिरस-भङ्गाचरणरूपादनौचित्याचरणाल्लज्जा, तत्समाधानाय हासकश्चेति मन्तव्यम् । श्रीकृष्णस्य साकूतदर्शनमात्रेण वशीभूता प्रतिनिवर्त्य सहसा तमाश्लिङ्गन्तीति या-वत् । एवं त्रपाव्यपाये अनन्तरचरितमाह—बहुविधानि कूजितानि मणितानि रतिरसरसितानि सीत्कृतादीनि च यस्यास्तादृशी च सती कापि मधुरिपुणा विलसतीत्यन्वयः । अत्र 'वंशकाण्डस्य दळने यश्शब्दस्स तु फूत्कृतम् । जलेऽ-

श्वत्थफलौघस्य निरन्तरनिपातने ॥ उपजायेत यश्शब्दस्तद्वद्गळकृतो ध्वनिः । फूत्कृतन्तदिति प्राहुर्मणितं केचिदूचिरे ॥ क्षारद्रव्योपयोगे वा गीतव्यसनतोऽपि वा । यो मुखाज्जायते शब्दस्तद्वत्सीत्कृतमुच्यते ॥ तच्च लावककपोतकोकिलाहंसकेकिविरुतोपमं स्मृतम् ।' इत्यादिकामशास्त्रविध्यनुसारेण बहुविधत्वं कूजितादीनां बोद्धव्यम् ॥ ५ ॥

विपुलेति ॥ विपुलानां विस्तृतानां पुळकानां रोमाञ्चोद्गमानां पृथोः प्रबलस्य वेपथोः कम्पस्य च भङ्गः प्रकारपरम्परा यस्यास्सा । अत्र पुळकवेपथुभ्यामन्या अपि सात्त्विका यथासम्भवमुपलक्ष्यन्ते । 'स्तम्भप्रळयरोमाञ्चा स्वेदो वैवर्ण्यवेपथू । अश्रु वैस्वर्यमित्यष्टौ सात्त्विकाः परिकीर्तिताः ॥' इति तेषामुद्दिष्टत्वात् । किञ्च श्वसितेन प्रवृत्तविविधसुरतवेगायासजनितेन निश्वासेन निमीलितोऽन्तर्हितस्तच्छान्तौ पुनरपि विकसन्नाविर्भवंश्चानङ्गः कामो यस्यास्सा । अतश्च निधुवनानामविच्छिन्नत्वं प्रत्याय्यते । भङ्गशब्देन च तरङ्गवाचिना सम्भोगशृङ्गारस्य सागरवदपारत्वं गम्यम् ॥ ६ ॥

श्रमेति ॥ श्रमजलकणानां सुरतायासजनितानां स्वेदबिन्दूनां भरेण भरणेन सुभगं कमनीयतरं शरीरं यस्यास्सा । श्रमजलकणानां स्थूलमुक्ताफलाभत्वं शरीरसौभाग्यावहत्वकथनात्सिद्धमवगन्तव्यम् । किञ्च रतिरणे सुरतसङ्ग्रामे धीरा अनपेतधैर्या । अत्यन्तशूरेति यावत् । अत एवोरसि श्रीकृष्णवक्षःस्थले परिपतिता सुरतविरतिजनितसुखातिशयपारवश्येन दयितवक्षःस्थले विस्रस्ताङ्गसन्धिबन्धं विन्यस्तगात्रयष्टिरित्यर्थः ॥ अनेन समरतत्वादिनिमित्तकः प्रीतिविशेषः प्रत्याय्यते ॥ ७ ॥

श्रीजयदेवेति ॥ श्रीजयदेवेन भणितं वर्णितं हरेः श्रीकृष्णस्य रमितं रमणम् । रमेर्ण्यन्ताद्भावे निष्ठा । णिच् भगवतो नित्यब्रह्मचारितां बोधयति । आश्रितप्रीणनमात्रोपक्षीणत्वं रतेश्च बोद्धव्यम् । तादृशं हरिरमितं कर्तृ कलिना हेतुना यत्कलुषं वृजिनं कायिकवाचिकमानसभेदात्त्रिविधं पुनर्विदिताविदितभेदेन षोढाभूतं दुष्कर्म परिशमितं जनयतु क्षपयत्वित्यर्थः । हरिचरितस्य समस्तदुरितप्रशमनशीलत्वादिति भावः । ॥ ८ ॥

गीतम्—१५

कयापि रमितं जनार्दनं विशङ्कमाना दृष्टवदेममुक्त्वा तत्प्रसङ्गमात्रेणैव किञ्चिद्विरहवेदनाविनोदलाभेन क्षणं वर्तमाना तत्समयसमुदितोन्नतचन्द्रमरीचि-सूचिनिचयविद्धविरहव्रणवेदनानूतनीभावविवशाशया राधा सख्यै निजदुर्दशान्निवेद-यति श्लोकेन—विरहेति ॥ अये सखि अयं दृश्यमानः विधुश्चन्द्रः विरहेण मद्वियो-गदुःखेन पाण्डुनः पाण्डरवर्णस्य मुरारिमुखाम्बुजस्य श्रीकृष्णवदनपद्मस्य द्युतिरिव द्युतिश्शोभा यस्य तादृशस्सन् वेदनां श्रीकृष्णविरहजनितं मद्दुःखं तिरयंस्तिरस्कुर्व-न्नपि इष्टवस्त्वलाभे तत्सदृशवस्त्वन्तरलाभस्यापि किञ्चित्सुखावहत्वात् श्रीकृष्णमुखा-वलोकनासिद्धौ तत्सदृशस्य चन्द्रस्य दर्शनेनापि वेदनायाश्शक्यप्रतिक्रियत्वात्तिरय-न्नपि वेदनामित्युक्तिः। अपिर्विरोधे मनोभुवः कामस्य सुहृत् मन्त्री सन् विधु-श्चन्द्रः हृदये मन्ममसि अतीव मदनव्यथान्तनोति कामपारवश्यं विस्तारयति। विरह-वेदनातिरस्करणं मदनव्यथाविस्तारणञ्च युगपदेककर्तृकमिति विरोधस्य विरह-पाण्डुमुरारिमुखाम्बुजद्युतिरिति मनोभुवस्सुहृदिति च क्रमेण हेतुप्रतिपादनेन समाहि-तत्वादत्र यथासङ्ख्यकाव्यलिङ्गविरोधालङ्कारसङ्करः। स च समपादगतेन यमक-द्वयेन सह संसृष्टः। वृत्तं द्रुतविळम्बितम्। तिरयन्निति तिरस्कारवाचकति-रश्शब्दात्तत्करोतीति णिचि णाविष्ठवद्भावाट्टिलोपः। ततो लट्। लटश्शता ॥ ५॥

एवं चन्द्रकृतपीडां सख्यै निवेद्य पुनरपि श्रीकृष्णस्यान्याभिस्सह विहारं सम्भाव्य दृष्टवदेतदाहेत्यस्यैव शेषतया गीतेन सख्याः पुरो विस्तरेण वर्णयति—समुदितेत्यादि ॥ मुखारिरागेण गीयत इति। 'शिखालसत्कल्पकसत्प्र-सूनश्शिवादिधिष्ण्येष्वपि सञ्चरिष्णुः। सखा रतेः पत्युरुशानिजानिर्मुखारिरागोऽस्तु मुदावहो नः ॥' इति तद्भावनाविधिः। अटताळलक्षणं प्रागुक्तम्। रमत इत्यादिरधुनेत्यन्तः पल्लवानुपल्लवात्मको भागस्सर्वसाधारणत्वादादौ व्याख्यायते। विजयोऽस्यास्तीति विजयी। अत इनिः। अनङ्गसङ्गरे सर्वत्र जयशील इत्यर्थः। नचात्र 'एकाक्षरात्कृतो जातेस्सप्तम्याश्च न तौ स्मृतौ।' इति विजयशब्दात्कृ-दन्तादिनिनिषेधश्शङ्क्यः। तस्य प्रायिकत्वात्। 'इदमुत्तममतिशयिनि व्यङ्ग्ये वाच्यात्'इति मम्मटप्रयोगात। तादृशो मुरारिः श्रीकृष्णः अधुना इदानीम्। अधुनेति निपातनात्साधुः। यमुनायाः कालिन्द्याः पुळिनेषु सैकतेषु। 'तोयोत्थितं

तत्पुलिनं सैकतं सिकतामयम्' इत्यमरः । यद्वनं विपिनं तस्मिन् रमते क्रीडति । अत्र पुष्पपल्लवादिसमृद्धिमतो यमुनापुलिनस्य मुरारिकर्तृकरमणक्रियाधारत्वेन वर्णनादुदात्तालङ्कारः । विजयीत्यनेन च 'उत्तम्भयत्रतिपतिं रमयाम्बभूव' इति श्रीभागवतवचनप्रामाण्येन भगवतो नित्यब्रह्मचारित्वं द्योत्यते । कथं पुना रमत इत्याकाङ्क्षायां तत्प्रकारविशेषानाह—समुदितेत्यादिभिः सप्तभिः पादैः । समुदितस्समुत्पन्नः । आविर्भूत इति यावत् । तादृशो मदनो यस्मात्तथाविधे । मन्मथोद्दीपक इत्यर्थः । अत एव चुम्बनाय चलितोऽधरो यत्र । अभिमुखं नेदिष्ठं स्वादिष्ठं सुरभिलञ्च श्रीकृष्णाधरं चुम्बितुमौत्सुक्यात्कम्पिताधरबिम्ब इत्यर्थः । एवंविधे रमणीवदने प्रेयस्याः कस्याश्चिद्वल्लव्या मुखे मृगमदतिलकं लिखति कस्तूरीतिलकं कल्पयति । तत्कथम्—सपुलकं सरोमाञ्चम् । लेखनक्रियाविशेषणमिदम् । तत्र हेतुमुपमया व्यञ्जयति—रजनीकरे पूर्णचन्द्रे मृगमिव हरिणमिव । स्थितमिति शेषः । हिमाद्यावरणलेशहीने चैत्रपौर्णमासीचन्द्रे शोभावहत्वेन 'मलिनमपि हिमांशोर्लक्ष्म लक्ष्मीन्तनोति' इति कवीन्द्रवर्णनस्य सहृदयसम्मत्या तदुपमितस्य रमणीवदनस्य मृगमदतिलकमिलितत्वादतिलालित्यं व्यज्यमानं लेखनक्रियायां पुळकसाहित्यसाहाय्येन रमणीविषयमभिलाषपरिपोषं श्रीकृष्णस्य प्रकाशयति । अत्रानुप्रासोपमयोर्विजतीययोस्संसृष्टिः । ततश्च 'परस्परालङ्करणं तथालिङ्गनचुम्बने' इति कामशास्त्रविधिक्रमेण प्रस्तुतप्रपञ्चनस्य सम्भोगशृङ्गारस्य नायकसौभाग्यव्यञ्जकस्य प्रधाननायिकागतविप्रलम्भशृङ्गाराङ्गत्वमनुसन्धेयम् । एवं मदन्याभिर्धन्याभिस्सह यमुनापुलिनवने विजयी मुरारिरधुना रमत इति पल्लवेनान्वयः ॥ १ ॥

घनेति ॥ हे सखि घनचयरुचिरे नीलनीरदनिकरवत्कमनीये तथा तरळीकृतानि श्लाघाकम्पीकृतानि तरुणानां यूनामाननानि मुखानि । शिरांसीति यावत् । येन । किञ्च रतिपतेः कामस्यैव मृगस्य कानने स्वैरविहारस्थले । तद्रूपे कस्याश्चित्तरुण्याश्चिकुरे कुन्तळकलापे चपलासुषमं चपला विद्युत्तस्या इव सुषमा परमा शोभा यस्य तादृशं कुरवककुसुमम् । जातावेकवचनम् । पुष्पविशेषानित्यर्थः । रचयति । रचनमत्र माल्यरूपेण ग्रथनमारभ्य योजनावधिर्व्यापारः । गर्भकत्वेन योजयतीत्यर्थः । अत एव क्षणलक्ष्यतया लक्षणान्तरालक्ष्यतया च विद्युत्साम्यमस्य द्रष्टव्यम् । एवञ्च रमत इत्यन्वयः । अत्र घनचयरुचिर इत्युपमानानि सामान्यवचनैरिति समासः । तरळिततरुणानन इत्यत्र

तरुणानुरागाणाश्चातकौपम्यस्य गम्यत्वात्समासोक्तिः। चपलासुपममित्युपमा। रतिपतिमृगकानन इति सावयवरूपकम्। एतैः श्रीकृष्णस्य विहारचातुर्यं व्यज्यत इत्यलङ्कारैर्वस्तुध्वनिः ॥ २ ॥

घटयतीति ॥ हे सखि सुघने अत्यन्तनीरन्ध्रे। अन्यत्र शोभनमेघान्विते। तथा मृगमदस्य कस्तूर्यास्सम्बन्धिन्या रुच्या रूषिते लिप्ते। अन्यत्रापि तथैवान्वये नीलवर्ण इत्यर्थः। नीरूपत्वेऽपि नीलं नभ इति प्रतीत्या महाकविप्रयोगबाहुल्यात्। सर्वपथीना हि कवय इति न्यायात्। किञ्च नखपदं नखव्रणं तदेव शशी चन्द्रः तेन भूषितेऽलङ्कृते। एवं विशेषणत्रयविशिष्टे कुचयुग एव गगने विहायसि। अत्र कुचयुगस्य गगनस्य च रूपित्वारूपित्वरूपे भेदेऽपि महत्त्वशालित्वसाधर्म्यादारोपः। अमलं त्रासरहितमुज्ज्वलं मणिसरं मुक्ताहारमेव तारकपटलं नक्षत्रगणम्। 'नक्षत्रमृक्षं भन्तारं तारकाप्युडु वा स्त्रियाम्' इत्यभिधाने तारकाशब्दः उडुशब्दश्च वा स्त्रियाम्'इति चशब्दार्थमपिशब्दं वाशब्देनोक्तानुक्तलिङ्गविकल्पनञ्च केचिदाहुः। यद्वा तारकाणामिदन्तारकमिति वृद्धाच्छबाधकोऽण्। तच्च पटलञ्चेति कर्मधारयः। तद्घटयति योजयति अत्र कुचयुगस्य गगनत्वेन नखाङ्कस्य मृगाङ्कत्वेन मणिसरस्य नक्षत्रगणत्वेन। चारोपस्य शाब्दत्वात् श्रीकृष्णस्य रात्रिकालत्वेनारोपस्य चार्थत्वादेकदेशविवर्तिरूपकमिदं सावयवम्। तच्च उदितस्य मृदुभिः करैर्लोकमनोहरस्य राज्ञः परिसरे पौरनागरिकैरपि परिवारतयावस्थेयमिति धियैवेति हेतूत्प्रेक्षाव्यञ्जकमित्यलङ्कारेणालङ्कारध्वनिः। तेन च 'प्रायेण सामग्र्यविधौ गुणानां पराङ्मुखी विश्वसृजः प्रवृत्तिः' इति प्रसिद्धिसहायकेन श्रीकृष्णस्य विश्वसृड्व्यतिरेकध्वननादनुरणितरूपो वस्तुध्वनिश्च। एवञ्च रमत इति पूर्ववदन्वयः ॥ ३ ॥

जितेति ॥ हे सखि जितौ बिसशकलौ मृणालखण्डौ येन तादृशे। ततोऽप्यतिकोमल इत्यर्थः। करतले पाणितल एव नळिनीदळे पद्मिनीपलाशे यस्य तादृशे च। किञ्च हिमशीतळे तुषारवदतिशीतळे च। मृदुनि अतिसुकुमारे भुजयुगळे कस्याश्चिद्बाहालताद्वये मरतकवलयं नीलमणिकङ्कणमेव मधुकरनिचयं भ्रमरषण्डं वितरति ददाति। आमुञ्चतीति यावत्। गारुत्मतरत्नकङ्कणरूपं भ्रमरनिकरमिति व्यस्तरूपकमिदम्। मृणाळेऽपि स्वादिमसत्त्वया मधुपानां सक्तिरस्तीति मन्तव्यम्। अत्र व्यतिरेकरूपकसङ्करः। हिमशीतळ

1. त्रासः मणेर्दोषः।

इत्यत्र उपमानानि सामान्यवचनैरिति समासगोपमा। तथा च तापहरत्व-ख्यापनद्वारा मानिन्या राधाया मद्विरहतप्तस्य माधवस्य तापहारिपाणितला किल सा काचिदिति तस्यामसूयाङ्कुरव्यञ्जनाद्भावध्वनिः। एवञ्च रमत इति प्राग्वदन्वयः ॥ ४ ॥

रतिरिति। हे सखि मनसिजस्य मदनमहाराजस्य कनकासने सुवर्णनिर्मितसिंहासनरूपे। तद्वदुन्नते कान्त्या मनोहरे चेत्यर्थः। तथा कृतवासने कृता कस्तूरिकादिसुगन्धिद्रव्यैस्सम्पादिता वासना संस्कारो यस्मिंस्तादृशे विपुले विस्तीर्णे अपघने अङ्गे। अपघनोऽङ्गमिति निपातनात्साधुः। वराङ्गभूत इत्यर्थः। तादृशे रतिगृहजघने रतेः कामपत्न्याः गृहभूते जघने कस्याश्चित्कटीपुरोभागे। 'पश्चान्नितम्बः स्त्रीकट्याः क्लीबे तु जघनं पुरः' इत्यमरः। मुरारिस्तोरणस्य स्वर्णस्तम्भयुगळघटितपल्लवकुसुमस्तबकादिमङ्गळपदार्थसमुत्तम्भनस्य हसनं हासकरम्। 'कृत्यल्युटोबहुलम्' इति कर्तरि ल्युट्। तादृशं मणिसररशनं माणिक्यहारं रशनां काञ्चीञ्च। 'सर्वो द्वन्द्वो विभाषयैकवद्भवति' इत्येकवद्भावः। विकिरति विक्षिपति। प्रभूणां गृहद्वारे नित्योत्सवेषु तोरणबन्धनस्यावश्यकत्वादिति भावः। अत्रातिशयोक्तिरूपकव्यतिरेकाणां संसृष्टिः। एवञ्च रमत इत्यन्वयः ॥ ५ ॥

चरणेति ॥ हे सखि कमलाया लक्ष्म्याः। शोभाया इति यावत्। निलये नित्यनिवासस्थाने तत एव नखमणिगणैर्नखररत्नसमूहैः पूजिते कृतपूजने। कमलाया रत्नप्रियत्वात्तन्निलये तद्भक्तैरुपहारीकृता मणिगणा इवेति नखानां मणिगणत्वेन सम्भावनाद्गम्योत्प्रेक्षागर्भेयं भेदे अभेदात्मिकातिशयोक्तिः। प्रतिनायिकाचरणकिसलयस्य लक्ष्मीनिलयस्य च भेदे सत्यप्यभेदेन वर्णनात्। एवम्भूते चरणकिसलये कस्याश्चित्पादपल्लवे हृदि स्वहृदये योजिते। वक्षसि निवेशित इति यावत्। यावकस्यालक्तकस्य भरणं धारणमेव बहिरपवरणमवगुण्ठनाम्बरं जनयति सम्पादयति। प्रकृष्टस्य वस्तुनः केनचिदाच्छादनेन भाव्यम्। नोचेदधन्यानामक्षिगोचरत्वे तस्य प्रकर्षहानिः स्यादिति धिया श्रीकृष्णः कस्याश्चित्प्रेयस्याश्चरणकिसलयं स्ववक्षसि निधाय तत्रालक्तात्मकमवगुण्ठनपटमामुञ्चतीत्यर्थः। एवं रमत इति योज्यम् ॥ ६ ॥

ध्यायतीति ॥ खले कितवे हलधरसोदरे बलभद्रानुजे। अनेन बलभद्रस्य बहिरन्तर्वैमल्यध्वननद्वारा श्रीकृष्णस्य बहिरन्तर्मालिन्यप्रकाशनेन द्वयो-

रनयोस्सोदरत्वम्, 'उत्पलस्यारविन्दस्य मत्स्यस्य कुमुदस्य च। एकयोनिप्रसुता- नान्तेषां गन्धः पृथक्पृथक् ॥' इति न्यायानुसारीति श्रीकृष्णोपालम्भो 'बहिरिव मलिनतरन्तव कृष्ण मनोऽपि भविष्यति नूनम्' इति वक्ष्यमाणो व्यज्यते। तत्सामग्र्य- सम्पादनार्थमेव खलशब्दप्रयोगश्चावगन्तव्यः। तादृशे श्रीकृष्णे सदृशं स्वनुरूपां कामपि लोकोत्तरां सुदृशं सुन्दरीं ध्यायति सति। ध्यानमत्रानुवर्तनप्राक्कालीन- चिन्तनमुक्तम्। बहुवनितापरिष्करणेऽप्यन्तिमायाः पादग्रहणस्य चिराभिसंहितत्वञ्च मन्तव्यम्। रमयतीति वा पाठः। किं कस्मात्कारणादहमिहास्मिन्विटपोदरे लताकुटीरे विफलं निष्फलम्। निष्प्रयोजनमिति यावत्। यथा भवति तथा विरसं निस्सुखञ्च यथा तथा च चिरमवसमुषितवत्यस्मि। हे सखि त्वं वद। अत्र स्वावमतिर्जीवितनैराश्यञ्च व्यज्यते ॥ ७ ॥

इहेति ॥ रसस्य विप्रलम्भशृङ्गारस्य भणनवद्गणनं व्यञ्जनं यस्मिंस्ता- दृशे इह गीतेऽधिकरणे कृतं निर्मितं हरिगणनं श्रीकृष्णगुणमाहात्म्यबहुमानो येन तादृशे। एतादृशगीतेन हरिविहारस्तावक इति यावत्। अत एव मधु- रिपोश्श्रीकृष्णस्य पदसेवके पावनभावनश्रीमत्पादपद्माराधके कवीनां नृपो राजा कवि नृपः स चासौ जयदेवश्च तस्मिन् कलियुगचरितम्। कलिकालदोषशीलया- यातमिति यावत्। तादृशं दुरितं पापं न वसतु न तिष्ठतु। आयातमपि यातु। न क्षणमपि स्थित्वा मनो मलिनयत्वित्यर्थः। कवेस्सहृदयानाञ्च कलि- कालकालुष्यशान्त्या काव्यमिदं जनानामुभयलोकहिताय भूयादिति भावः। 'स्मृते मनसि गोविन्दे दूरतो याति पातकम्। उदयाचलमारूढे दिननाथे तमो यथा ॥' इति स्मरणादिति यावत्। अत्र कवेः श्रीकृष्णविषयो भावो व्यज्यते ॥ ८ ॥

अथ सख्या विषादमूकायास्तापं प्रशमयन्ती सान्त्वपूर्वकं स्वनिश्चयं तस्यै सूचयति श्लोकेन—नायात इति ॥ हे दूति विस्रम्भस्नेहातिशयचोदि- तत्वादङ्गीकृतदौत्यप्रयासे सखि निर्दयो दयारहितः। परपरितापरसिक इति यावत्। किञ्च बह्वीनां वल्लभो बहुवल्लभः। बह्व्यो वल्लभा यस्येति वा। तादृशस्स श्रीकृष्णः स्वच्छन्दं स्वैरं यथा तथा रमते ताभिस्सह क्रीडति। तन्नायुक्तम्। तत्र तस्मिन्नर्थे ते तव किं दूषणं को दोषः। तव दोषो नात्र मनागप्यस्तीत्यर्थः। त्वत्प्रयासवैफल्येऽपि मदिष्टस्य अन्यथा यथाकथञ्चित् साध्यत्वात्त्वया विषादमूकया न स्थातव्यम्। प्रत्युत प्रहर्ष एव कार्य इत्याह—इदम्।

मदीयमिति शेषः। चेतः स्वयं मां मुक्त्वाद्य अस्मिन्नेव समये दयितस्य श्रीकृष्णस्य गुणैः सौन्दर्यसौभाग्यचातुर्यादिभिर्धर्मैः पाशैश्चाकृष्यमाणं सत् प्रियसङ्गमाय प्रेष्ठभूतस्य श्रीकृष्णस्य सङ्गमाय नित्यसहवासाय यास्यति गमिष्यति। पश्य। वाक्यार्थः कर्म। ननु त्वमनुसर तं हृदयेशमित्यादिभिर्मया बहुधा निर्बध्यमानापि पूर्वं दयितसकाशन्न गतवत्यसि। इदानीमपि मानिनी सती न जिगमिषसि। तर्हि त्वामृते त्वन्मनः स्वयं तत्सकाशं प्रति कथं यास्यतीति शङ्कायामाह—उत्कण्ठातिभरात् रणरणिकातिभाराद्धेतोः। इवेत्युत्प्रेक्षाद्योतकम्। उत्कण्ठातिभरो हेतुत्वेनोत्प्रेक्ष्यते। अतिभारवहनात् स्फुटत्त्रुटत्। विच्छिन्नबन्धनमित्यर्थः। उत्कण्ठार्तिभरादिति वा पाठः। उत्कण्ठया श्रीकृष्णसङ्गमौत्सुक्येन या आर्तयः पीडास्तासां भरादतिशयाद्धेतोरित्यर्थस्तस्मिन् पाठेऽवगन्तव्यः। अनेन श्लोकेन स्मरसमरोचितविरचितवेषेत्यादिना समुदितमदन इत्यादिना च गीतद्वयेन यदन्याङ्गनासम्भोगशृङ्गारप्रपञ्चनन्तरसर्वमात्मविषयविप्रलम्भशृङ्गाराङ्गत्वन्नीतं राधयेति मन्तव्यम् ॥ ६ ॥

गीतम् ॥ १६ ॥

अथेदृशं स्ववचनमाकर्ण्य साहसभीतां सखीमाश्वासयितुमुक्तमुत्कण्ठातिभरमात्मनिष्ठन्तस्यै विवृणोति राधा गीतान्तरेण — अनिलेत्यादि। नागवराळिकरागेण गीयत इति। पुन्नागवराळिरागेणेत्यर्थः। 'नानामणीवलयभूषमृदुप्रवेष्टा नारायणद्रुहिणशङ्करवासवेष्टा। नाकाङ्गनाभ्य उपदिष्टविशिष्टचेष्टा नाट्येषु भाति खलु नागवराळिका सा ॥' इति तद्भावनाविधिः। एकताळलक्षणं प्रागुक्तम्। या रमिता वनमालिनेति सर्वपादसाधारणः पल्लवः। स च द्विरुक्त औत्सुक्यातिशयद्योतकत्वात्साधुः। यदुक्तमाचार्यदण्डिना—'अनुकम्पाद्यतिशयो यत्र कश्चिद्विवक्ष्यते। न दोषः पुनरुक्तेऽत्र प्रत्युतेयमलङ्कृतिः ॥' इति-अनिलेन मन्दपवनेन हेतुना तरळं चञ्चलं यत् कुवलयदळं नीलोत्पलपर्णं तत्सदृशे नयने यस्य तादृशेन वनमालिना श्रीकृष्णेन या नारी रमिता छन्दानुवृत्त्या रतिं प्रापिता सा किसलयशयनेन पल्लवशयनीयेन हेतुना न तपति तापन्नानुभवति। अतो धन्यतमा सेति शेषः। आत्मनो वनमालिना रमितत्वाभावात्किसलयशयनस्याप्यतितापहेतुत्वेनासेव्यत्वापत्तेरशरणतया वेदनातिशयदन्दह्यमानत्वाच्चाधन्यतमत्वं द्योत्यते ॥ १ ॥

विकसितेति ॥ विकसितमुत्फुल्लं यत्सरसिजं तद्वल्ललितं मनोज्ञं मुखं यस्य तादृशेन वनमालिना श्रीकृष्णेन कर्त्रा या नारी रमिता रमणक्रियाकर्मीकृत-सा नारी मनसिजविशिखेन मदनस्य प्रथमास्त्रेणारविन्देन करणेन न स्फुटति न विशीर्यते। प्रकृष्टेन प्रभुणा स्वपोषं पुष्टस्य सजातीयेन बाधायोगादिति भावः ॥ २ ॥

अमृतेति। अमृतवत्पीयूषवन्मधुराणि स्वादीयांसि मृदुतराण्यत्यन्त-कोमळानि च वचनानि चाटूक्तयो यस्य तादृशेन वनमालिना या गोपी रमिता सा मलयजरचनेन चन्दनपङ्कचर्चया न ज्वलति न दह्यते। अमृतेन सिक्तस्या-खिलतापाभावादिति भावः ॥ ३ ॥

स्थलजलेति ॥ स्थलजलरुहस्य स्थलपद्मस्य रुचिरिव रुचिर्यस्य तादृशं करचरणं करौ च चरणौ च यस्य। प्राण्यङ्गत्वादेकवद्भावः। तादृशेन वनमालिना या रमिता सा हिमकरकिरणेन चन्द्ररश्मिना न लुठति तापासहिष्णुतय भूमौ न वेष्टते। जलरुहशब्दः पद्मवाची रूढियोगसिद्धः। न केवलयौगिकः। न केवलरूढश्च। जलवियोगे म्लान्यभावात्स्थलजलजसाम्यमिति मन्तव्यम्। पद्मचन्द्रयोर्निसर्गविरोधाद्दिनरात्रिकालभलवत्त्वाच्च तयोरेकतरलालित्यमन्यो न बाधते। यदि बाधते कालान्तरेऽन्योऽप्यन्यलालित्यं बाधेतेति भावः ॥ ४ ॥

सजलेति ॥ सजलानां जलदानां जलगर्भाणाम्मेघानां समुदयो गणस्तद्वद्रु-चिरेण भासुरेण वनमालिना या रमिता सा विरहभरेण। विरहशब्दो विरहवेदनापरः विरहवेदनातिशयेनेत्यर्थः। हृदि हृदये न दळति दळनन्नानुभवति। बाधक-स्यैवानुलोम्ये बाधाभावादिति भावः। जलदनिवहस्य विरहिजनतापकारित्वं प्रसिद्धम्। 'मेघालोके भवति सुखिनोऽप्यन्यथावृत्ति चेतः कण्ठाश्लेषप्रणयिनि जने किं पुनर्दूरसंस्थे' इति काळिदासवचनात्। 'दैवादहमद्य तया चपलायतनेत्रया वियुक्तश्च। अविरळविलोलजलदः कालस्समुपागतश्चायम् ॥' इति भवभूति-वचनाच्च। वनमालिजलदनिवहयोस्तुल्यरुचित्वादेकत्वमुपचर्यते ॥ ५ ॥

कनकेति। कनकनिचयस्य सुवर्णसञ्चयस्य रुचिरिव रुचिश्शोभा यस्य तादृशञ्च शुचि पवित्रञ्च वसनमम्बरं यस्य तादृशेन पीताम्बरेण वनमालिना या रमिता सा परिजनहसनेन परिचारिकापरिहासेन न श्वसिति दीर्घमुष्णञ्च निश्वासं न मुञ्चति। पीताम्बरप्रभापिशङ्गितदृशा तया परिवारपरिहासधावळ्यं परितो न

द्रष्टव्यमिति भावः। पराधीनानुरागित्वात्परिचारिकापरिहाससम्भवो मन्तव्यः। सति दोषे परिहासस्थापरिहार्यत्वाच्च श्वसितमात्रप्रतिविधिः ॥ ॥ ६ ॥

सकलेति ॥ सकलेषु सर्वेषु भुवनेषु लोकेषु ये जनास्सुरनरादयस्तेषां वरः प्रकृष्टोऽसौ तरुणश्च तादृशेनातिकरुणेनात्यन्तदयालुना वनमालिना या रमिता साङ्गना रुजं विरहदुःखं न वहति। करुणां करोति करुणयतीति णिजन्तात्सर्वधातुविहितेऽच्प्रत्यये रूपमिदम्। 'पचाद्यच् सर्वधातुभ्यः' इति वृत्तिकृत्। करुणेन करुणावता रमितायाः स्वाधीनपतिकायाः कुतो विरहवेदनानुभव इति भावः। किसलयशयनात्तापः, मनसिजविशिखपातात्स्फुटनं, मलयजचर्चया ज्वलनं, हिमकरकिरणदर्शनाद्भुवि लुठनं, उद्दीपनविभावानुभवाद्दाहः, परिजनपरिहासदर्शनान्निश्वास इत्युक्तानां षण्णां दुःखानामनुक्तानाञ्चान्येषामभावाय स्वाधीनपतिकात्वं सप्तमेन पादेन प्रार्थ्यते। प्रार्थितालाभनिश्चये जीवितनैराश्यं सूचितम्। इति विप्रलम्भस्य परा काष्ठा दर्शिता ॥ ७ ॥

श्रीजयदेवेति ॥ श्रीजयदेवफणितं रमणं गोपीजनमनस्तोषणं यस्मिंस्तादृशेनानेन गीतेन। श्रुतेन गीतेन चेति शेषः। हरिः श्रीकृष्णोऽपि हृदयं प्रविशतु। हरिः प्रबन्धनायकः प्रबन्धार्थपर्यालोचनानुपदं सहृदयानां हृदयं प्रविशत्वित्यर्थः। हरौ हृदयप्रविष्टे तु 'स्मृते मनसि गोविन्दे दूरतो याति पातकम्। उदयाचलमारूढे दिननाथे तमो यथा॥' इति वचनात्सकलदुरितानां दूरापयाने विश्चिते ऐहिकपारत्रिकसुखसिद्धेरवश्यम्भावश्च सूच्यते। हरिरित्यनेन राधाया दुःखहरणकृतोद्यमत्वञ्च श्रीकृष्णस्य सूचितम् ॥ ८ ॥

अथ राधा तत्क्षणमागत्याङ्गानि स्पृशन्तं दक्षिणानिलमुपालभते — मनोभवेति ॥ हे मनोभवानन्दन मन्मथोद्दीपक चन्दनानिल मलयपवन त्वं मे च मह्यं प्रसीद प्रसन्नो भव। हे दक्षिण दक्षिणदिशि जात त्वं वामतां मुञ्च वक्रभावं त्यज। दक्षिणस्य वामताया विरुद्धत्वादिति भावः। दक्षिणः परच्छन्दानुवर्ती, तद्विपरीतो वाम इत्यर्थान्तरम्। ननु मया दाक्षिण्यमेवालम्ब्यते। कथ्यतान्त्वदिष्टमित्याशङ्कायामभिमतमर्थमाह — हे जगत्प्राण प्राणापानादिरूपेण सर्वप्राणिनां जीवदायिन। अनेन स्वाभिमतसम्पादनसामर्थ्यं प्रकाश्यते। माधवं श्रीकृष्णं मम पुरतो मदग्रभागे क्षणं विधाय कृत्वा प्राणहरो भविष्यसि। त्वदंशभूतान्

मत्प्राणानुपरक्षण एव हरिष्यसीत्यर्थः। तव दाक्षिण्यलवसद्भावे मदर्थितमेतत् कर्तुं सुशकमेवेति भावः। अत्र श्लेषोत्थापितं काव्यलिङ्गम्। वृत्तं वंशस्थम्॥ ७॥

पुनस्सखीं प्रति स्वावस्थादौस्थ्यमाह—रिपुरिति॥ हे सखि, यस्मिन् कृष्णे गते मां त्यक्त्वा क्वाप्यन्यत्र याते सति अयं परिदृश्यमानः सखीसंवासः प्रियसहचरीवर्गसहवासः रिपुरिव शत्रुरिव मनो मामकं हृदयं दुनोति परितापयति। सखीजनसहवासे शत्रुजनमध्यवासवन्मनो दूयत इत्यर्थः। तथा सुधारश्मिश्चन्द्रोऽपि विषमिव मनो दुनोति। हिमानिलोऽपि शीतलस्पर्शः पवनोऽपि शिखीव मनो दुनोति अग्निवच्चित्तं तापयति। आसां सर्वासामपि विकृतीनां श्रीकृष्णविरह एव हेतुरिति यावत्। एवं स्थिते अदये निर्दये तस्मिन् श्रीकृष्णे बहुविधतापकारणभूतत्वात् परिहरणीये अविश्वास्ये। एवकारेणान्यवैमुख्यं हृदयस्य प्रकाश्यते। हृदयं कर्तृ बलान्निगृहीतमपि निवारितमपि हठेनेत्यर्थः। स्वयमनन्यचोदनया वलते गच्छति। अहो मम मनसो दौश्शील्यमिति शेषः। उक्तमर्थमर्थान्तरेण समर्थयति—कुवलयदृशां सुन्दरीणां काम इच्छाविशेषः वामो विपरीतः। दुःखकारीति यावत्। तर्हि मनोविजयेन सुखकर एव कामस्सम्पाद्य इत्यत्राह—प्रकाममत्यर्थं निरङ्कुशः स्वच्छन्दप्रसरः। वशीकर्तुमशक्य इति यावत्। अत्र स्वभावोक्तिरर्थान्तरन्यासश्च। वृत्तं हरिणी ॥ ८॥

बाधामिति॥ हे मलयानिल मलयवायो त्वं बाधां विधेहि मम देहसन्तापं कुरु। मयैतदनुमतमेवेत्यर्थः। हे पञ्चबाण मन्मथ त्वं प्राणान्मदीयान् गृहाण स्वीकुरु। उन्नतजन्मत्वान्मलयानिलस्यान्यबाधकत्वमपरिहार्यम्। प्राणपञ्चकहरणकरणभूतशरपञ्चकशालित्वात्कामस्य विक्रमोऽपि दुर्वार एवेति भावः। युवयोः प्रयासस्सफलीभवतु। ममापि श्रीकृष्णविरहामयवेदनानामभावलाभात् प्रियमिदमित्यभिप्रायः। अतश्चाहं गृहान् भवनम्। 'गृहाः पुंसि च भूम्न्येव' इत्यमरः। नाश्रयिष्ये न प्रवेक्ष्यामि। मरणे निश्चिते गृहप्रवेशस्य वैयर्थ्यादिति भावः। एवमुपालब्धाभ्यां मलयानिलमदनाभ्यां तापिता दुस्सहार्त्या यमुनामुपालभते—हे कृतान्तभगिनि कालिन्दि ते तव क्षमया तितिक्षया किम्। न किमपि फलमित्यर्थः। मम भ्रातुः कृतान्तस्य राधाप्राणहरणे सौकर्यं भवतु। इयं सन्तप्यताम्। नाहमस्यास्तापं हरामीति मत्वा किल त्वं तितिक्षसे। सा तितिक्षा तव निष्फलेति यावत्। श्रीकृष्णवल्लभाया मे प्राणहरणाय मदनः कृतान्तोऽपि नालमिति तात्पर्यम्। अत एव निष्फलां क्षमामपास्य कार्यं

कुर्विति बोधयति— तरङ्गैर्ममाङ्गानि सिञ्च। मम देहदाहश्शाम्यतु। नो चेत्त्वत्तटपरिसरे स्थिताया मम तापनिर्वाणशक्तापि त्वं तदकुर्वाणा हलधरसोदरे श्रीकृष्णे विषये अपराधिनी स्यादिति भावः ॥ ९ ॥

प्रातरिति ॥ सखीमण्डले सखीसमूहे प्रातः राधागृहपरिसरागतं वेषप्रच्छन्नं गोविन्दं विलोक्य हसति सति स्वैरं स्वच्छन्दं यथा भवति तथा व्रीळया सखीकर्तृकहासनिमित्तया लज्जया चञ्चलमस्थिरं नयनयोरञ्चलमग्रम्। कटाक्षमित्यर्थः। राधाया आनने मुखे आधाय कृत्वा दूरमत्यर्थं स्मेरं स्मयशीलं मुखं यस्य तादृशोऽयमस्मत्प्रबन्धनायकः नन्दात्मजः श्रीकृष्णः जगतां जगद्वासिनामानन्दाय ऐहिकामुष्मिकसुखायास्तु भवतु। सखीमण्डलस्य हासकरं वेषान्तरं विशदयितुं विशिनष्टि—नीलनिचोळमाननं नीलचेलावृतं मुखं संवीत-पीताम्बरं पीताम्बरसंवृतमुरः वक्षःस्थलञ्च। चशब्दोऽर्थबलादायाति। दधतं धारयन्तम्। मुखस्योरसश्च संवरणोक्त्या जरद्वनितारूपधारणं व्यज्यते। तादृशवेषस्य परिहासास्पदत्वात्सखीजने परिहासप्रवृत्ते तत्परिहासकृतां व्रीळा-मभिनीय स्वच्छन्दं राधां कटाक्षेण हासमाधुर्यसहायेन क्षणविदितपरमार्थां विधाय रहस्याहूय यथेच्छं तया सह रन्त्वा सखीभिरविदित एव भगवान् गोविन्दस्त्रै-लोक्यवासिनामानन्दं कन्दळयत्वित्यर्थः। अत्रानुप्रासः स्फुटः। हास्यरसस्य व्यक्तत्वात्तस्य च प्राधान्याद्रसवदलङ्कारः। तेन च गूढसम्भोगस्य व्यज्यमानत्वा-दलङ्कारेण वस्तुध्वनिः। वृत्तं शार्दूलविक्रीडितम् ॥ १० ॥

इत्यखिलविद्यापरिवारश्रीमद्दक्षिणामूर्तिमहादेवप्रसादलब्धसाङ्गवेदपूर्वो-
त्तरमीमांसातर्कशब्दसाहित्यसार्वभौमचरकुरुकोण्डभट्टमहो-
पाध्यायानुजेन सर्वाम्बिकागर्भशुक्तिमुक्तामणिना
लक्ष्मीधरसूरिणा विरचितायां गीतगोविन्द-
व्याख्यायां श्रुतिरञ्जिन्याख्यायां
नागरनारायणाख्यस्सप्तमसर्ग-
विमर्शः सम्पूर्णः ॥

अष्टमः सर्गः ।

साकाङ्क्षपुण्डरीकाक्षः ।

गीतम्—१७

अथ तस्या एव राधाया अवस्थान्तररूपं खण्डितनायिकात्वं सम्यगेव वर्णयितुं पीठिकां रचयति—अथेति श्लोकेन ॥ खण्डितनायिकालक्षणन्तु, 'ज्ञातान्यासङ्गविकृतौ कान्ते रोषकषायिता । निश्वासकम्पखेदान्धा खण्डितेत्यभिधीयते ॥' इति । अथवा 'नीत्वान्यत्र निशां प्रातरागते प्राणनायके । अन्यासम्भोगचिह्नेक्षारुषिता खण्डिता मता ॥' इति मतान्तरम् । तदेवेह सोपयोगम् । अथ सख्यै विरहवेदनाकथनानन्तरम् । स्मरशरैः कामबाणैः जर्जरिता शतसहस्रायुतधा शकलीकृतशरीरापि । असह्यवेदनानुभवदशाप्रतीतिविषयोऽयमर्थोऽतिशयोक्त्याध्यवसीयते । कथमपि अतिप्रयासेन । यामिनीमिति साभिप्रायं विशेष्यम् । निमेषमात्रस्यापि कालस्य क्षेप्तुमशक्यत्वे काष्ठकलाक्षणमुहूर्तादिक्रमेण याममात्रे कथञ्चिन्नीते पुनस्तादृशयामद्वयमपि क्षेप्यमवशिष्यत इति त्रियामाया रात्रेः क्षपयितुमशक्यताद्योतनमभिप्रायो वेद्यः । अत एव कथमपीत्युक्तिः । विनीय क्षपयित्वा प्रभाते प्रातःकाले सति अग्रे आत्मनः पुरोभागे । आगतमिति शेषः । न केवलमागमनमात्रं कृतवन्तमपि तु प्रणतं नमस्कृतवन्तम् । किञ्चानुनयाय सान्त्वनाय यद्वचनन्तद्वदन्तं व्यक्तं ब्रुवन्तमपि प्रियं श्रीकृष्णं साभ्यसूयमसूयया सहितं यथा भवति तथा आह ब्रूते । तद्वचनस्य वर्ण्यमानतया वर्तमाननिर्देशः । आहेत्यव्ययमिति पक्षे उक्तवतीत्यर्थः । अत्र राधाया धीरात्वं व्यज्यते । स्मरशरजर्जरितत्वेऽपि त्रियामाविनयनात् कोटिकन्दर्पसुन्दरस्य नन्दसुतस्य साक्षादीक्षणेऽपि तत्प्रणामे अनुनयवचनश्रवणेऽपि साभ्यसूयवचनाच्चेत्यवगन्तव्यम् । वृत्तं पुष्पिताग्रा ॥ १ ॥

साभ्यसूयवचनप्रकारान् गीतेन विशदयति—रजनीत्यादि ॥ मलहरिरागेण गीयत इति । 'रविकिरणनिभप्रभाप्रकाशं रचितसुरासुरचित्तलोभवेषम् । महितहनुमदाननोत्थरूपं मलहरिसंज्ञमुशन्ति रागराजम्' ॥ इति तदनुसन्धानविधिः । रूपकताळेन वाद्यत इति । 'द्रुतद्वन्द्वं विरामान्तं रूपकः परिकीर्तितः' इति तल्लक्षणम् । याहीत्यादिकेशवेत्यन्तं पल्लवम् । तामन्वित्यादि विषादमित्य-

न्तमनुपल्लवम्। सर्वसाधारणत्वात्तदादौ व्याक्रियते। हे माधव लक्ष्मीरमण हे केशव गुडाकेशत्वात्पुंलक्षणयोगश्लाघनीयरूप त्वं याहि याहि गच्छ गच्छ। अत्र स्थित्वा वृथा कालक्षेपं मा कार्षीः। नात्र त्वद्दयिताया लक्ष्म्यास्सान्निध्यम्। अपि तु तज्जायस्या एव। अप्रतिकार्यदुःखशतदुःस्थितत्वान्ममेति यावत्। ननु लक्ष्म्यंशभूता त्वमेव मे प्रेयसी, नान्या काचिन्मानिनीति मा स्म कुप्यो ममानागमनात्। त्वत्सविधागतिप्रत्यूहशतं तत्त्वतोऽहं कथयामि। सम्यगेव निशमय। प्रसीद। इत्यादिश्रीकृष्णानुनयस्योत्तरमाह — मा कैतववादं वद। असत्यवचनं मा वादीरित्यर्थः। किञ्च हे सरसीरुहलोचन श्रीकृष्ण या तव विषादं हरति तामनुसर अन्विष्य सञ्चर। अत एव मयोक्तं वृथा कालहरणरूपत्वादत्रावस्थानस्य याहि याहीतीत्यभिप्रायः। ननु मम विषादहारिणी त्वमेव। अत एव मयाऽसमयेऽप्यवसरलाभादिहागतम्। त्वदन्यामहं द्रष्टुमपि नेच्छामि। किं पुना रमयितुमित्यादि वदन्तं श्रीकृष्णं प्रतिवक्ति — रजनीत्याद्यपादेन। रजनावतीतायां रात्रौ जनितः। न तु जातः। अतस्तत्कर्तृत्वमन्यस्या एवेति यावत्। गुरुरनल्पो यो जागरो निद्राक्षयस्तेन हेतुना यो रागो रक्तिमा तेन कर्त्रा कषायितं कषायीकृतम्। कलुषितमित्यर्थः। किञ्च अलसो निमेषो यस्य तत्। अपि च उदितः उत्पन्नः रसे सम्भोगशृङ्गारे अभिनिवेशोऽतिसक्तिर्यस्य तत्। अत्र मानसमभिनिवेशं नयने उपचरितमनुभावरूपेण तत्राविर्भावादिति ध्येयम्। एवं विशेषणत्रयविशिष्टं नयनं वहसि धारयसि। अत्रोत्प्रेक्षते — स्फुटं प्रत्यक्षीकृतमनुरागमिव। अतीतरात्रौ यया यथेच्छं रतवानसि तद्विषयं त्वन्मनोगतमनुरागं बहिरपि व्यक्तं सम्भावयामि त्वन्नयनयुगळमित्यर्थः। अत्रोत्प्रेक्षानुप्रासयोस्संसृष्टिः। हे माधव हे केशव अतस्त्वं तत्सविधं प्रति निर्विळम्बमेव याहि याहीति ध्रुवपदेन सहान्वयः। अमर्षवशाद्द्विरुक्तिः ॥ १ ॥

ननु प्रिये मास्मान्यथा मन्यथाः। त्वदेकशरणोऽहमन्यस्या गन्धमपि न सहे। किं पुनरन्याङ्गसङ्गम्। किन्तु त्वच्चिन्तया त्वद्विरहवेदनया च सत्यं जागरो मे महाञ्जात एव। तत्रान्यथाशङ्कां विहाय प्रसीदेत्याद्यनुनयन्तं श्रीकृष्णं प्रतिवक्ति — कज्जळेति ॥ हे कृष्णेति वक्ष्यमाणार्थयोग्यताभिप्रायगर्भा सम्बुद्धिः। अरुणं प्राग्रक्तवर्णं तव दशनवसनं दन्ताम्बरम्। ओष्ठद्वयमित्यर्थः।

तनोश्शरीरस्यानुरूपं रूपं वर्णं तनोति विस्तारयति। स्वरूपमात्रे ओष्ठद्वये रक्तिम्ना किं प्रयोजनम्। सर्वाङ्गीणं कार्ष्ण्यमेव श्लाघ्यमित्यभिमन्यमानं त्वदोष्ठयुगळं कर्तृ त्वदीयतनुसवर्णमेवाधुना वर्तते। त्वया तु तन्न विदितम्। मया पुनस्तच्च तत्कारणञ्च सम्यगेव विदितमिति भावः। तत्कारणं विशेषणेन निवेदयति—कज्जळेन मष्या मलिने असिते ये विलोचने अन्यस्या नयने तयोश्चुम्बनेन वक्त्रसंयोगेन कर्त्रा विरचितो निर्मितो नीलिमा नैल्यं यस्य तत् तादृशं दशनवसनम्। नयनयोश्चुम्बनस्थानत्वं कामशास्त्रविहितमिति प्रागवोचाम। अत्र तद्गुणालङ्कारः। तद्गुणस्स्वगुणत्यागादन्यदीयगुणग्रहः' इति लक्षणात् ॥ अनेन चालङ्कारेण हास्यरसध्वनिः ॥ २॥

न केवलं नयनचुम्बनादोष्ठद्वयमालिन्यमेव, अन्यदप्यन्यासङ्गचिह्नमनन्विष्टदृष्टं दिष्टविपर्ययान्मया न सह्यमित्याह—वपुरिति॥ हे माधव तव वपुः त्वदीयं शरीरं स्मरसङ्गरे सुरते खराणि क्रूराणि यानि नखराणि तैः क्षता रेखाः प्रत्यग्रनखव्रणानि यस्मिंस्तादृशं सत् मरतकशकले गारुत्मतरत्नखण्डे। मरतकमणिफलक इत्यर्थः। कलितायाः कल्पितायाः कळधौतलिपेः स्वर्णरेखायाः सम्बन्धिनं रतिजयलेखं रतेः कामपत्न्या जयसूचकं लेखं पत्रिकामनुसरति। रत्नशकलेषु वज्रसूच्या लिपिं लिखित्वा ता लिपीः पुनस्स्वर्णलेपेन व्यक्तीकृत्य कालान्तरेऽपि प्रामाण्यार्थं केचित्स्थापयन्ति प्रेषयन्ति चेत्याचारानुरोधादेवमुक्तिः। 'कळधौतं रूप्यहेम्नोः' इत्यमरः। खरशब्दो नखराणां वज्रसूचिसाम्यद्योतकः। लिपेर्लेखं लिपिमयं लेखमित्यर्थः। तथाच श्रीहर्षः—'वरणः कनकस्य मानिनीं दिवमङ्कादमराद्रिरागताम्। घनरत्नकवाटपक्षतिः परिरभ्यानुनयन्नुवास याम् ॥' इति। अथवा रतौ सुरते जयो रतिजयः। तत्प्रकाशको लेखो रतिजयलेखः। मरतकशकलकलितकळधौतलिपिमयो यो रतिजयलेखस्तम्। यस्याः कस्याश्चिद्भवता व्यतीतरात्रौ सङ्गतायास्सम्बन्धिनं रतिजयलेखं कर्मभूतं तवोक्तविशेषणविशिष्टं वपुः कर्तृ अनुसरति अनुरुन्धे। अनुसरणमनुकरणम्। तत्तुल्यं वर्तत इत्यर्थः। सा हि मत्सपत्नी मम दुस्सहमिदं मां बोधयितुं प्रेषितवतीति यावत्। अयमेवार्थोऽन्येन कविना सूचितः। 'कान्त त्वद्दयिता मम प्रियसखी यत्प्राभृतं प्राहिणोत्त्वद्व्याजं नखदन्तलाञ्छनमिदं दुष्प्रापमस्मद्गृहे।' इति। अत्रोपमालङ्कारः ॥ ३॥

चरणेति ॥ चरणकमलाभ्यां तस्याः पादपद्माभ्यां गळत् स्रवद्यदलक्तकं लाक्षारसस्तेन सिक्तमार्द्रीकृतं तवेदं हृदयमुरःस्थलमुदारं धन्यम्मन्यं सत् मदनद्रुमस्य तद्विषयकानुरागवृक्षस्य शाखोपशाखाविटपोत्सेधक्रमादन्तर्हृदि निरन्तरायं वर्धमानस्य नवं नूतनं किसलयपरिवारं पल्लवमण्डलं बहिर्दर्शयतीव। प्रेमातिशयात्तच्चरणयोर्हृदि निवेशनमूह्यम्। 'हा हन्तैतत्पदाब्जद्वयमपि कुचयोरेकदा योजयेयं स्वप्नेऽप्येनं कदा वा दृढतरमुपगूहामि हा मे दुराशा। कृष्णस्यापीय रूपामृतमिति महिळा मोहमाहन्त याताः, इति प्रयोगे महिळानां मनोरथवत्कृष्णस्यापि तां प्रति प्रेमातिशयवशान्मनोरथस्सञ्जातः। स एव मदनद्रुमशब्देन राधया कथितः। स च सिद्धत्वात्पल्लवितः कल्पित इति मन्तव्यम्। अत्र रूपकोत्थापिता उत्प्रेक्षा ॥ ४ ॥

दशनेति ॥ हे माधव भवदधरगतं दशनपदं दन्तक्षतं कर्तृ मम चेतसि मन्मनसि खेदं जनयति अन्यस्यास्सम्भोगचिह्नत्वादेतन्मदीयमानसे खेदावहं जायत इत्यर्थः। तत्रानुपपत्तिमाह—तवैतद्वपुः मया सहाभेदं भेदरहितम् इयन्तं कालमेवं स्थितं कर्तृ अधुनापीदानीमपि कथं केन प्रकारेण तथा कथयति। अद्यारभ्यावयोर्भिन्नत्वादिदमयुक्तमेवेति भावः। सुचिरपरिचयारूढप्रेमवासनाया अपीतः परमनुचितत्वादिति यावत्। द्वयोश्शरीरयोरैक्यसम्भावनायामेकस्मिन् शरीरे कश्चित्क्षतेऽपि द्वयोरपि तुल्यखेदत्वोपपत्तिः। तादृशः कालस्त्वावयोर्गत एव। इतः परन्त्वद्वपुस्तावकं, मद्वपुर्मामकमिति जातम्। एवं जाते भवदधरगतदन्तक्षतकर्तृकखेदस्तवैवोचितः। न ममापि। इतः परमावयोरसन्धेयत्वात्। अत इदमयुक्तमित्यर्थः। अत्रामरुकः—'पुरासीदस्माकं प्रथममविभिन्ना तनुरियं ततो नु त्वं प्रेयान्वयमपि हताशाः प्रियतमाः। इदानीन्नाथस्त्वं वयमपि कळत्रं किमपरं हतानाम्प्राणानां कुलिशकठिनानां फलमिदम् ॥' इति। दन्तक्षतदर्शनजनितस्य खेदस्यामर्षरूपस्य क्षतजनितवेदनायाश्चाभेदाध्यवसायादतिशयोक्तिमूलेयं वक्रोक्तिरलङ्कारः, काकानुपपत्तिकल्पनात्। 'वक्रोक्तिः श्लेषकाकुभ्यामपरार्थप्रकल्पनम्' इति लक्षणात्। तथाच इतः परमावयोर्न सन्धिरिति वाक्यार्थरूपस्य वस्तुनो व्यज्यमानत्वादलङ्कारेण वस्तुध्वनिः। तेन च श्रीकृष्णस्य कृतघ्नतारूपदुर्जनधर्मव्यक्तिरनुरणितध्वनिश्च। 'मृद्घटवत्सुखभेद्यो दुःसन्धानश्च दुर्जनो भवति। सुजनस्तु कनकघटवद्दुर्भेद्योऽसौ सुसन्धानः' इति प्रसिद्धेः ॥ ५ ॥

बहिरिवेति ॥ हे माधव हे कृष्ण 'आसन्वर्णास्त्रयो ह्यस्य गृह्णतोऽनुयुगन्तनुः। शुक्लो रक्तस्तथा पीत इदानीं कृष्णताङ्गतः ॥' इति गर्गमुनिना बहिर्मालिन्यमात्रस्य दृष्टत्वात्कृतकृष्णनामन् तव मनोऽपि हृदयमपि वहिः शरीरबहिर्भाग इव मलिनतरमतिमलीमसं भविष्यति भवितुमर्हति। नूनम्। निश्चितमेतन्मयेत्यर्थः ननु गर्गेणाप्यविदितं मम मनो मलिनतरमिति। त्वया कथं विदितमित्याशङ्कायामनुमानेन ज्ञातमिति द्योतयितुं मलिनमनसां कर्म कथं भवता क्रियत इति पृच्छति— अथेति प्रश्ने। 'मङ्गलानन्तरारम्भप्रश्नकार्त्स्न्येष्वथो अथ' इत्यमरः। कथं केन प्रकारेण। प्रयोजनोद्देशोऽत्र प्रकारो विवक्षितः। किं फलमुद्दिश्येत्यर्थः। असमशरज्वरेण मदनामयेन दूनमनुगतन्तदुपशमनार्थित्वादनुवर्तनपरं जनं मामित्यर्थः। वञ्चयसे प्रतारयसि। ''वैद्यः क्रूरो यमो वात्र यमात्क्रूरतरो भिषक्। असून् हरत्येव यमो वैद्यस्तु सवसूनसून् ॥' इत्यादिभिः क्रूरतरत्वेन प्रसिद्धा वैद्या अपि ज्वरदूनाननुगतानुल्लाघयितुमेव प्रायशो यतन्ते। आपद्येव परं परित्यजन्ति। कदापि न वञ्चयन्ति। 'यावदुच्छ्वसिति प्राणा यावदारण्यमौषधम्। तावच्चिकित्सा कर्तव्या दैवस्य कुटिला गतिः ॥' इति दयया प्रवर्तन्ते। एवं स्थिते त्वं पुनः किं प्रयोजनमुद्दिश्य तादृशमशरणं जनं वञ्चयसे। अतिमलिनमानसोऽयमित्यकीर्तिं विना नान्यत् फलमीदृशेन दुष्कर्मणा सेत्स्यतीत्यर्थः। एतादृशो व्यापार एव मलिनमनस्कतानुमाने हेतुरिति यावत्। अत्रानुमानालङ्कारः ॥ ६ ॥

भ्रमतीति ॥ हे माधव भवानबलाकवलाय अबलानां बलहीनानां मादृशीनां स्त्रीणां कवलाय ग्रासीकरणार्थं वनेषु वृन्दावनप्रदेशेषु भ्रमति दिवानिशं सञ्चरति। अयमर्थोऽधुना मया केवलं विदितः। अत्र अस्मिन्नर्थे। विचार्यमाण इति शेषः। किं विचित्रमाश्चर्यम्। न किमपि विस्मयनीयमित्यर्थः। वैचित्र्याभावे हेतुमाह—हे वधूवधनिर्दय स्त्रीवधे दयालेशहीनहृदय श्रीकृष्ण पूतनिका पूतना। स्वार्थे कः। प्रत्ययस्थादित्यादिनाकारस्येत्वम्। सैव। ते इत्यर्थात्। बालचरित्रमार्भकं कर्म प्रथयति ख्यापयति। मानुष्यकमारणनिपुणां राक्षसीं पूतनाख्यां मायया मानुषीभूयागत्य स्तन्यदायिनीमतिबाल्ये निष्प्रयासं श्वासपानेन निहत्य पातितवतस्तवाधुना वनाटननैपुणे सति दुर्बलमादृशस्त्रीजनमारणविधौ प्रयासः कियानिति विचारणदशायां वैचित्र्याभावः प्रकाश्यते। बाल्ये राक्षसीं हतवतस्तव तारुण्ये मानुषीमारणप्रावीण्यं किमु वक्तव्यमिति

कैमुतिकन्यायेनार्थान्तरापातनादर्थापत्तिरलङ्कारः। तेन च 'जयति तेऽधिकं जन्मना व्रजःश्रयत इन्दिरा शश्वदत्र हि। दयित दृश्यतां दिक्षु तावकास्त्वयि धृतासवस्त्वां विचिन्वते' इति 'विषजलाप्ययाद्व्यालराक्षसाद्वर्षमारुताद्वैद्युतानलात्। वृषमयात्मजाद्विश्वतो भयादृषभ ते वयं रक्षिता मुहुः' इत्यादि च भागवतवचनमनुसृत्य 'वरद निघ्नतो नेह किं वधः' इति वधनिन्दावचसा भूयसा स्तुतेरेव व्यज्यमानत्वाद्व्याजस्तुत्यलङ्कारध्वनिः ॥ ७ ॥

श्रीजयदेवेति ॥ हे विबुधा विद्वांसः श्रीजयदेवेन भणितो वर्णितः रतिवञ्चितायाः क्रीडाविधौ किञ्चित्प्रतारिताया अत एव खण्डितताया ईर्ष्याकषायितायाः युवतेर्गोपतरुण्या राधाया विलापः परिदेवनं यस्मिंस्तादृशम्। इदं गीतमिति विशेष्यमध्याहर्तव्यम्। 'विशेषणमात्रप्रयोगो विशेष्यप्रतिपत्तौ, इति वामनसूत्रात्। किञ्च सुधावदमृतवन्मधुरम्। अपि च विबुधालयतः स्वर्गात्सकाशादपि दुरापं दुष्प्रापञ्च। तादृशमिदं गीतं शृणुत सम्यगनन्यगतहृदयास्सन्तः समाकर्णयत। एतच्छ्रवणसमय एव निरतिशयं सुखं पुण्यञ्च स्यात्। ततश्च पुण्डरीकेक्षणाद्वेतनवित्तलाभवद्भगवति श्रीकृष्णे नवलक्षणा भक्तिस्ततो निश्शेषदुःखोच्छित्तिरूपा मुक्तिश्चावश्यं सेत्स्यतीत्यतःपरं किमवशिष्यत इति भावः। सुधामधुरमिति 'उपमानानि सामान्यवचनैः' इति समासः। विबुधालयतोऽपि दुरापमिति व्यतिरेकालङ्कारः। शृणुत सुधामधुरं विबुधा वदतापि सुखं सुदुरापमिति पाठान्तरम्। अत्रापिशब्दश्चार्थः। शृणुत वदत चेति। सुखं सुखकरम्। 'अथ त्रिषु द्रव्ये पापं पुण्यं सुखादि च' इत्यमरः। सुदुरापमिदं गीतं शृणुत गायत चेत्यर्थः। श्रोतॄणां गातॄणाञ्च सुखकरत्वं गीतस्य पुण्यश्रवणकीर्तनत्वाद्भगवतः श्रीकृष्णस्य विद्वद्भिरेव ज्ञातव्यमिति विबुधाः सम्बोधिता इति बोध्यम्। 'अपि सर्वविदो न शोभते वचनं श्रोतरि बोधवर्जिते। परिणेतरि नष्टलोचने सफलः किन्नु कलत्रविभ्रमः॥' इति न्यायात्। वस्तुतस्तु सर्वसाधारणं पठनश्रवणफलमित्यनुसन्धेयम् ॥ ८ ॥

याहि याहीत्यमर्षवचननिशमनेऽप्यनुनयधुरन्धरं यानानुन्मुखं श्रीकृष्णं प्रति पुनरपि परुषमाह श्लोकेन – तवेति ॥ हे कितव विविधव्याजशालिन् धूर्तवृत्ते श्रीकृष्ण प्रियाया मत्तो दयिततमाया यस्याः कस्याश्चिद्रमण्याः पादस्थितेनालक्तेन लाक्षाद्रवेण छुरितं सम्पृक्तम्। लिप्तमिति यावत्। अत एवा-

1 मयासुरा

रुणद्योति अरुणो द्योतो दीप्तिरत्रास्तीत्यरुणद्योति। ततश्च बहिः प्रसरदनुरागम् अन्तर्व्याप्य तत्रामान् बहिरपि प्रसरन्ननुरागस्तद्विषयोऽभिलाषो यस्मिंस्तादृशमिव सम्भावनीयं तवेदं हृदयमुरःस्थलं पश्यन्त्या ममाधुना प्रख्यातः प्रसिद्धस्त्वत्सखिभिर्मत्सखीभिस्त्वया मया च सपत्नीभिस्तद्वयस्याभिश्च सम्यग्विदितो यः प्रणयभरो मिथःस्नेहातिशयः 'त्वत्तस्त्वाम्मां प्रवदति जनो यत्त्वयि प्रेमबन्धे मत्तो मान्त्वाम्मयि च' इति शुकसन्देशोक्तरीत्या वर्तमानस्य तस्य भङ्गेन अकाण्डोदितशुष्काशनिपातजनितेनेव झटिति त्रुटनेन हेतुना अद्य अस्मिन् समये त्वदालोकस्त्वद्दर्शनं कर्तृ शोकादपि त्वद्विरहदुःखादपि। असह्यामिति शेषः। किमपि। अखण्डमव्ययमिदम्। अनिर्वाच्यां लज्जां जनयति व्रीडामातनोति। इतः परं कदापि त्वन्न दृश्यसे चेत्त्वद्विरहदुःखं मया सुसहमेव। इदानीमन्यासम्भोगचिह्नमिहनुवं वहतस्ते दर्शनमतीवासह्यमेवेति भावः। अत एव मया बहुशो हि याहि याहीत्युक्तम्। तथापि न यातुमिच्छसि चेन्मया दुःखभारालसाङ्ग्याप्यन्यतो गम्यत एवेति यावत्। अत्र काव्यलिङ्गमलङ्कारः। तेन चानुप्राससाहाय्यकेन परां कोटिमारूढो विप्रलम्भशृङ्गारो व्यज्यते ॥ २ ॥

अथेमं सर्गं समापयिषुः कविराशिषमाह—अन्तरिति॥ कंसरिपोः श्रीकृष्णस्य वंशीरवो वेणुनादनं वो युष्माकं मत्प्रबन्धश्रवणपठनार्थानुसन्धानादिपराणां श्रेयांसि परोपयतु चतुर्वर्गपुष्टिं कन्दलयत्वित्यर्थः। श्रेयसां प्ररोपणे नैपुणं कंसारिवेणुरणितस्याह—अन्तर्मोहनेन मनोव्यामोहनेन हेतुना चलतां स्थानभ्रंशिनां मन्दाराणां शेखरकुसुमविशेषाणां विस्रंसनः पतनकारी। एतद्विशेषणं तुम्बुरुनारदादीनां दिव्यगान्धर्वपारदर्शिनामपि विकृतिविशेषप्रतिपादकम्। किञ्च कुरङ्गीदृशां रम्भामेनकातिलोत्तमाघृताच्युर्वश्यादीनां गानाभिनयादिभिर्युवजनमनोमोहिनीनामप्सरसां स्तब्धाकर्षण लोचनोत्सवमहामन्त्रः स्तब्धानामाकर्षण आकृष्टा च लोचनोत्सवो नयनानन्दप्रदश्च कश्चन महामन्त्रः। वंशीरवस्य श्रावणत्वेऽपि नयनानन्दप्रदत्वं तस्य मन्त्रत्वारोपादचिन्त्यो हि मणिमन्त्रौषधीनां प्रभाव इति प्रसिद्धिमनुरुध्येति ध्येयम्। वस्तुतस्तु त्रिभुवनोदरव्यापिना वेणुनादेन त्यक्तान्यकार्याणं विमानेनागत्य वृन्दावनोपरि स्थित्वा समीपे श्रीकृष्णमूर्तिदर्शनमेव लोचनोत्सवस्तासाम्। अतः कारणे कार्यव्यपदेश इति च मन्तव्यम्। अपि च दृप्यद्भिर्दर्पाध्मातैः दानवैः प्रलम्बधेनुकबककेशिनरकादिभिर्दूयमानानां तदुपद्रवासहिष्णूनां दिविषदान्देवानां दुर्वारा वारयितुमशक्या या दुर्वेदना दुश्चिन्तादि-

रूपा तस्या ध्वंसः नाशहेतुः । एवं गन्धर्वाप्सरस्सुराणां विकारकारी श्रीकृष्णवेणुनादो युष्माकमैहिकामुष्मिकसुखपुष्टिं करोतित्यर्थः । अत्र 'व्योमयानवनितास्सह सिद्धैः' इत्यादिभागवतवचनार्थस्सङ्क्षिप्त इति मन्तव्यम् ॥ ३ ॥

इत्यखिलविद्यापरिवारश्रीमद्दक्षिणामूर्तिमहादेवप्रसादलब्धसा-
ङ्गवेदपूर्वोत्तरमीमांसातर्कसाहित्यसार्वभौमचरकुरुकोण्डु-
भट्टमहोपाध्यायानुजेन सर्वाम्बिकागर्भशुक्तिमुक्ता-
मणिना लक्ष्मीधरसूरिणा विरचितायां गीत-
गोविन्दव्याख्यायां श्रुतिरञ्जिन्याख्यायां
साकाङ्क्षपुण्डरीकाक्षसंज्ञा-
ष्टमसर्गभावार्थविमर्शः
समापितः ॥

अमन्दगोविन्दः

गीतम् ॥ १८ ॥

अथैवमनुनयासाध्ये कोपमास्थिताया राधायास्समीपादपगते श्रीकृष्णे पुना राधायाः कलहान्तरिताख्यं दशाविशेषमाह—तामिति ॥ कलहान्तरितालक्षणन्तु 'कोपात्कान्तं परामृश्य पश्चात्तापसमन्विता। कर्तव्यविधुरा प्रोक्ता कलहान्तरिता बुधैः ॥' इति। अथ श्रीकृष्णानुनयवचननिरासानन्तरं सखी मन्मथेन पश्चात्तापवर्धनेन मनःक्षोभकारिणा कामेन खिन्नां दुःखिताम्। कृत्यमूढामित्यर्थः। रतौ रसेनौत्सुक्येन भिन्नां प्रशान्तकलहकालुष्याम्। अत एव विषादसम्पन्नाम्। विप्रतीसारभारविधुरमनसमित्यर्थः। तत्र हेतुमाह—अनुचिन्तितहरिचरिताम्। अनुचिन्तितानि पुनःपुनरालोचितानि हरिचरितानि श्रीकृष्णचरितानि यया ताम्। अत्र 'स्मरन्त्यश्चापराश्शौरेरनुरागस्मितेरिताः। हृदिस्पृशश्चित्रपदा गिरस्सम्मुमुहुः स्त्रियः' ॥ इति भागवतप्रतिपादितप्रकारश्रीकृष्णलीलाविशेषानुस्मरणात्पश्चात्तापाविर्भावः प्रत्येतव्यः। एवं कलहान्तरितां श्रीकृष्णविषयेण कलहेन प्रणयकोपेनान्तरितां तिरोहितवाक्कायप्रवृत्तिं कलहान्तरिताख्यनायिकावस्थालक्षणसम्पूर्णां तां राधामुवाच उक्तवती। वृत्तमार्या ॥ १ ॥

तदुक्तिप्रकारं गीतेनाह—हरिरिति ॥ मध्यमादिरागेण गीयत इति। 'चक्रपाणिनाम यद्वदुक्तिदोषशान्तये तक्रपानकं यथैव भुक्तिदोषशान्तये। तद्वदप्यवन्दहत्ययुक्तरागगानजं मध्यमादिराग एष वुद्धिसन्निधापितः ॥' इति, 'यथेष्टं वद मा भैषीरन्ते नारायणं वद। यथेष्टं भुङ्क्ष्व मा भैषीस्तक्रं सलवणं पिब' ॥ इति च प्रसिद्ध्या राधाया अप्रियोक्तिमये गीते सख्या रागोऽयमूरीकृत इति कवेरभिप्रायः। 'सिद्धसाध्यसुरचारणप्रियो मध्यमाद्यदसुराशरादृतः। हृद्यमाल्यमणिभूषणोज्ज्वलो मध्यमादिरिति रागराण्मतः ॥' इति तदुपासनाविधिः। एकताळलक्षणं प्रागुक्तम्। माधवे माधवे इति पल्लवः। मा कुरु इत्याद्यय इत्यन्तश्चानुपल्लवः। तयोरादौ व्याक्रिया। अय इत्यव्ययमामन्त्रणे अयि हे इत्यादिवत्। हे मानवति कुत्सितमानशालिनीत्यर्थः। निन्दार्थे मतुप्। मादुपधायाश्चेत्यादिना वकारः। उगितश्चेति ङीप्। मानः प्रणयकलहः। स चैव्यक्तिकृतः। तस्य कुत्सनीयता चैतद्गीतानन्तरश्लोकेऽपि वक्ष्यते। हे राधे माधवे

लक्ष्मीरमणे। त्वदनुवर्तनार्थमागतें सतीति शेषः। लक्ष्मीकान्ते प्रियास्त्यक्त्वा त्वया रन्तुमुपागते त्वत्सौभाग्यमनालोच्य त्वया मानः कथं कृत इति भावः। नन्वहमपि जाने लक्ष्मीनानिरेष सुरकार्यं चिकीर्षुः कृष्णत्वेनावतीर्ण इति। अतस्तन्नावजाने मानेऽपि सति। किन्त्वन्यगोपीसाधारणप्रणयस्य तस्य कथं कैतवादिकं मृष्यामीति चेदत्राह—माधवे मधुकुलसम्भूते। स्वकुलत्राणधुरन्धरत्वादचिरेण मधुरां प्रति प्रतिष्ठास्यमानं तिष्ठति किन्तन्निरोत्स्यसीति वा भावः। तादृशे श्रीकृष्णे विषये मामीर्ष्याकृतं वैमुख्यं मा कुरु। माने कृते स्वसुखस्यैव भङ्गसम्भवादिति भावः। माने कृते प्रत्यवायमाह—मधुपवने वासन्तिके मरुति वहति वाति सति हरिः श्रीकृष्णोऽभिसरति त्वद्वसतिमभिगच्छति। यदीत्यर्थात्। हे सखि राधे अधिकमतिमहत् सुखं येन तदधिकसुखम्। तादृशं वस्तु अपरमन्यत् भुवने लोके किम्। यद्दर्शनमात्रमपि साध्यतयाभिसन्धाय दिव्याङ्गना अपि यदधिष्ठितन्देशमन्विष्य महता प्रयासेन तत इतो वलन्ते, तादृशतारुण्यरूपलावण्यमाधुर्यसौभाग्यादिगुणगणनिधिर्माधवस्त्वदनुवर्तनाय त्वद्वसतिं प्राप्नोति चेत्तदधिकं सुखं लोके किमपि नास्त्येव। अतस्तस्मिन्नपराधिन्यपि मानं मा कुर्विरत्यन्वयः। अतोऽनुचिता तस्मिन्नीर्ष्या न कर्तव्येति भावः ॥ १॥

एवमकार्यं कृतन्त्वयेति बोधयित्वा पश्चान्मदुक्तहितानवबोधे तव सौभाग्यच्युतिरूपः प्रत्यवायो भवितेत्याह—तालेति ॥ तालफलादपि गुरुं पृथुम्। रसेन रागेण सह वर्तन्त इति सरसा अनुरागिणः तानतिक्रान्तोऽतिसरसः। तदतिक्रमणन्तदभिलाषावगणनम्। तादृशम्। निरुपमसौभाग्यमित्यर्थः। कुचकलशं स्तनकुम्भम्। स्वकीयमिति शेषः। किमु कस्मात्कारणात् विफलीकुरुषे निष्फलमातनुषे। श्रीकृष्णवक्षोविक्षेपः खलु तज्जन्मफलम्। तदभावे नैष्फल्यन्तवाप्यनुमतमेव। तन्नैष्फल्यं स्वयमेव क्रियते त्वयेत्यहो तवानभिज्ञतेति भावः। च्विप्रत्ययेन च इयन्तं कालं सफलस्य सत इदानीं वैफल्यमिति द्योत्यते। आत्मनेपदेन क्रियाफलस्य कर्तृगामित्वं प्रत्याय्यते ॥ २ ॥

कतीति ॥ हे सखि अनुपदं प्रतिस्थानम्। वीप्सायामव्ययीभावः। अचिरं निर्विलम्बं यथा भवति तथा इदं वक्ष्यमाणं वस्तु। कति। वारमिति शेषः। न कथितं नोक्तम्: स्थाने स्थाने बहुवारं निर्विलम्बमुक्तमेव मयेत्यर्थः। तत्किम्। मया सकृदपि सम्यङ्न श्रुतमिति चेदत्राह—हरिं श्रीकृष्णं मा परिहर मा त्याक्षीः।

कृतागसं तं द्रष्टुमपि न सहे, किं पुना रमयितुमिति मा स्म चिन्तयः। सर्वात्मना दृष्टन्तमनुरुन्ध्येवेति भावः। तत्र हेतुं द्योतयन्ती हरिं विशिनष्टि—अतिशयेन रुचिरं सर्वलोकातिशायिसौन्दर्यसौभाग्यपारमैश्वर्यसम्पन्नमित्यर्थः। अतो माधवे मानं मा कुर्वित्यन्वयः ॥ ३ ॥

किमितीति ॥ हे सखि राधे त्वं किमति विषीदसि। कस्माद्धेतोर्दुःखितासीत्यर्थः। नाहं विषीदामि। निःस्नेहं तन्निरस्य प्रसीदाम्येवेति चेत्तत्राह—किमिति रोदिषि अश्रूणि मुञ्चसि। किमिति विकला विह्वलचित्तासि। रोदनं चित्तवैकल्यञ्च विषादानुभावौ स्फुटावेवेत्यर्थः। अनेन तव चेष्टितेनानिष्टं किमपि स्यादित्याह—सकला सर्वकलाभिस्सम्पन्ना तव युवतिसभा सखीसङ्घः हसति। त्वामिति शेषः। त्वां परिहसिष्यतीत्यर्थः। अथवा तवेत्यत्र 'कर्मण्यपीति केचित्' इति वचनात् 'भजे शम्भोश्चरणयोः' इतिवत्कर्मणि षष्ठी। अस्मिन् पक्षे युवतिसभायास्त्वदीयत्वं प्रकरणसिद्धम्। प्रणयकोपात् कृष्णं पराभूय विषीदन्तीञ्च त्वामवलोक्य सकलस्सखीजनो हसिष्यति। अतो माधवे मानं मा कुर्वित्यन्वयः। हसतीति वर्तमानसामीप्ये भविष्यदर्थे लट्। अथवा वर्तमानार्थ एव वा सुघटः ॥ ४ ॥

मृदुनळिनीति ॥ हे सखि नयने त्वदीयनेत्रे सफलय सफले कुरु। केनेत्यत्राह—मृदुनळिनीदळमये शीतळे च शयने तल्पे हरिं त्वद्विरहसन्तापदूनं श्रीकृष्णमवलोकय अभिसृत्य पश्य। यदि कोपं विहाय कोटिकन्दर्पसुन्दरदिव्यमङ्गळविग्रहं श्रीकृष्णं समभिसृत्य कुसुमशयने न पश्यसि, तर्हि त्वन्नयनयोर्जन्मैव वृथेति भावः। अतो माधवे मानं मा कुर्वित्यन्वयः ॥ ५ ॥

जनयसीति ॥ हे सखि त्वं मनसि हृदये गुरुखेदं प्रबलं व्याक्षेपं किमिति जनयसि कस्मात्कारणादुत्पादयसि। कृतागसं प्रत्यन्यजनवत्प्रणयकलहेन मानः कृतः। पश्चात्कथं तदभिसरणं क्रियत इत्यादि विचार्य तदुपायादर्शनात् खेदश्चेदत्रोपायो मया सम्यगालोचितो वर्तवते। खेदं मा कुर्वित्यन्वयः। किञ्च मम वचनं शृणु सावधानमाकर्णय। अनुतिष्ठ चेत्यर्थः। यतो मद्वचनमनीहितभेदम् अनीहितोऽनिष्टो भेदो युवयोर्विरहो यस्य तादृशम्। अत्र मनोधर्मो वचस्युपचरितः ज्ञेयः। यदि स्निग्धाया मम मते वर्तसे, तर्हि त्वदभिलषितसिद्धिरवश्यमचिरेण स्यात्, तव लाघवञ्च न स्यादिति भावः ॥ ६ ॥

यद्येवमहं त्वद्वशे वर्तिष्ये, सम्यगुच्यतां को मे सन्तापशान्त्युपाय इति चेत्तत्राह— हरिरिति ॥ हे सखि हरिः श्रीकृष्ण उपयातु त्वदन्तिकं प्राप्नोतु। तत्रानुमतिरेवादौ कर्तव्या। पूर्वं त्वदन्तिकं प्राप्तः प्रेम्णा त्वामनुनयन् प्रियतमः श्रीकृष्णस्त्वया प्रणमन्नपि याहि माधव याहि केशवेत्यादिपरुषवादिन्या मानिन्या निरस्यमानो निष्फलप्रयासतया विमनायमनो निष्क्रम्य नातिदूरे यत्र कुत्रापि वर्तते। तमहमन्विष्य दृष्ट्वा प्रसन्ना त्वयि राधेति प्रियमाख्यायानेष्यामि। एवं मया समानीतो हरिरखिलक्लेशहारी त्वत्सकाशमागच्छतु। तावतैव ते वेदना प्रायशश्शाम्यति। किञ्च मधुरं हृदयङ्गमं यथा भवति तथा बहु अनेकप्रकारम्। वचनमित्यर्थात्। वदतु ब्रवीतु। तत्राप्यनुज्ञा दातव्या। ततस्तदुपयानात्तदीयमधुरवचश्श्रवणाच्च ते वेदना सर्वापि निश्शेषीभविष्यति। एष मया दृष्ट उपायः। तदङ्गीकरणात्तव सुखसिद्धिर्निश्चितैवेति भावः! एवं कर्तव्ये निश्चिते त्वं हृदयं किमिति कस्माद्धेतोरतिविधुरं कर्तव्यमौढ्यगाढसन्तापविवशं करोषि। तथा माकुरु। माधवे मानञ्च मा कुर्वित्यन्वयः ॥ ७ ॥

श्रीजयदेवेति ॥ श्रीजयदेवेन भणितं वर्णितम् अतिललितमत्यन्तसुकुमारं हरिचरितं श्रीकृष्णशृङ्गारचेष्टितं रसिकजनं सहृदयसमुदायं सुखयतु सुखिनं करोतु। अतिललितमित्यनेन विशिष्यालङ्कारवैचित्र्याद्यभावेऽपि माधुर्यातिशयशालित्वान्मृद्वीकप्रायतास्य गीतस्य वेदितव्या ॥ ८ ॥

एवमत्यर्थमधुरवचनेन सन्तापशान्त्युपायं सख्यै निवेद्य तदनुमतये किञ्चित्पारुष्यगर्भमुपालभते—श्लोकेन स्निग्धेति ॥ हे विपरीतकारिणि आत्मनीनेतराचरणशीले सखि राधे यद्यस्मात्कारणात् त्वं स्निग्धे त्वयि निष्कपटनिरपायप्रेमणि तस्मिन् प्रिये श्रीकृष्णे विषये परुषा क्रूरवाङ्मनसप्रवृत्तिरसि भवसि, पुनर्यस्मात्कारणात् प्रणमति समीपं प्राप्य सविनयानुनयं नमस्कुर्वति तस्मिन् प्रिये श्रीकृष्णे त्वं स्तब्धासि निश्चलव्यवसायासि, पश्चाद्रागिणि त्वद्विषयानुरागदार्ढ्यप्रकाशनपरवचनशतशपथादिव्यापृते तस्मिन् प्रिये विषये त्वं द्वेषस्थासि अस्थानगृहीतकोपभरासि। भूयो यस्मात्कारण दुन्मुखे उत्सुकात्मनि तस्मिन् प्रिये श्रीकृष्णे विमुखतां वैमुख्यं प्राप्तासि। अमूनि चत्वारि कारणानि तव चतसृणां वेदनानामिति बोधयति— तत् तस्मात्कारणात तवाधुना श्रीखण्डचर्चा चन्दनानुलेपनं विषं सद्यःप्राणहरम्। जातमिति शेषः। शीतांशुश्चन्द्रः तपनः प्रळयकालसूर्यो जातः। हिमं तुहिनसलिलं हुतवहः संवर्ताग्निर्जातः। क्रीडामुदः स्वच्छन्दविहारजन्यसन्तोषाः यातनाः यमभटकृतदण्डनानि जाताः। इत्येतच्चतुष्टयस्य फलतया चतुष्टयमेतद्युक्तं योग्यमेव। अतः स्वकृतस्य कर्मणः फलं सर्वैरपि भोक्तव्यम्। तत्र न परं प्रति कोपो युक्त इति भावः। अत

कर्मणान्तत्फलानाञ्च समसङ्ख्याकत्वेन निर्दिष्टत्वाद्यथासङ्ख्यालङ्कारः। विपरीतकारिणीति सम्बुध्यर्थस्य स्निग्धे प्रणमति रागिणि उन्मुखे तस्मिन् प्रिये इति प्रियविशेषणचतुष्टय्याः परुषा स्तब्धा द्वेषस्था विमुखतां प्राप्ता इति तत्तद्विपरीतपदोपादानेन समर्थितत्वाद्वाक्यार्थहेतुकं काव्यलिङ्गञ्च। स्वकर्मदोषप्राप्तस्य दुःखस्य परिहाराय पश्चात्ताप एव प्रथमः प्रतीकारः। पश्चिमः पुनर्बन्धुजनवशवर्तित्वमिति वस्तुध्वनिश्च ॥ २ ॥

अथ सर्गसमापनाय कविराशिषमाह—सान्द्रानन्देति ॥ श्रीगोविन्दस्य राधाराधनसन्तुष्टस्य श्रीकृष्णस्य पदारविन्दं कर्मभूतं वयं वन्दामहे प्रणमामः, स्तुमश्च। तन्नतिनुत्यो. प्रयोजनमाह—अशुभास्कन्दाय अशुभानाममङ्गळानां दुरितानां तत्फलानान्नरकादीनाञ्च आस्कन्दाय निरासाय। अनन्यलभ्यमेतत्प्रयोजनं लब्धुमित्यर्थः। कीदृशन्तत्पदारविन्दमित्याह—सान्द्रानन्दैरतिशयितप्रीतिभारैः पुरन्दरादिभिः दिविषद्वृन्दैर्देवगणैः कर्तृभिः अमन्दादरादतिशयितबहुमानाद्धेतोः आनम्रैः आ समन्तान्नम्रैः नमनशीलैः। नमिकम्पीत्यादिना रः। दिविषद्वृन्दविशेषणमिदम्। मुकुटेषु ये इन्द्रनीलमणयो महार्घमहेन्द्रनीलरत्नानि तैः करणैः सन्दर्शितानीन्दीवराणि नीलाम्बुजानि यस्मिंस्तादृशम्। प्रतिमुहुः प्रणमनसमये उपर्युपरि निविष्टनीलाम्बुजपरम्पराविराजितमिम्। दर्शितमित्यर्थः। इन्द्रनीलमणिकिरणानामिन्दीवरपरम्पराभ्रान्तिकरत्वादेवमुक्तिः। किञ्च मन्दं यथा भवति तथा स्यन्दिभिः स्यन्दनशीलैर्मरन्दैः पुष्परसैः करणैः। अर्थात्तटतरूणामिति बोध्यम्। तैस्तुन्दिलया उच्छूनोदरया गळन्त्या प्रवहन्त्या च मन्दाकिन्या वियद्गङ्गया मेदुरं सान्द्रोपान्तम्। तादृशमिव लक्ष्यमाणमिति यावत्। अत्र गम्योत्प्रेक्षा। पूर्वत्र भ्रान्तिमान्। 'कुसुमे कुसुमोत्पत्तिः श्रूयते न च दृश्यते' इतिवदद्भुतरसो ध्वन्यते। श्रीकृष्णविषयो भावश्च। वृत्त्यनुप्रासश्च स्फुटः ॥ ३॥

इति श्रीगीतगोविन्द इति ॥ अनलसो गोविन्दः अस्मिन्निति अमन्दगोविन्द इति सर्गविशेषसंज्ञा।

इत्यखिलविद्यापरिवारश्रीमद्दक्षिणामूर्तिमहादेवप्रसादलब्धसाङ्ग-
वेदपूर्वोत्तरमीमांसाशब्दतर्कसाहित्यसार्वभौमचरकुरु-
कोण्डुभट्टमहोपाध्यायानुजेन सर्वाम्नायागमशुक्ति-
मुक्तामणिना लक्ष्मीधरसूरिणा विरचितायां
श्रुतिरञ्जिन्याख्यायां गीतगोविन्द-
व्याख्यायाममन्दगोविन्दाख्य-
नवमसर्गभावार्थविमर्शः ॥

दशमः सर्गः

चतुरचतुर्भुजः

॥ गीतम् १९ ॥

अथ सर्गसंज्ञाप्रतिपादितममन्दत्वं गोविन्दस्य प्रदर्शयितुं दशमसर्गप्रतिपाद्यार्थावतारिकाश्लोकमाह—अत्रान्तर इति ॥ अत्रान्तरे अस्मिन्नवसरे हरिः श्रीकृष्णः मसृणो मन्दो यो रोषः कोपः तद्वशात्तस्मान्निमित्तात् । मसृणेत्यनेन स्निग्धे यत्परुषासीत्यादिसखिकर्तृकोपालम्भवचनेन कोपमान्द्यं द्योत्यते । असीमानो ये निश्वासा दीर्घश्वासास्तेषान्निस्सहम् । सहत इति सहः । कर्तर्यच् । निस्सहमसहम् । सहनाशक्तमित्यर्थः । तादृशं मुखं यस्यास्तादृशीं सुमुखीं सुन्दरीं राधां दिनान्ते सायङ्काले उपेत्य प्राप्य । आनन्दः प्रियादर्शनजनितः प्रीतिभारः तेन गद्गदानि प्रतिवर्णं व्यवहितानि पदानि यानि तैस्सहितं यथा भवति तथा इति वक्ष्यमाणम् उवाच उक्तवान् । आनन्दस्य हेतुं राधाविशेषणेनाह—सव्रीळं सलज्जं यथा तथा वीक्षितं दृष्टं सखीवदनं यया तादृशीम् । तत्कृतोपालम्भस्य हृदि लग्नत्वाल्लज्जाविर्भावो राधायास्सखीमुखवीक्षणहेतुर्वेद्यः । तेन च चिह्नेन रोषमासृण्यावगमाच्चतुरस्य हरेरानन्दसद्भाव इति भावः । अत्र भावशान्तिर्निश्वासनिस्सहेत्यादिना ध्वन्यते । निस्सहमुखीं सुमुखीमित्यनेन तद्दर्शनात्कृष्णस्यानुतापार्द्रहृदयता व्यञ्जिता । सा च वक्ष्यमाणसामवचनसामग्रीं सम्पादयतीत्यवसेयम् ॥ ४ ॥

वचनप्रकारं गीतेनाह—वदसीत्यादि ॥ मुखारिरागेण गीयत इति । तदनुसन्धानविधिः प्रागुक्तः । झम्पताळलक्षणञ्च पूर्वमुक्तम् । प्रिये इत्यादि मधुपानमित्यन्तं ध्रुवपदानुध्रुवपदे । ते एव सर्वपादसाधारण्यादादौ व्याक्रियेते । चारुशीले मनोज्ञस्वभावे प्रिये प्रेयसि हे राधे हेतुगर्भञ्चेदं सम्बुद्धिद्वयं तन्नन्यायेन मयीति सप्तम्यन्तेन पदेनापि योज्यम् । तादृशे मयि विषये अनिदानमनिमित्तं मानं प्रणयकोपं मुञ्च त्यज । प्रियायाश्चारुशीलायाश्च तव प्रिये चारुशीले च मयि अनिमित्तस्य मानस्यायुक्तत्वात्परित्याज्य एवैष मान इति भावः । त्यजेत्युक्ते कथं त्यज्यते । कथञ्चानिदानो मानः । त्वदपराधरूपस्य निदानस्य सम्भवादिति चेत्, उच्यतां को ममापराध इति । तदानीं स मया समाधीयत एव ।

नोचेदनिदानोऽयं मान इति त्वया सम्यगेव बुद्ध्वा स मोक्तव्य इति यावत्। मुञ्चेति प्राप्तकाले लोट्। मानमोचनस्य प्राप्तकालतामाह—सपदि सद्य एव मदनानलः कामाग्निः मम मानसं दहति भस्मीकरोति। शुष्केन्धन इव मम मनसि ज्वलन्नयं मदनानलः क्षणान्तरे स्वस्याश्रयाशतां स्फुटीकरिष्यत्येवेति यावत्। अत्रेदमाकूतम्—मम मनसस्त्वन्नित्यवासत्वात् 'इष्टे भुजगविदंष्टे पित्रादीनाञ्च रोगवार्तायाम्। गृहदाहेऽपि च जाते त्वरैव कार्या शिशौ च जलपतिते।' इति वचनानुसारेण परगृहेऽपि दह्यमाने त्वरायाः कर्तव्यत्वेन किं वक्तव्यं स्वगृहदाहे प्रतिक्रियायां त्वरितव्यमितीति। नन्वीदृशेषु कृत्येषु परप्रोत्साहनं विना सर्वै-र्यथानैपुणं प्रतिविधौ प्रयतनीयत्वमस्त्येव। अतस्त्वया प्रतिविधीयताम्। किं मन्निर्बन्धेनेत्यत्राह — देहि मुखकमलमधुपानमिति। तदेवेह प्रतिविधिः। तस्य पुनस्त्वदेकायत्ततया त्वमेवात्र निर्बध्यस इत्यर्थः। कासार-कूपादिरोधे गृहदाहस्याप्रतिविधेयत्वादित्यभिप्रायः। किञ्च हे प्रिये त्वं किञ्चिदपि यत्किञ्चित् परुषं मृदु वा प्रतिकूलमनुकूलं वा वदसि यदि दन्तरुचिकौमुदी दशन-कान्तिचन्द्रिका। त्वदीयेत्यर्थात्। अतिघोरं दरतिमिरं हरतु नाशयतु। 'दरस्त्रासो भीतिर्भीस्साध्वसं भयम्' इत्यमरः। त्वत्प्रियत्वाभिमानिनो धन्यम्म-न्यस्य मे त्वदनिष्टतापत्तिरूपाया भीतेरितिकर्तव्यताविचारावरणादिदिङ्मोहसम्पा-दकत्वादन्धकारताद्रूप्यमस्त्येव। तद्रूपश्चायमन्धकारोऽधुना निर्निमित्तकमान-मेघतिरस्कृतायां त्वद्दन्तरुचिकौमुद्यामन्यान्धकारादतिभयङ्करोऽधुना वर्तत इत्यति-घोरमित्यस्याभिप्रायः। अथवा किञ्चिदपि वदसि यदीत्यनेन यदि वदसि तर्हि किञ्चिदेवेति निसर्गतो मितभाषित्वन्तवेति गम्यते। दन्तरुचिकौमुद्यतिघोरं दरतिमिरं हरतु इत्यनेन तव मितभाषित्वे सत्यपि तद्रूपस्य गुणस्य महाफलत्वं गम्यते। किञ्च तव वदनचन्द्रमास्त्वदीयमुखरूपोऽयं पूर्णचन्द्रः स्फुरदधरशीधवे स्फुरति शोभमाने अधरे अधरोष्ठे यश्शीधुरासवः। 'मैरेयमासवश्शीधुः' इत्य-मरः। तं पातुम्। 'क्रियार्थोपपदस्य कर्मणि स्थानिनः' इति चतुर्थी। लोचनचकोरं रोचयतु। मदीयनयनरूपं चकोरं चन्द्रिकापायिपक्षिविशेषम्। एकवचनं मिथुनाभिप्रायकम्। चकोरमिथुनमित्यर्थः। 'ज्योत्स्नापानमराल-सेन वपुषा मत्ताश्चकोराङ्गना' इति वचनाच्चकोरमिथुनानाञ्चन्द्रिकापाने रुचिः प्रसि-द्धैव। अधरशीधोर्ज्योत्स्नासारत्वं गम्यते। तं पातुं रोचयति खलु चकोरः। तव मुखचन्द्रो रोचयन्तञ्चकोरं प्रयोजयतु। रोचयत्विति णिजन्ताण्णिच्। भक्षयन्ति बलीवर्दास्सस्यम्। भक्षयति बलीवर्दान् सस्यं देवदत्त इतिवत्।

एवं किञ्चिद्वचनस्य फलत्रयन्निष्प्रयासमेव लप्स्यति। ततस्ते महत्पुण्यञ्जायेत। अतो हे प्रिये मयि अनिदानं मानं मुञ्चेति पल्लवेनान्वयः। अत्र रूपककाव्य-लिङ्गसंसृष्टिः ॥ १ ॥

अथानिदानस्यापि मानस्य साफल्ये सत्येव परित्याज्यताम्मन्यसे चेदेवं मानं सफलीकृत्य तं त्यजेत्याह—सत्यमिति ॥ शोभना दन्ता दशना यस्यास्सा सुदती। 'वयसि दन्तस्य दतृ' इति दन्तशब्दस्य दत्रादेशः। 'उगितश्च'इति ङीप्। तस्यास्सम्बुद्धिः। हे सुदति राधे त्वं मया मद्विषये कोपिनी कोपवती असि तत्स-त्यमेव यदि। लीलापूर्वकं विनोदार्थमपि यूनाम्मिथः कोपस्य सम्भवात्तद्वदिद-मित्येव मे मतिः। अथ कुतश्चित्कारणान्मद्विषये सत्यतयैव कोपवती त्वं भवसि चेत्तस्य कोपस्य साफल्यं सम्पादय। कथमित्यत्राह—खरैर्नखरैरेव शरैः करणैः यो घातः हननं तन्देहि प्रयच्छ। नयनशरघातमिति वा पाठः। स एव वा श्रेयान्। कोपविषये जने दूरतो दृष्टे शरैः प्रहारः कर्तव्य इति भावः। तेन च पलायनं प्रति-प्रहरञ्च कर्तुमक्षमे तस्मिञ्जीवग्राहं गृहीत्वा पाशादिभिर्बन्धनं कर्तव्यम्। तदपि मयि त्वया सुकरमित्याह—घटय भुजबन्धनमिति। भुजाभ्यां निजदोर्लताभ्यां करणभूता-भ्यां यद्बन्धनन्तद्घटय योजय। 'कर्तृकरणे कृता बहुलम्' इति समासः। बद्धस्यापरा-धिनः कायदण्डोऽपि कोपिभिः कैश्चित्क्रियते। तद्वत्त्वयापि मयि क्रियतां कोपसाफ-ल्यायेत्याह—रदखण्डनं रदैर्दन्तैः खण्डनं देहावयवकृन्तनं जनय रचय। अत्रापि रोद्धा कोऽपि नास्त्येवेति भावः। न केवलमेतावदेव। येन कृतेन कायदण्डेन सुखजातमानन्दसन्दोहो भवति हननबन्धनखण्डनव्यतिरिक्तं तद्वा जनयेत्यनुषङ्गः। अपराधिनि स्वायत्तशरीरदण्डे च मयि तवेदं कलहजनितं मानं वैमुख्यञ्च द्वयोर-प्यावयोर्दुःखावहमेवेति यावत्। अत्र नयनशरेति रूपकम्। भुजबन्धन-मित्यत्रापि बन्धनकरणत्वेन भुजयोर्लतात्वारोपस्यार्थत्वादेकदेशविवर्ति रूपकम्। प्रिये मानं मुञ्चेति पूर्ववत्पल्लवेनान्वयः ॥ २ ॥

ननु दण्डानुमत्या अपराधाभ्युपगमो जात एव, तर्ह्यपराधिनानुमतो दण्डः किं दण्डधारैरारभ्यते, उत स्वाभिमत इत्याशङ्क्य दण्डानुमतिरन्यनिमित्तैव, न तु तावदपराधाभ्युपगमनिमित्तेति बोधयति - त्वमिति ॥ हे प्रिये त्वं मम भूषणमसि सर्वाङ्गालङ्कारोऽसि। किञ्च मम जीवनमसि। जीवनमिति जीवनफलमुक्तम्। प्राणधारणफलभूता मम त्वमेवासि। अपि-

च त्वं मे भवजलधिरत्नमसि जन्मजलधिकौस्तुभायितासि। किञ्च भवतीहास्मिन् लोके मयि मद्विषये सततमनुरोधिनी अनवरतमनुवर्तमानशीला भवतु। प्रार्थने लोट्। तत्र तादृशप्रार्थनारूपेऽर्थे मम हृदयं मदीयं मनः अधियत्नमधिगतमयासम्। वर्तत इति शेषः। मम मनस्सर्वदा एतमेवार्थं प्रार्थयत इति वास्तवमेव मया कथ्यते। एवं स्थिते मनःपूर्विका का ममापराधकथेति भावः। उक्तदण्डानुमतिस्तु वस्तुतः 'सेव्यो जनश्च कुपितः कथञ्च दासो निरपराधः' इति न्यायेन त्वदिच्छयापराधाभ्युपगमनिमित्तैव, स्वाभिलाषाविरुद्धा चेति तात्पर्यम्। त्वयि कुपितायाम्ममाङ्गं निर्भूषणं भवति मृतकल्पश्चाहं भवामि। अपारस्संसारश्च स्फारदुःखदः क्षतक्षारधारायते। ततश्च त्वत्कृतमनुवर्तनमेकमेव मे यावज्जीवमैहिकसुखसारः। तदवाप्तये केवलमहं मनसा वाचा कर्मणा च प्रयते। मां स्मान्यथा मन्यथा इति पिण्डितार्थः। अतः प्रिये मानं मुञ्चेति सर्वत्रान्वयो वेदितव्यः ॥ ३ ॥

एवमुक्तं वास्तवमवबुध्य प्रशान्तरोषविकृतिमपि राधामप्रसन्नयनां दृष्ट्वाह—नीलेति॥ हे तन्वि कृशाङ्गि राधे तव लोचनन्नयनम्। नेत्रद्वयमित्यर्थः। नीलनळिनाभं नोल्लोत्पलसमानशोभमपि सम्प्रति कोकनदरूपं रक्तोत्पलस्य वर्णं धारयति अनिमित्तेन कोपेन कषायितत्वादरुणिमाक्रान्तं भवति। तदनुपपन्नमेव वर्तते। अत्र चोपपन्नतां सम्पादयितुं प्रकारान्तरमुपदिशामि। तथा चरेत्याह—कृष्णं नीलवर्णमिदं लोचनं कुसुमशरबाणभावेन कामबाणत्वेन रञ्जयसि रक्तवर्णं करोषि यदि एतदनुरूपं योग्यमेव। बाणानां रक्तवर्णत्वसम्पादनं प्रहृतशत्रुदेहरुधिरमग्नत्वादाग्नेयमन्त्राद्यभिमन्त्रितानामग्निकणाकीर्णत्वाद्वा युज्यते इति ध्येयम्। अथवा कृष्णं मां रञ्जयसि यदि रञ्जयिष्यसि चेत् तदर्थमेव कुसुमशरबाणत्वेन इदं लोचनं रञ्जयसि चेदेतदनुरूपं योग्यमेव। कृष्णत्वं तव लोचनस्य मम च समानमेव। एवं स्थिते मद्रञ्जनार्थं करणभूतकामशरत्वेन त्वं त्वल्लोचनं रञ्जयसि चेत्तद्योग्यमेवेत्यर्थः। एवञ्चेन्मयि रक्ते सति लोचनस्य रक्तिमा त्याज्य इति यावत्। लोचनरागकालुष्यहेतुभूतो रोष एष निरवशेषं परित्याज्य इति फलितोऽर्थः ॥ ४ ॥

एवं श्रुत्वा प्रसन्नप्रायनयनां प्रियतमां विरहवेषपरित्यागमर्थयते—स्फुरत्विति॥ हे प्रिये तव कुचकुम्भयोरुपरि मणिमञ्जरी मणीनां निष्क-

खचितानां माणिक्यादीनां मञ्जरीव मञ्जरी दीप्तिपुञ्जः स्फुरतु शोभताम्। हृदये कोपकालुष्यमुन्मार्ज्य विरहवेदनाजनितमङ्गकार्श्यमप्यपास्य स्वस्थमानसा सती मलिनवेषतां परिहर्तुं भूषणानि धारयेत्यर्थः। विरहजनितं सर्वाङ्गीणमपि कार्श्यं सद्य एव न परिहार्यम्। तथापि वेषभूषणादिवशात्परिहृतप्रायमेव भवति। तत्र प्रथमं पृथुलयोः कुचकुम्भयोरपि प्रवृत्तं कार्श्यमपह्नोतुं निष्क-धारणं कर्तव्यमित्युक्तमित्याह—तव हृदयदेशं भूषयतु वक्षोभागमलङ्करोतु। सा मणिमञ्जरी स्फुरन्ती सती विपुलहृदयायास्तव हृदयस्य स्वास्थ्यावस्थान-समुचितं देशं विस्तीर्णमुरःस्थलमलङ्कृत्य वर्ततामिति भावः। एवं निर्बध्य-मानायास्तस्या मनागनुमतिं विज्ञाय सखीभिरामुक्ते निष्के, केयूरहारकटक-वलयोर्मिकादिषु चाह——तव घने पृथुनि जघनमण्डले श्रोणिबिम्बरूपे महति राज्ये रशना काञ्च्यपि रसतु ध्वनतु। यथा निरन्तरन्निरन्तरायञ्च शब्दायते तथालंक्रियतामित्यर्थः। उक्तस्यार्थस्यावश्यकत्वमाह—मन्मथनिदेशं मन्मथमहाराजस्य त्वज्जघनमण्डलमधिवसतो निदेशमाज्ञां घोषयतु सर्वजनश्रवण-गोचरीकर्तुमुच्चैस्तरामाचष्टामित्यर्थः। मन्मथनिदेशमिति मन्मथस्य महाराजत्वा-रोपस्यार्थत्वादेकदेशविवर्तिरूपकम्। तच्चास्ति हि राजेति दूरस्था अपि जना न मर्यादामतिवर्तन्ते इति वात्स्यायनोक्तनयेन कुपितया त्वया दूरीकृतोऽप्यहं त्वज्जघनमण्डलवासिनः कामाद्भिया त्वत्प्रसादैककाङ्क्षी वर्त इति स्ववृत्तान्तरूपं वस्तु व्यज्यत इत्यलङ्कारेण वस्तुध्वनिः। ईदृशश्च व्यङ्ग्यार्थः पश्चात्प्रियोऽहमुप-स्थित इति वक्ष्यते ॥ ५ ॥

अथेदृशैर्वचनैः प्रीतिभाजि प्रियायां सखीभिरलंक्रियमाणसर्वाङ्गां पाद-योरलङ्कर्तुं सज्जीकृतलाक्षारसां साक्षादालोक्य स्वाभिलषितमाह—स्थलेति॥ हे मसृणवाणि मन्दवचने प्रिये राधे त्वं भण आज्ञापय। अहन्तव चरणद्वयं पादयुगं सरसं यथा भवति तथा लसता अलक्तकेन लाक्षारसेन सरागं राग-सहितं करवाणि। प्रार्थनायां लोट्। आसतामतिचतुरा अपीमास्सख्यः। अहमेवाधुना तव पादयुगमलक्तकालंकृतं कर्तुं चतुरः। तन्मान्तदर्थमाज्ञाप-यितुमर्हसीत्यर्थः। ननु 'स्त्रीणां प्रियालोकफलो हि वेषः' इति प्रसिद्ध्या प्रियतमेन त्वया दृष्टा स्थातव्यम्। इमा एव मामलंकुर्वन्तु। को दोष इत्याशङ्कायां विशेषणैर्विशेषमाह—स्थलकमलभञ्जनं मम हृदयरञ्जनं जनितरति-रङ्गपरभागमिति। स्थलकमलस्य स्थलपद्मस्य भञ्जनं कान्तिहरं मम त्वदेक-

वल्लभस्य हृदयरञ्जनं मनसि रागभारजनकम्। आभ्यां विशेषणाभ्यां विशेष्यस्य चरणद्वयस्य स्वाभाविकी शोभाभोगसामग्री तत्फलञ्च क्रमेण व्यज्यते। किञ्च यो यस्य गुणज्ञस्तेनैव तल्लाळनपूर्वमलङ्कर्तव्यम्, यस्य यद्रागजनकं तेनैव तदादरणीयमिति च ध्वन्यते। जनितो रतिरङ्गे मदनसङ्ग्रामभूमौ परभागो गुणसङ्क्रान्तिर्येन तत्तथोक्तम्। मयैव योजितं ममैवाङ्गेषु परभागेन प्रतिफलिष्यतीति च प्रीत्यतिशयोऽनेन ध्वन्यते। स्वस्य रतिरणरङ्गे प्रतियोगित्वेन रसिकत्वेन च वर्तिष्यमाणत्वात् कुशलानामपि सखीनां रतिरङ्गे सन्निधानाभावाच्चेति वेदितव्यम् ॥ ६ ॥

एवमुक्त्वा स्वयमेव तथा कर्तुं प्रवृत्तः पादयुगं स्वकराभ्यां गृहीत्वा लाक्षारसयोजनात्पूर्वमेव कर्तव्यान्तरमर्थयते—स्मरेति। हे प्रिये राधे त्वमुदारं पदपल्लवं मम शिरसि मण्डनं देहि समर्पय। दानफलमाह—स्मरजनितस्तापः स्मरः। कार्ये कारणव्यपदेशः। स एव गरळं विषम्। प्राणहरणपर्यन्तबहुविकृतिकरत्वात्। तस्य खण्डनं प्रशमनम्। अत एवोदारमप्रमेयमाहात्म्यम्। अत्रेदमाकूतम्—इयन्तं समयं निष्कारणरुषितया त्वया याहि माधवेत्यादिपरुषवचनैरुत्सारितो दूरस्थितोऽहन्त्वत्प्रेमापायभयेन विषमूर्छित इवासम्। इदानीं पुनर्भवितव्यवशादुदितया त्वत्प्रसत्तिलाभप्रत्याशया कथञ्चिदागत्य वास्तवन्निवेद्य समुपासीनोऽपि न त्वया सम्यक्प्रसन्नया पूर्ववदनुगृह्ये। तदनेन त्वत्पदपल्लवेन मदुत्तमाङ्गमण्डनत्वन्नीतेन पूर्वानुभूतविरहसन्तापप्रतिक्रियामिच्छामि। यदि मयि मनागपि ते दया तर्ह्येवं कर्तुमर्हसीति। यदि तु नैवमाचरसि तर्ह्यन्यदेव किमपि स्यादित्याह—मयि मद्विषये दारुणो भयङ्करो मदनकदनानलः कामबाधाबाडवाग्निः ज्वलति दीप्यते। पूर्वानुभूतदुस्सहवेदनानुस्मरणेऽपि महद्भयं जायत इति दारुणशब्देन द्योत्यते। प्रकृतस्य शिरसि पदपल्लवसमर्पणस्य प्रशस्तफलत्वबोधनेनानुमतिमर्थयते—उपाहितविकारं तद्धरतु उपाहिता मुहुर्मुहुस्सानुबन्धतया सम्पादिता विकाराश्चिन्तावेपथुसन्तापविषादसादनिश्वासालस्यमूर्छादयो येन तत्तथा। तदिति नपुंसकस्संस्कारो मदनकदनानलज्वलनमाह। तद्धरत्वित्यधीष्टे लोट्। सत्कारपूर्वं वचनं ह्यधीष्टः। महानुभावया त्वयास्मिन्नर्थेऽनुकूलया वर्तितव्यमिति भावः ॥ ७ ॥

इतीति ॥ इति एवम्प्रकारेण मुरवैरिणः श्रीकृष्णस्य चटुलं चञ्चलं यच्चाटु प्रियवचनं तेन पटु विदग्धम्। प्रियवचनस्य प्रायशो मिथ्यात्वप्रसिद्ध्या,

चटुलशब्दप्रयोगः। तत्राप्यमिथ्यात्वबुद्ध्यावहत्वात्पटुशब्दप्रयोगः। चटुलचाटु पटु च तच्चारु च तादृशं राधिकामधिकृत्य राधामुद्दिश्य वचनजातमनुनयवचनप्रपञ्चनं पद्मावतीरमणेन जयदेवकविना कर्त्रा भारत्या पूर्वजन्मवासनानुगया पुनराराद्धगुरुप्रसादलम्भितप्रागल्भ्यया च स्ववाचा करणभूतया भणितं वर्णितम्। इति गीतं माधुर्यादिगुणसम्पत्त्या मधुरिपुभक्त्या च जगत्प्रसिद्धं सत् गीतं गीतरूपतामापितं जयति सर्वस्मात्पुण्यकर्मणोऽप्युत्कर्षेण वर्तते। श्रीकृष्णस्य वचनजातत्वाद्गीतात्मकत्वाच्च उपनिषत्साम्यं गम्यते। ततश्च श्रवणमननादिभिर्निरपायनिर्वृतिहेतुत्वमवगन्तव्यम् ॥ ८ ॥

एवं गीतेन प्रियालापप्रपञ्चमयेन प्रियतमां राधां प्रसाद्य पूर्वोक्तं मानस्यानिदानत्वं प्रकारान्तरेणावबोध्य प्रसादं सम्पाद्याभिमतमर्थयते श्लोकेन— परिहरेति ॥ हे कान्ते सुन्दरि राधे कृतास्त्वया निष्पादिता आतङ्का विरहसन्तापादयः पीडा यस्य तादृशे। किञ्च घनं निबिडम्। पृथुलमिति यावत्। स्तनौ जघनञ्च स्तनजघनम्। प्राण्यङ्गत्वादेकवद्भावः। घनं स्तनजघनं यस्यास्सा तथा। तादृश्या त्वया सततं दिवानिशं क्रान्ते अधिष्ठिते। अत एव परस्यान्यस्य कस्यापि जनस्यानवकाशिनि प्रवेष्टुमविद्यमानावकाशे च मम स्वान्ते[1] मम मनसि वितनोरनङ्गादन्यो जनः कोऽपि न विशति न प्रविशति। शङ्कां संशयं परिहर ममान्तरं मन्मानसं त्यज। अन्यस्त्रीसक्तिः कथन्तादृशस्य ममेति भावः। तादृशं सन्देहं परित्यज्य प्रीतिपूर्वकं स्तनभरपरीरम्भारम्भे विधेयतां विधेहि आनुकूल्यं कुरु। अत्र काव्यलिङ्गानुप्रासौ। हरिणीवृत्तम् ॥ २ ॥

अनेनैव वृत्तेन पुनरभिमतमर्थान्तरमर्थयते—व्यथयतीति। तन्वि सुन्दरि हे राधे वृथा निष्कारणं मौनं तूष्णीम्भावो व्यथयति व्यथां करोति। स्निग्धजनानां सहवासे मिथो मौनं वा एकस्य वचनशते सत्यप्यन्यस्य जोषम्भावो वा निष्कारणञ्चेदत्यन्तनीरसत्वाद्रसिकजनव्यथावहमित्यर्थः। अतः पञ्चमं कोकिलनादसदृशं स्वरं प्रपञ्चय विस्तारय। ननु पञ्चमस्वरः कोकिलानामेव मुखेभ्यः श्रोतव्यः। तमहं कथं प्रपञ्चयामीति चेत्तत्राह—मधुरालापैरिति। त्वन्मुखोत्पत्तिस्थानपरीक्षणादिप्रयासं विना त्वया स्वच्छन्दं यत्किञ्चिदुच्यताम्।

---

1) सति सप्तमी। मम स्वान्ते विषये शङ्कां परिहरेत्यन्वयः स्वारसिको भाति ॥

दितास्सर्वेऽप्यालापा मधुरा एव स्वतो जायन्ते। नात्र प्रयासः पृथगस्ति, ते माधुर्यसम्पादनायेति भावः। किञ्च दृष्टिभिरपाङ्गविशेषैः तापं मदीयम्मनस्तापं त्वयैव सम्पादितं विनोदय व्यपनय। हे तरुणि हे सुमुखि तावत् प्रथमं विमुखीभावं वैमुख्यं विमुञ्च त्यज। मात्र मुञ्च। इतः परमपि यदि पूर्ववद्वैमुख्यमालम्बसे तर्हि त्वयाहं त्यक्त एव। तथा मा कुरु। विमुखीभावं तावत् साकल्येन विमुञ्चेति वार्थः। 'यावत्तावच्च साकल्ये' इत्यमरः। वैमुख्यस्य साकल्येन विमोचनमेव ममामोचनमिति भावः। स्वस्यामोच्यत्वे हेतुमाह—अतिशयस्निग्धः स्वयमुपस्थितः प्रिय इति। हे मुग्धे कृत्याकृत्यविचारमूढे तन्वि तरुणि सुमुखि इति सम्बुद्धित्रयेण विरहकार्श्यम्, सम्भोगसमुचितसमयवृथाक्षेपः, उपालम्भसहिष्णुत्वञ्च क्रमाद्व्यज्यन्ते। अन्तिमया मुग्धेति सम्बुद्ध्या तु अतिशयस्निग्धस्य प्रियस्य स्वयमुपस्थितस्य च ममापरित्याज्यतानिश्चये मौढ्यञ्च व्यञ्जितमिति मन्तव्यम् ॥ ३ ॥

अथ वन्ध्यरोषतादोषं वारयोपितां लाघवप्रदश्चेन्मन्यसे तर्हि रोषसाफल्यमेवं सम्पादय, ममापि तत्प्रियमित्याह—श्लोकान्तरेण मुग्धेति ॥ हे चण्डि कोपने राधे मुग्धे विचारशून्ये। मया अपराद्धे यथापराधं दण्डं विचार्य निश्चित्य कर्तुं तव विचारशक्तिर्नास्ति। तन्मदुपदिष्टप्रकारेण दण्डं कुरु। कथमिति चेदुच्यते। निर्दयो यो दन्तैर्दंशः यश्च दोर्वल्लीभ्यां भुजलताभ्यां बन्धः यच्च निबिडाभ्यां पृथुभ्यां कुचाभ्यां पीडनमेतत्त्रयं मयि विधेहि अङ्गच्छेदनबन्धनमर्दनरूपाणां कायदण्डानां महत्यपराधे विहितत्वात्त्रयमपि महापराधिनि मयि प्रयुङ्क्ष्वेत्यर्थः। न चात्र करणान्वेषणात्कालहरणं भवति। दन्तानां दोर्वल्योर्निबिडस्तनयोश्च करणत्वेन सत्त्वादिति भावः। एवं कृत्वा त्वं मुदं प्रीतिमञ्च प्राप्नुहि। अहं त्वपराधी तत्कृतं दुःखं सोढाह इति शेषः। एवं कृते मम कश्चन लाभोऽप्यस्तीत्याह—पञ्चबाणः काम एव चण्डालः पुक्कसः। महत्स्वप्यपकारकारित्वादधर्मप्रवर्तकत्वाच्च कामस्य चण्डालत्वारोप इति ध्येयम्। तस्य ये कांडाः शरास्तैर्दलनादङ्गदारणाद्धेतोः असवः प्राणाः। ममेति शेषः। न प्रयान्तु न गच्छन्तु। नीचप्रयुक्तशरक्षतद्वारा प्राणनिर्याणाद्वरं त्वत्कृतदण्डनमिति भावः। आद्यतो मरणस्य निश्चयात्, अन्त्यतस्तु संशयादित्यवसेयम्। अत्र रूपकातिशयोक्तिसमासोक्तीनां संसृष्टिः ॥ ४ ॥

ननु भगवतः कुसुमबाणस्य नीचत्वारोपः नीचाया मम महत्त्वकल्पनञ्चायुक्तमित्याशङ्कायामाह—बन्धूकेति ॥ चण्डि कोपनशीले कुन्दः कुन्दकुसुम-

कुड्मळास्तेषामाभेवाभा शोभा येषान्तादृशा दन्ता दशना यस्यास्सा तथा। तस्याः सम्बुद्धिः हे कुन्दाभदन्ति। नासिकाधरोष्ठेत्यादिना ङीप्। अम्बार्थेत्यादिना ह्रस्वः। तादृशि हे प्रिये राधे स प्रसिद्धः पुष्पायुधः कामः त्वन्मुखसेवया सर्वदा त्वन्मुखमेव सेवित्वा पुष्पायुधत्वमवाप्य विश्वं त्रैलोक्यम्। तद्वासिनो जना नित्यर्थः। विजयते स्ववशे करोति। प्राय इत्युत्प्रेक्षाद्योतकम्। 'मन्ये शङ्के ध्रुवं प्रायो नूनमित्येवमादिभिः। उत्प्रेक्षा व्यज्यते शब्दैरिवशब्दोऽपि तादृशः॥' इति वचनात्। मुखसेवया पुष्पायुधत्वप्राप्तिहेतून्मुखवर्णनेनाह—अयं त्वन्मुखे दृश्यमानोऽधरो बन्धूकद्युतिः बन्धुजीवकुसुमशोभाया बान्धवो बन्धुः। तत्तुल्य इत्यर्थः। मधूकच्छवि-र्मधूकपुष्पशोभा। सा स्निग्धा हृद्यङ्गमा सती गण्डे तव कपोले चकास्ति। लोचनं तव नयनं नीलनलिनस्य नीलारविन्दस्य श्रियश्शोभाया मोचनं त्याजकं चकास्ति शोभते। नासा नासिका तिलप्रसूनानां मार्गमन्वेति अनुगच्छति तिलपुष्पसमाना भाति। दन्ताः कुन्दकुसुमाभा इति सम्बुद्ध्या प्रतिपादितम्। बन्धूकमधूकनीलाब्जतिलप्रसूनकुन्दकुड्मळसमानाधरगण्डलोचननासिकादन्तान्विते मुखे सेव्यमाने सेवाकुशलस्य कामस्य बन्धूकादीनामधरादिसौहृदपरिचितानामायुधत्व-सिद्धिरिति भावः। पञ्चसङ्ख्यत्वादेषां पञ्चबाणत्वप्रसिद्धिश्च तस्य साधितेति बोध्यम्। एवं त्वन्मुखसेवया तस्य पुष्पायुधत्वं पञ्चशरत्वं विश्वविजयित्व-मप्यासीत्। अतस्त्वन्महिमा स्तोतुमशक्यः। स तु महत्सेवया प्राप्तबहु-सम्पदपि सेवावृत्तिनिरतत्वान्निकृष्टतया चण्डालत्वारोपयोग्य एव। 'सेवां लाघवकारिणीं कृतधियः स्थाने श्ववृत्तिं विदुः' इति, 'ऋतामृताभ्यां वर्तेत मृतेन प्रमृतेन वा। सत्यानृतेनाप्यथवा न श्ववृत्त्या कदाचन' इति च वचनान्निकृष्टता साध्या। निकृष्टानां सेवकानां महानपि प्रकर्षो दृश्यमानः सेव्यमाहात्म्यमेव सूचयति। न स्वमहिमानमिति भावः। 'सा श्रीराश्रितमन्दिरेषु सततन्दृश्येत या क्ष्माभृताम्' इति प्रसिद्धेः। अत्र मदननिन्दया राधायाः स्तुतेर्व्यज्यमानतया व्याजस्तुतिरलङ्कारः। सा चोत्प्रेक्षयोत्थापिता सेव्यसेवक-व्यवहारारोपात्समासोक्त्यनुप्राणितेति विवेकः ॥ ५ ॥

अथ तत्स्तुत्यैव तामुपालभते—दृशाविति॥ हे तन्वि राधे पृथ्वीगता भूतले वर्तमाना त्वं विबुधयौवनं विबुधानान्देवानां सम्बन्धि यौवनं तारुण्यं वहसि। सुराणामक्षयं यौवनमिति प्रसिद्धिः, तेषान्निर्जरत्वात्। भुवि स्थिता त्वं स्वर्ग-

स्त्रीसमूहं वहसि धारयसीति वाच्यार्थः। यतस्तव दृशौ नेत्रे मदेन यौवनदर्पेणालसे अस्वतन्त्रे। वदनं मुखमिन्दुरिति मत्या बुद्धयान्वितं सहितम्। द्रष्टॄणाञ्चन्द्रबुद्धिकरमित्यर्थः। तव गमनभङ्गी मनोरमा। तवोरुद्वयं विजितरम्भं कदलीकाण्डविजयि। तव रतिः क्रीडा कलावती कलाविद्यासहिता। कलाविद्यानां क्रीडार्थत्वात् कृत्यदाक्ष्यहेतुत्वाच्च तास्वन्यतमां विना तव क्रीडा निरर्थका नास्तीत्यर्थः। रुचिरा मनोज्ञा चित्रा वैचित्र्यशालिनी च लेखा आकृतिर्ययोस्ते तादृश्यौ तव भ्रुवौ चित्यौ। मदालसा इन्दुमती मनोरमा रम्भा कलावती चित्रलेखा चेति सुरयुवतीनां षण्णान्नामानि। तासां समूहं त्वं वहसि। अहो आश्चर्यमिदमित्यर्थः। युवतीनां समूहो यौवनम्। यौवनमिति भस्याढे तद्धिते पुंवद्भावस्येष्टत्वादिह रूपं यौवनमिति सिद्धं बोध्यम्। युवतेर्भावोऽपि यौवनम्। 'तारुण्यं यौवनम्' इत्यमरः। अत्र राधारूपगुणवर्णनरूपया स्तुत्या 'त्यजत मानमलं वत विग्रहैर्न पुनरेति गतश्चतुरं वयः' इति कालिदासोक्तनयेन, 'चञ्चलं धनमपायि शरीरं यौवनं त्रिचतुराणि दिनानि' इत्यादिप्रसिद्धया च 'भूयो भूयोऽपि शशी क्षीणः क्षीणोऽपि वर्धते सत्यम्। विरम प्रसीद सुन्दरि यौवनमनिवर्ति यातन्तु॥' इतीदृशोऽर्थः काका व्यज्यत इति तन्निन्दाया एव व्यक्तेर्व्याजस्तुतिः। सा श्लेषोत्थापितेति सङ्करः। पृथ्वीगतेत्यनेन वृत्तनामापि कथितमिति कविचातुर्यञ्च गम्यम्। 'जसौ जसयला वसुग्रहयतिश्च पृथ्वी गुरुः' इति पृथ्वीलक्षणम् ॥ ६ ॥

ननु किमर्थमेवं बहुधा त्वयायमुपालम्भगर्भो मत्प्रशंसाप्रपञ्चः क्रियत इति तदाशङ्कामपनेतुं स्वाभिप्रायं व्यञ्जयन्नाह—शशिमुखीति ॥ हे शशिमुखि चन्द्रानने राधे भङ्गुरा भङ्गशीला तव भ्रूवल्ली युवजनानां तरुणपुरुषाणां मोहे मोहने कराळा क्रूरा काळसर्पी कृष्णभुजङ्गी भाति प्रतिभाति। तस्याः सकाशादुदितस्य जातस्य विषस्य भेषजमौषधम्। तुर्विशेषे। अन्यविषोक्तं भेषजमिहाकिञ्चित्करमिति द्योत्यते। इहास्मिन् लोके एका केवला त्वदधरशीधुस्त्वदधरमधु तदेव सुधा भाग्यभोग्यत्वात्सैव भेषजम्। नान्यदस्ति। ततो निर्भाग्या युवानो हता एवेति भावः। अहन्तदर्थी त्वां मानिनीं प्रसादयितुं स्तौमीत्यभिप्रायः। अत्रोत्प्रेक्षारूपकयोस्संसृष्टिः। पुष्पिताग्रावृत्तम् ॥ ७ ॥

अथ कविस्सर्गसमापनायाशिषमाह—प्रीतिमिति। राधायाः पीनौ यौ पयोधरौ स्तनौ तयोः स्मरणमनुस्मृतिं कुरुत इति तत्कृतौ तादृशौ कुम्भौ

शिरःपिण्डौ यस्य तादृशेन कुवलयापीडेन यथार्थसंज्ञेन कंसगजेन सार्धं रणे युद्धे सम्भेदवान् सङ्गमवान्। 'सम्भेदस्सिन्धुसङ्गमः' इत्यमरवचनाद्यद्यपि शब्दोऽयं सिन्धुसङ्गमवाची, तथाप्यत्र लक्षणया सङ्गममात्रपरः। तादृशो हरिः श्रीकृष्णः वः मत्कृतिश्रोतृणां तद्गातृणाञ्च प्रीतिमैहिकमामुष्मिकञ्चानन्दं तनुतां कुरुताम्। यत्र यस्मिन् हरौ राधापीनपयोधरस्मरणवशात् क्षणं स्वल्पकालं स्विद्यति सात्विकं स्वेदं भजति मीलति नयनमीलनरूपन्दुस्सहविरहाधि-मूर्छानुभवञ्च भजति सति पश्चात् क्षणात् तं क्षणं धैर्येणातीत्य क्षिप्तद्विपे निहत-पातितकुवलयापीडेऽपि सति अथानन्तरमपि कंसस्य बले सैन्ये जितं जित-मस्माभिरिति व्यामोहेन कोलाहलोऽभूत्। अत्र स्मरणालङ्कारः विप्रलम्भशृङ्गार-ध्वनिश्च। कंससैन्यविषयो हास्यध्वनिश्च ॥ ८ ॥

इत्यखिलविद्यापरिवारश्रीदक्षिणामूर्तिमहादेवप्रसादलब्धसाङ्गवेद-
पूर्वोत्तरमीमांसाशब्दतर्कसाहित्यसार्वभौमचरकुरुकोण्डुभट्टमहो-
पाध्यायानुजेन सर्वाम्बिकागर्भशुक्तिमुक्तामणिना लक्ष्मी-
धरसूरिणा विरचितायां श्रीमद्गीतगोविन्दव्याख्यायां
श्रुतिरञ्जिन्याख्यायां चतुरचतुर्भुजसंज्ञ-
द्वादशसर्गभावार्थविवेकस्सम्पूर्णः ॥

एकादशः सर्गः

सानन्ददामोदरः ।

गीतम् — २०

अथ नायकयोश्चरितशेषमाह—सुचिरमिति ॥ इति सुचिरं चिरकालमनुनयेन सामवचनप्रपञ्चेन मृगाक्षीं राधां प्रीणयित्वा सन्तोष्य । गलितरोषमानसां विधाय स्वाभिसरणसमुत्सुकां कृत्वा चेत्यर्थः । कृतवेषे अवलम्बितकामुकोचितालङ्कारे केशवे श्रीकृष्णे केळिशय्यां निकुञ्जगृहान्तरगतं कुसुमशयनं गतवति प्राप्ते सति प्रदोषे रजनीमुखे दृष्टिमोषे नयनशक्तिहरणनिमित्ते स्फुरति आविर्भवति च सति रचितस्सम्पादितो रुचिरो मनोहरो वेषो मण्डनं यस्यास्तादृशीं राधां कापि । सखीति शेषः । जगाद गदितवती । कीदृशीम्—निरवसादां निर्गतो गळितोऽवसादो दुःखं यस्यास्तादृशीम् । पूर्वं रोषकालुष्यवशात्किमपि कर्तुं श्रोतुमप्यशक्तत्वात्सर्वं वचनं निष्फलं जातम् । साम्प्रतं गळितकलुषभावां प्रति वचनं फलिष्यतीति मत्वा जगादेति भावः । सखीनां बह्वीनाम्मध्ये अतिस्निग्धत्वात्कापीति पूर्वोपचारचतुरा सख्येव कथिता । नापरा । अथवा, सखीमवलम्ब्य सलीलं चलेति वक्ष्यमाणत्वादन्यैव वक्त्रीति वा ध्येयम् । दृष्टिमोष इति कारणे कार्यव्यपदेशः । कृतवेषे केशवे, रचितरुचिरवेषां निरवसादां राधामिति वचनेन सम्भोगपूर्वरङ्गभूतं परस्परालङ्करणं तत्कृतमन्योन्यरत्युद्दीपनञ्च जातमेव । इतः परमालिङ्गनचुम्बनादिषु कालविलम्बनं रसभङ्गावहमिति मन्वाना स्निग्धसखी लज्जामात्रान्तरायमपनेतुं वचनैः प्रियसखीं प्रियतमाभिसरणाय प्रोत्साहितवतीति वेदितव्यम् ॥ १ ॥

तद्वचनप्रकारं गीतेनाह—विरचितेति ॥ भैरवीरागेण गीयत इति । 'स्वैरवासितकचा विकचैर्या कैरवैर्निशि दिवा कमलैस्सा । कैरवेदि न जनैः कलिइन्ती भैरवी जगति रागमतल्ली ॥' इति तदनुस्मरणविधिः । एकताळलक्षणं प्रागुक्तमेव । मुग्धे मधुमथनमिति पल्लवः । अनुगतमनुभज राधे इत्यनुपल्लवः । उभावपि स्पष्टार्थौ । मधुमथनविशेषणानि त्रीणि प्रथमपादेनाह—विरचिता निर्मिता चाटुवचनरचना प्रशंसाप्रपञ्चो येन । रच्यत इति रचना । गुम्फनविशेषः । चाटुवचनानां रचना चाटुवचनरचना । रचयतेर्ण्या-

सश्रन्थोयुजिति युच्। तस्या विरचितत्वकथनान्न पौनरुक्त्यदोषशङ्का। विशेषेणातिशयेन रचिता विरचितेति रचनायाः कस्यचिदतिशयस्य विवक्षितत्वात्। यदाहाचार्यदण्डी—'अनुकम्पाद्यतिशयो यत्र कश्चिद्विवक्ष्यते। न दोषः पुनरुक्तेऽपि प्रत्युतेऽयमलङ्कृतिः॥' इति। अथवा विरचितेत्यस्य कृतेत्यर्थः। स चातिशयो वदसि यदीत्यादिगीते, परिहर कृतातङ्के शङ्कामित्यादिश्लोकेषु चास्त्येव। एवं चाटुवचनं रचयितुं को वा लोके शक्नुयादिति भावः। किञ्च चरणे तव पादपङ्कजे रचितः संशयं विना कृतः पणिपातः नमस्कारो येन तम्। अपि च सम्प्रतीदानीं मञ्जुळायामतिमनोज्ञायां वञ्चुळसीमनि वञ्चुळलतागृहोदरप्रदेशे यत्केळिशयनं कुसुमपल्लवकल्पितं निधुवनोचितं शयनीयं तदुपयातं प्राप्तम्। तत्रापिश्च रतित्वराहेतुकमिति किं वक्तव्यमिति भावः। एवं वचनकौशलं चरणपतनं विरहासहत्वेऽपि पृथगवस्थितिश्च विचार्य अनुगतमनन्यशरणत्वेनाश्रितञ्च बुध्वा मुग्धे विचाराचतुरे हे राधे त्वं मधुमथनं श्रीकृष्णं क्षणमात्रमप्यविळम्ब्य अनुभज। अनुचरेति वा पाठः। उभयथापि शुश्रूषस्वेति भावः। तदर्थं द्रुतं प्रतिष्ठस्वेति यावत् ॥ १ ॥

तदेव मुखत आह—घनेति॥ हे मुग्धे सुन्दरि राधे। सौन्दर्यमेव सम्बुद्ध्यन्तरेणाह—जघनं स्तनौ च जघनस्तनम्। घनं जघनस्तनमेव भारभरो भरातिशयो यस्यास्तस्याः सम्बुद्धिः हे घनजघनस्तनभारभरे। त्वं दरमन्थरा ईषन्मन्दाः चरणविहाराः पादन्यासा यथा स्युस्तथा। किञ्च मुखरितौ मणिमञ्जीरौ रत्ननूपुरौ यथा स्यातान्तथा च उपैहि प्राप्नुहि। प्रियसमीपमिति शेषः। तदर्थमधुनैव मराळानां राजहंसानां विहारं लीलां विधेहि कुरु। गमनभङ्गीमङ्गीकुर्वित्यर्थः। अत्रापि विहारशब्दार्थवैचित्र्यात् पौनरुक्त्यशङ्कानवकाशः 'यत्नोद्यगो न धीमताम्' इति दण्डिवचनान्मन्तव्यः ॥ २ ॥

उक्तार्थस्याकरणे प्रत्यवायमाह—शृण्विति॥ हे मुग्धे निर्विचारे राधे किमधुना प्रतिपत्तिमूढा वर्तसे। रमणीयतरमतिरम्यं तरुणीजनानाम् अर्थाद्विरहिणीनां तरुणीनाम् मोहनो मूर्छाप्रदो योऽयं मधुपविरावः वृन्दावनं मुखरयन् मकरन्दपानतुन्दिलानामिन्दिन्दिराणां निनदः कळकळः तं शृणु निशमय। किञ्च कुसुमशरासनस्य कन्दर्पस्य शासनकारिण आज्ञाकरा ये वन्दिनः स्तुतिपाठकाः तद्रूपाः पिकाः भूयांसोऽत्र जात्येकवचनन्यायेन गृहीता इति मन्तव्यम्। समुदायस्य समुदायभेदेन वनसेनादिव्यवहारे प्रसिद्धेः। तादृशे

पिकनिकरे सति। भावं प्रियविषयं रतिभावं भज आश्रय। सत्वरं प्रतिष्ठस्वेति यावत्। पूर्वानुभूतविरहवेदनातिशयः किमधुना विस्मृतस्त्वयेति भयोत्पादनाय कुसुमशरासनशब्देन कामकथनम्। स्निग्धयोः कलहकलुषितयोर्वा यूनोः पृथगवस्थानमेव रन्ध्रमन्विष्य वर्ततेऽसौ विक्रमी मदनः। तन्मा विळम्बस्व प्रियतमाभिसरणायेति तात्पर्यम्। अकरणे प्रत्यवाय एवं प्रकाशितः। करणे अभ्युदयोऽप्यत्र सूच्यते। कथमितिचेदुच्यते—कुसुमशरासनशासनः शिवस्तं वन्दितुं शीलं यस्यास्तस्याः सम्बुद्धिः हे कुसुमशरासनवन्दिनि पूर्वजन्मस्वस्मिञ्जन्मनि च शिवसेवानिरते। हे राधे पिकनिकरे कोकिलनिवहे सति त्वां बाधितुं रन्ध्रं प्रतीक्ष्य निलीय तत इतोऽस्मिन्वने वर्तमाने सति निर्विळम्बमेव भावं विद्वांसं श्रीकृष्णं भज सेवस्व। एवं कृते स श्रीकृष्णस्तत्र निरुपमां प्रीतिं सम्पादयिष्यतीति मया निश्चितमेव। यतस्त्वं शिवभजनादतिसुकृतिनी, तत एव श्रीकृष्णे तवानुरागो जातः। त्वयि च तस्यानुकूल्यं सम्पन्नम्। तच्च सम्यगेव फलतु। 'अव्याधिगात्रमनुकूलतरं कळत्रं वेश्म प्रशस्तविभवं विशदा च विद्या। श्लाघ्यं कुलं चरमकालगतिस्समर्था शम्भोः कटाक्षपरिणामविभूतिरेव॥' इति प्रसिद्धेरिति भावः ॥ ३ ॥

मदुक्तमचेतनाभिरपि सम्यगङ्गीकृतम्। कथं पुनस्त्वया नाङ्गीक्रियत इत्याह—अनिलेति॥ करभः करतलबहिःप्रदेशः। 'मणिबन्धादाकनिष्ठं करस्य करभो बहिः' इत्यमरः। करभ इव क्रमपीवर ऊरुर्यस्याः सा करभोरुः। 'ऊरूत्तरपदादौपम्ये' इत्यूङ्। तस्यास्सम्बुद्धौ 'अम्बार्थनद्योर्ह्रस्वः' इति ह्रस्वः। हे करभोरु सुन्दरि राधे त्व गतिं प्रति श्रीकृष्णान्तिकप्रस्थानमुद्दिश्य विळम्बं कालक्षेपं मुञ्च त्यज। त्वरितं प्रतिष्ठस्वेति न केवलं मयैव निर्बध्यसे, अपि तु लतानिकुरुम्बमनिलतरळकिसलयनिकरेण करेण प्रेरणं करोतीव। अचेतनानां लतानां निकुरुम्बं समूहः कर्तृ अनिलेन मन्दमारुतेन हेतुना तरळो लोलायमानो यः किसलयनिकरः पल्लवनिकरः तद्रूपेण करेण पाणिना करणेन प्रेरणमभिसरणत्वरणं करोतीव अभिनयेन प्रकाशयतीवेत्युत्प्रेक्षा। लतानां सखीत्वारोपणलिङ्गविशेषनिर्देशाद्गूढस्याभिसरणत्वरणस्याभिनयमात्रप्रकाश्यत्वमपि गम्यत इति समासोक्तिश्च। एवमचेतनानामप्यनुमतेऽर्थे सन्देहेन विळम्ब्यते चेदत्र करभोरु इति सम्बुद्धेरर्थान्तरमुपालम्भरूपं च गम्यत इति परिकरालङ्कारश्च। तादृशमर्थान्तरं किमिति चेदुच्यते। करभो रासभस्तस्मादुरुः तस्यास्सम्बुद्धिः हे

करभोरु। 'वोतो गुणवचनात्' इति उर्वी उरुरिति द्विधापि प्रयोज्यत्वात्। उरुरधिका। आधिक्यञ्चात्र मौढ्यातिशयः। 'उरुशब्दादूङ्मतः' इत्यूङि नदीत्वास्सम्बुद्धौ ह्रस्वः। तथाच श्रीहर्षः—'उपेक्षितेक्षोः करभाच्छमीरतादुरुं वदे त्वां करभोरु भोरिति' इति। उक्तालङ्काराणां व्यस्तरूपकेण संसृष्टिः ॥ ४ ॥

त्वरितं प्रस्थातव्यमिति सुनिमित्तप्रदर्शनेनाप्याह — स्फुरितमिति ॥ हे मुग्धे राधे सूचितो हरेः परिरम्भो गाढालिङ्गनं येन तादृशं स्फुरितं सुनिमित्तरूपेण चलितममुं वामभागगतं कुचकुम्भं स्वकीयस्तनकलशञ्च पृच्छ। किमर्थन्त्वं स्फुरसीति ब्रूहीति चोदयेत्यर्थः। कीदृशम् — अनङ्गः कामस्तस्य तरङ्गा ऊर्मयस्तद्वशादिव। यथा नदीतरङ्गनिहितः कुम्भस्तदीयतरङ्गवशाच्चलति, तथा त्वदीयहृदयस्थितकामविकृतितरङ्गवशादसौ त्वत्कुचकुम्भश्चलतीति सादृश्यद्योतक एवात्रेवशब्दः स्फुरणस्य स्पष्टत्वार्थमुपात्तः। परमपुरुषार्थभूतहरिपरिरम्भप्रत्यासत्तिसूचकमेवामुष्य स्फुरणम्। यदि न प्रत्येषि तदमुमेव पृच्छ इति स्ववचने प्रत्ययाभावाद्रोषगर्भोक्तिः। अमुमित्येकवचनेन वामः कुचकुम्भोऽभिनयेन निर्दिश्यते। 'वामभागस्तु नारीणां नराणां दक्षिणः शुभः' इति प्रसिद्धेः। मनोहरो द्रष्टॄणां चित्ताकर्षको यो हारः मौक्तिकदाम तद्रूपं यद्विमलं जलं तस्य धारा यस्मिंस्तादृशम्। जलपूर्णस्य कुम्भस्य दर्शनमेव सुमङ्गलं प्रस्थानसमये। 'कलशं जलसम्भृतं पुरः कलहंसः कलयाम्बभूव' इति श्रीहर्षः। सोऽपि पुनर्व्यापारान्तरेण सुनिमित्तान्तरशंसीत्यहो महीयो मङ्गलं तवाचिरात्सम्पत्स्यत इत्यभिप्रायः ॥ ५ ॥

अथ निश्चितेऽप्यभिसरणे प्रस्थानसमयप्रतीक्षणादिवशादपि न विलम्बितव्यमित्याह—अधिगतेति ॥ हे मुग्धे राधे इदं त्वयाधुना श्रीकृष्णोऽभिसर्तव्य इत्येवंरूपं वास्तवं वृत्तम् अखिलसखीभिः तवालीभिस्सर्वाभिरपि अधिगतं ज्ञातम्। सखीषु काचिदपि अविश्वस्ता अविदितार्था वा नास्त्येवेह तवेति भावः। अथात्मानमलङ्कृत्य गन्तव्यमित्यपि न विलम्बः कार्य इत्याह – तव वपुरपि रतिरणसज्जमेव वर्तते। हे चण्डीति। अत्र सामयिकेऽपि कर्मण्यतित्वरणात्सासूयं पश्यन्तीं प्रति सम्बुद्धिः। यद्यपि कुप्यसि तथापि वक्तव्यं मया यावत्प्रस्थानमुच्यत एवेत्यभिप्रायः। रसिता मुखरीकृता रशनारवाः काञ्चीनिनदा एव डिण्डिमाः प्रस्थानपटहाः यथा भवन्ति तथा,

सरसं सरागं यथा भवति तथा, अविद्यमाना लज्जा च यथा भवति तथा चाभिसर श्रीकृष्णसमीपं प्रति प्रतिष्ठस्व। नात्र संशयलवावकाश इति भावः॥ ६ ॥

ननु वक्तव्यं हि वक्तुं सुशकम्। किन्तु निशि तमसि भिया मयैकाकिन्या लघीयस्यपि पदवी दुर्लङ्घ्येति विचार्यत इति चेत्तत्राह—स्मरशरेति॥ हे मुग्धे राधे त्वयैकाकिन्या किमर्थं गन्तव्यम्। अखिलसखीभिरिदमधिगतमेव। प्रियश्चैकाकी त्वां प्रतीक्षते। निर्जना निर्भया च लघ्वी पदवी। अत एवमस्तु। त्वं करेण सखीमस्मदादिष्वन्यतमामवलम्ब्य चल प्रतिष्ठस्व। कीदृशेन करेण—स्मरशरवदाकृत्या नैशित्येन सङ्ख्यया च सुभगा नखा यस्य तादृशेन पाणिना सख्याः प्रकोष्ठमवलम्ब्य सलीलं सञ्चरेत्यर्थः। अपि च वलयक्वणितैः सविलाससञ्चारजन्यैः करकङ्कणरणितैः करणैः हरिं श्रीकृष्णं त्वगामनमेवौत्सुक्येन प्रतिपालयन्तम्। अयमर्थः समनन्तरश्लोकेन वक्ष्यते। निजगतिशीलं निजगमनस्य मान्द्यविलासपेशलत्वादिकं शीलं स्वभावमवबोधय ज्ञापय। गतिबुद्धीत्यादिना द्विकर्मकत्वम्। नो चेत् क्षणमपि त्वद्विलम्बासहस्य तस्य विरहवेदना चिरकालभाविनीव दुस्तरा यत्किमप्यनिष्टं दशान्तरं सम्पादयिष्यतीति शङ्का द्योत्यते। वलयक्वणिते तु श्रूयमाणे मत्समीपं प्रस्थिता प्रिया नचिरादेष्यति। यस्तु विलम्बस्स गमनमान्थर्यजन्य इति हरिः स्वयं भोत्स्यते,न च विरहवेदनयाधिकं परिभविष्यते चेत्येवमुपदेशोऽयं न विस्मरणीय इत्यभिप्रायः। विरहवेदनायाः क्षणकालिकत्वेऽपि चिरकालीनवद्दुस्तरत्वे, 'नरसुराब्जभुवामिव यावता भवति यस्य युगं यदनेहसा। विरहिणामपि तद्रतवद्युवक्षणमितं न कथं गणितागमे॥' इति श्रीहर्षभणितं प्रमाणम्। अनेन सख्याः सौहार्दहृद्यभाषित्वेन नायकयोर्बहुधा चिरानुवृत्तविप्रलम्भस्य समासन्नसम्भोगशृङ्गाराङ्गता कविना दर्शितेति मन्तव्यम्॥ ७ ॥

श्रीजयदेवेति॥ एतादृशगीतरूपं श्रीजयदेवकवेर्भणितं कर्तृ अधरीकृतहारमवरोपितमुक्तादाम यथा भवति तथा, उदासिता त्याजिता वामाक्षी यथा भवति तथा, अविरामं विरामोऽवसानं तद्रहितं यथा भवति तथा च। क्रियाविशेषणैरेभिस्त्रिभिः क्रमादर्थकामपरित्यागेन धर्मान्तरनैरपेक्ष्येण चेति प्रकाश्यते। हरौ भक्तजनदुःखहारिणि श्रीकृष्णे विनिहितानि मनांसि यैस्तेषां श्रीकृष्णभक्तिमात्रतृषानां पुण्यभाजां पुंसां स्त्रीणां वा कण्ठसीमानमधितिष्ठतु कण्ठप्रदेशे वसतु। अधिशीङ्स्थासामित्याधारस्य कर्मसंज्ञायां 'कर्मणि द्वितीया'इति द्वितीया। एतद्गातृ-

त्वेन ब्रह्मौजसानां विप्रादीनां स्त्रीशूद्रादीनामपि श्रीहरिसालोक्यादिसिद्धिः स्यादित्यभिप्रायः। श्रोतृत्वेन चेति मन्तव्यम्। हरेः पुण्यश्रवणकीर्तनत्वेनाविशेषात् ॥ ८ ॥

सा मामिति ॥ हे सखि राधे स प्रियः श्रीकृष्णः स्थिरः तमःपुञ्जो यस्मिंस्तादृशे निकुञ्जे वञ्चुळलताहृहे त्वां प्रतीक्ष्य वर्तमानोऽधुना बहुधा चिन्तयति। बहुधा चेष्टते च। तत्र चिन्ताप्रकारा ईदृशा इत्याह—सा राधा मया चाटुभिः प्रसादिता भूषिता मदनुकूला रिरंसयैव रहोगतं मां जानती समागत्य मां द्रक्ष्यति। वर्तमानसामीप्ये लट्। इदानीं मच्चेष्टितानि ज्ञातुं गूढमागत्य निलीयान्तिके स्थित्वा मामवलोकयति। किञ्च स्वागमनप्रतीक्षं मामवबुध्यान्तिकं प्राप्य मामुद्दिश्य स्मरकथाः पूर्वानुभूता विरहवेदनावार्ता वक्ष्यति। तदचिरेण श्रोष्यामि। अपि च प्रत्यङ्गं प्रत्यवयवमालिङ्गनैः लतावेष्टितकवृक्षाधिरूढकादिकैः प्रीतिमानन्दं दास्यति। अपि च रंस्यते रतविशेषानारप्स्यते च। ननु निश्चितोऽयमर्थः। इतिः प्रकारे। एतत्प्रकाराभिश्चिन्ताभिराकुलो विवशहृदयस्सन् स श्रीकृष्णस्त्वां पश्यति द्रष्टुमुत्सुकस्तत इतः प्रेक्षत इत्यर्थः। कुत्राप्यदृष्ट्वा त्वदनागमनात्तन्निमित्ताज्ञानाच्च खिन्नस्सन् वेपते वेपथुमानास्ते। पुनस्त्वत्प्रसादस्थैर्यनिश्चयात्पुळकयति रोमाञ्चमाविष्करोति। पश्चात्त्वद्रतिप्रत्यासत्तिचिन्तावशादानन्दति आनन्दमनुभवति। अनन्तरमेव त्वददर्शनात्तापेन स्विद्यति। तदनन्तरमेव पदशब्दश्रवणभ्रान्त्या आगच्छन्तीं त्वान्निश्चित्य सहर्षं प्रत्युद्गच्छति अभिमुखमायाति। तदानीमनागतान्त्वां स्वात्मन्युदासीनहृदयां निश्चित्य दुःखातिशयेन मुर्छति मुह्यति। नन्वित्यत्रापि योज्यम्। निश्चितोऽयमर्थो मयेत्यर्थः ॥ २ ॥

समयश्चायमभिसरणोचित इत्याह—अक्ष्णोरिति ॥ हे सखि राधे ध्वान्तं तिमिरं कर्तृ निकुञ्जे लतागृहे विष्वक्समन्तात्। व्याप्तमिति शेषः। अभिसारोऽभिसरणमेव साहसमविचारितकर्म कुर्वन्तीति तत्कृतः तत्कर्त्र्यः तादृशीनां धूर्तानां व्यभिचारिणीनां सुदृशां सुन्दरीणां प्रत्यङ्गम्। वीप्सायामव्ययीभावः। अङ्गमङ्गमालिङ्गति। प्रकृष्टानि सर्वाण्यङ्गानि आश्लिष्य हृष्यतीत्यर्थः। नपुंसकस्यापि ध्वान्तस्य सुन्दरीजनहठालिङ्गनलाभोऽधुना जात इत्यहो 'को नाम कस्य सुकृतं कथमित्यवेयात्' इत्यर्थान्तरन्यासध्वनिस्समासोक्त्या व्यज्यते। तद्धूर्तानामभिसारसाहसकृतामित्याभ्यां पदाभ्यान्तदालिङ्गने दोषाभावः सुदृशामित्यनेन

यदृच्छालब्धस्य तदालिङ्गनस्य सुखदत्वादनुपेक्ष्यता च द्योत्यते। विटवच्च तस्य प्रत्यङ्गालिङ्गनोपायचातुर्यं विशेषणैराह—अक्ष्णोरञ्जनन्निक्षिपत् श्रवणयोस्तापिञ्छगुच्छावलिन्निक्षिपत मूर्ध्नि श्यामसरोजदाम निक्षिपत् कुचयोः कस्तूरिकापत्रकन्निक्षिपदिति। एवमक्षिकर्णमूर्धकुचस्थालिङ्गने तदनुमत्यैव सिद्धे पुनस्सर्वाङ्गालिङ्गनस्याप्युपायो धन्यस्य तस्य सिद्धस्तासामेवानुमत्येत्याह—नीलनिचोळवत् कृष्णवर्णावगुण्ठनपटवच्चारु मनोज्ञम्। एवम्भूतस्य ध्वान्तस्य नपुंसकत्वादालिङ्गनचुम्बनाभ्यामन्यस्य सम्भोगस्यानपेक्षितत्वादपेक्षितसुखस्य तदानुकूल्येनैव सिद्धत्वादतिचातुर्यमतिधन्यत्वञ्च किमुच्यताम्। स्वयमेव पश्यन्ती त्वरितं प्रतिष्ठस्व इति सखीत्यनया सम्बुद्ध्या सूच्यते ॥ ३ ॥

अथ सखी स्ववचनप्रस्थितामपि किञ्चिदकृत्याचरणशङ्कयेव सङ्कुचितोद्यमां राधामौचित्यनिश्चयावहेन वचसा समाश्वासयति—काश्मीरेति॥ हे सखि राधे काश्मीरेण कुङ्कुमेन, अङ्गेष्वनुलिप्तेनेत्यर्थात्, काश्मीरवद्वा गौराणि पीतवर्णानि वपूंषि शरीराणि यासान्तादृशीनामभिसारिकाणां कान्तान्तिकं प्रति व्रजन्तीनां स्वैरिणीनां रुचिमञ्जरीभिः कान्तिकलिकाभिराबद्धा रेखा सीमन्तरेखासदृशी विभागरचना यस्य तादृशमेतदभितो दृश्यमानं तमालानां नीलदळतरुविशेषाणां दळवत् पत्रप्रकरवन्नीलतममतिनीलवर्णं तमिस्रं तिमिरं कर्तृ तासां तेषु कान्तेषु विषये प्रेमरूपस्य हेम्नः कनकस्य निकषोपलतां कषपाषाणभावं प्रयाति प्राप्नोति। नीलवर्णे निकषोपले वर्णनिर्णयाय कृष्यमाणस्य सुवर्णस्य पीतवर्णा कापि रेखा यथा भवति तथा पीतवर्णाङ्गीणामभिसारिकाणां कान्त्या सीमन्तितं तमःपटलं दृश्यत इत्यर्थः। रूपकेणोपमाध्वनिः। तेन च त्रैलोक्यविजयिनो मदनमहाराजस्याज्ञया बह्व्य एवमविशङ्कितमाचरन्ति। तत्किमभिसरणौचित्यशङ्कया ताम्यसि। लौकिकाचारस्यापि 'आचारप्रभवो धर्मः' इति धर्मत्वप्रसिद्धेः, अशङ्कं वैयात्यमास्थाय गच्छेत्यभिप्रायरूपवस्तुध्वनिरित्यलमुदरे पूर्णेऽपि भक्ष्यबुभुक्षया ॥ ४ ॥

अथानुकूल्यौत्सुक्यसम्मिश्रमनसा राधया सह हरिवसतिभूतलतानिकेतसविधे प्राप्तायास्सख्यास्समुचितभाषितां प्रसञ्जयितुमवतारिकापद्यमाह—हारेति। स्पष्टार्थोऽयं श्लोकः। उदात्तमलङ्कारः ॥ ५ ॥

अन्तः प्रवेष्टुं व्रीळावशादशक्नुवतीं राधां प्रति सख्युक्तिप्रकारं गीतेनाह—मञ्जुतरेति॥ वराळीरागेण गीयत इति। 'बन्धुरवेषा रम्यशरीरा सिन्धुरयोषामन्थरचारा। सन्ततमेषा वोऽस्तु विभूत्यै बन्धुवराळी रागवधूटी॥' इति

तदनुस्मरणविधिः। झम्पताळलक्षणं प्रागुक्तम्। प्रविशेत्यादि समीपमित्यन्तं पल्लवम्। अत्र तदादौ विव्रियते। पल्लवे प्रविश पिण्डीमिति वाक्य इव योग्यताविरहाच्चिह्नात् कुञ्जमिति मण्डयेति च पदद्वयमध्याहृत्य वाक्यद्वयं पूरणीयम्। हे राधे त्वं निकुञ्जं प्रविश, माधवसमीपं मण्डयेति। प्रथमं लतागृहं प्रविश। प्रविश्य च माधवस्य श्रीकृष्णस्य समीपं मण्डयालङ्कुरु। राधे माधवसमीपमित्यनुगुणशब्दविन्यासेन युवयोरन्योन्यानुरूप्यं सर्वसम्मतमिति ध्वन्यते। तेन च सन्निहितयोर्युवयोर्दर्शनं मम नयनसाफल्यदायीति निर्बध्यसे मयेति गम्यते। तच्च 'याते गेहाद्बहिरवहिताळीपरिजने' इत्यग्रे वक्ष्यते, ततोऽनुसन्धेयम्। किञ्च इयन्तं कालं पृथगवस्थितौ युवां मम युवयोश्च दुःखहेतू जातौ। साम्प्रतं दैवानुगुण्यान्मत्प्रयासाच्च सन्निकृष्टौ युवां युवयोर्मद्दृष्टेश्च तुष्टिदायिनौ भूयास्तामित्याशास्यते। तत्त्रपापारतन्त्र्यं तवासमञ्जसमिति द्योतयति। अथ प्रथमपादेन कर्तव्यमुपदिशति—त्वमिह विलसेति। सप्तपादीसमानो वाक्यन्यासः। एवमस्य माधवस्यानुरूपा त्वमिहास्मिन्माधवसमीपे निकुञ्जनिलये वा विलस क्रीड भाहीति वार्थः। विलासः क्रीडा शोभा च कथ्यते। तव क्रीडास्थलमेष निकुञ्जः, तव शोभावहमिदं माधवसमीपमिति द्वयमपि द्योत्यते। ईदृशार्थेहशब्दविशेषणत्वेन सप्तम्यन्तं पदं त्वमित्यस्य सम्बोध्यकथनीयत्वाद्राधासम्बुद्धिपदञ्च पर्यायेणानुप्रासघटितत्वेनार्थसम्बन्धेन च सुश्रवत्वादिगुणं मिथोघटनरमणीयं सुकविना गुम्भितमिदं गीतं सहृदयैरालोचनीयम्। अयं प्रदेशः कीदृशः—मञ्जुतरो मनोहरो यः कुञ्जो लतागृहं तस्य यत्तलमभ्यन्तरं तद्रूपं केळिसदनं क्रीडागृहं यत्र। आदावेव रम्यत्वान्निर्जनत्वाच्च सेव्योऽयन्देशः। इह चातिरम्यमतिनिर्जनञ्च लतागृहमिदं वर्जयित्वान्यत्र वासः क्रीडा वा तव न शोभावहेति भावः। त्वं पुनः कीदृशी—रतिरभसेन विहृतित्वरया हसितं सञ्जातहासम्। स्मेरमित्यर्थः। वदनं मुखं यस्यास्तस्यास्सम्बुद्धिः। हे रतिरभसहसितवदने राधे त्वमिह विलस सङ्क्रीडस्व। कोऽत्र त्रपाहेतुरित्यर्थः। एवमवशिष्टाः पादा व्याख्यातकल्पाः। स्वल्पस्तु भेदो व्याख्येयः ॥ १ ॥

नवभवेति ॥ नवं नूतनं यथा भवति तथा भवन्ति उत्पद्यमानानि यान्यशोकदळानि अशोकतरुपल्लवानि तद्रूपश्शयनसारः शय्योत्तरच्छदो यत्र तत्र माधवसमीपे परिक्रीडस्व। कुचकलशयोस्तरळः चञ्चलो हारो यस्यास्तस्यास्सम्बुद्धिः हे कुचकलशतरळहारे राधे। अनया सम्बुद्ध्या महार्घहारमण्डितकुचकुम्भायास्त-

वान्यन्मण्डनमपि नापेक्ष्यत इति ध्वन्यते। ततश्चाकल्पचिकीर्षया स्वाङ्गमण्डने-च्छया च पल्लवापचयवाञ्छया बहिरेव वर्तसे यदि तदपि वृथाप्रयास एवेति प्रतीयते। अतः प्रविश कुञ्जम्, मण्डय माधवसमीपमिति पूर्ववदन्वयः ॥ २ ॥

मधुमुदितेति ॥ मधुना वसन्तेन वा पुष्परसेन वा मुदिता ये मधुपाः तेषां यत्कुलं सजातीययूथं तेन कर्त्रा कलितः कृतो रावो यत्र तादृश इह देशे विलस लीलां कुरु। अन्यत्र गन्तुन्न योग्यम्। अन्यत्रेदृशसुखाभावादिति भावः। त्वं कीदृशी—मदनशरकृतः रभसो वेगः रतित्वरा यस्य तादृशो भावो मनोविकारो यस्यास्तस्याःसम्बुद्धिः हे मदनशररभसभावे राधे। रतिसमु-चितेऽवसरे तत्सामग्र्यामपि सत्यां मदनकदननिस्सहया त्वया किमन्यद्व्यवसीयत इति भावः ॥ ३ ॥

कुसुमचयेति ॥ कुसुमचयैः करणैः रचितं कृतभक्तिरचनादिकं वासगेहं गर्भागारं यस्मिंस्तादृशे इहास्मिन्माधवसमीपे त्वं विलस विहर। यतः कुसुम-सुकुमारदेहा त्वमत ईदृश एव गर्भगृहे विहर्तव्यम्। नान्यत्र याहीति भावः॥ ४ ॥

चलेति ॥ चलश्चञ्चलो यो मलयवनपवनः मलयवायुस्तेन हेतुना सुरभिः सुगन्धिश्शीतश्चायं देश इत्यनेन रत्युद्दीपनविभावपरिपोषः प्रकाश्यते। पवनस्य च त्रिगुणसम्पत्तिप्रकाशनद्वारा रत्युद्दीपनविभावमण्डलेश्वरत्वं व्यज्यते। तादृशे राजन्वति देशे स्थितया कलाकुशलया त्वया निजवैदुष्यानुगुणगीतादिकलाभि-र्विहृतिरारभ्यतामिति सम्बुद्ध्या प्रत्याय्यते। रसेन वलिता संवलिता मिश्रिता ललिता मृद्वी च गीतिर्यस्यास्तस्यास्सम्बुद्धिः हे रसवलितललितगीते राधे इति। सर्वेषामपि स्वगुणानुगुणैव लीला प्रशस्येति भावः ॥ ५ ॥

विततेति ॥ विततानां व्याप्तानां बह्वीनामनेकासां वल्लीनां नवैः नूतनैः पल्लवैर्घने निबिडे इह माधवसमीपे। माधवेनैव तव विहारसौख्यसम्पादनाय स्वयमाहृत्य पल्लवसञ्चयान् पर्यङ्कोपधानासनादिरूपेण निबिडतया विरचय्य त्वत्प्रवेशः प्रतीक्ष्यत इत्यनेन प्रकाश्यते। तदनुगुणा च सम्बुद्धिरवगन्तव्या। तादृशं प्रियतमौत्सुक्यं तदनुकूलाचरणेन सफलयेति भावः। ॥ ६ ॥

मधुरेति ॥ मधुरतरैरतिहृद्यैः पिकनिकराणां कोकिलकुलानां निनदैः कोलाहलैः मुखरे वाचाले इहास्मिन्देशे विलस विहर। दशनरुच्या दन्तपङ्क्ति-

कान्त्या विजितानि तिरस्कृतशोभानि कृतानि शिखराणि कुरुविन्दाख्यानि रत्नानि यया तस्यास्सम्बुद्धिः। 'तन्वी श्यामा शिखरदशना पक्वबिम्बाधरोष्ठी' इति कालिदासः। तादृशि हे राधे त्वमिह माधवसमीपे विलस तन्मतानुसारेण स्वच्छन्दं वा सङ्क्रीडस्व। तदर्थमेव निशायामत्रागत्य तमसि द्वारे तूष्णीमवस्थानमधुना न युक्तमिति यावत् ॥ ७ ॥

विहितेति ॥ हे मुरारे श्रीवासुदेव त्वं विहितः कृतः पद्मावत्या निजकुटुम्बिन्यास्सुखसमाज आनन्दसन्दोहो येन तादृशे जयदेवनाम्नि कविराजराजे कवीन्द्रोद्वहे भणति त्वदीयचरितं यथाप्रतिभं वर्णयति सति। त्वत्प्रसादलाभाय त्वच्चरितवर्णनस्य विधेयत्वश्रवणादेव वर्णनं क्रियते। न तु कविताचातुर्यातिशयस्य त्वत्कृपासम्पादितस्यापि साफल्यसिद्धये केवलमिति भावः अतो मङ्गलानां शतानीति बहुत्वाभिप्रायेणोक्तिः। कुरु सम्पादय। गातॄणां श्रोतॄणां कवयितुर्मम च भूयांसि श्रेयांसि सम्पादय। अत्र श्रीकृष्णविषयः कवेर्भावः प्रकाशितः ॥ ८ ॥

गीतेन प्रपञ्चितमेवार्थं सङ्कोच्य श्लोकेनाह—त्वमिति ॥ सुबोधनार्थोऽयं श्लोकः। स्वयमेव स्वाज्ञया चिरं वहत आतपतापितस्य शिबिकावाहकस्य पिपासाशान्तये यतमानस्याननुवर्तनान्महादोषः। स च धनलवक्रीतादासायितात्तस्मादेव लज्जया तदिच्छाविघात इति यत्तदप्रभुलक्षणत्वादपहास्य इत्युभयलोकविरुद्धां प्रवृत्तिं मा स्मारभथा इति भावः ॥ ९ ॥

गीतम् २२

सेति ॥ इदमपि पद्यमानुष्टुभमपि रसानुगुणगुणबाहुल्यशाल्यपि रसिकहृदयङ्गमसुगमार्थमिति न विव्रियते ॥ ७ ॥

अथैतच्छेषतया कविरेव गीतमाह—राधेति ॥ मध्यमादिरागेण गीयत इति। तद्भावनाप्रकारः प्रागुक्तः। एकताळलक्षणमपि पूर्वमुक्तम्। हरिमित्यादि विकासमित्यन्तं पल्लवानुपल्लवौ सर्वपादसाधारणौ। राधा सा सखीवचनात्त्रपामपाकृत्य निकुञ्जनिवेशनं झटिति प्रविश्य हरिं ददर्श दृष्टवती। कीदृशं हरीम्—एकरसं सदृशानुरागमित्यर्थः। तस्यास्तस्य चैकस्समानो रसो राग इति यावत्। अथवा एकः केवलश्चासौ रस आनन्दश्च। सच्चिदानन्दस्वरूपमित्यर्थः। चिरमभिलषिता विलासा राधया सह स्वैरविहारा येन तम्। अन्यत चिरं बहु-

काले भक्तैरिन्द्रशतानन्दचन्द्रचूडादिभिस्सनकसनन्दादिभिश्चाभिलषिता विलक्षा अवतारभूभारनिर्हारप्रकारा यस्य तम्। किञ्च गुरुरधिको यो हर्षः स्वप्रियतमाभिसरणजन्यस्सन्तोषस्तस्य वशंवदमस्ववतन्त्रीभूतं हृदयं यस्य तम्। अनङ्गस्य विकासः कामस्यापि चमत्कारो यस्मिंस्तम्। कोटिकन्दर्पसुन्दरमित्यर्थः। अन्यत्र गुरुरपरिमितो हर्षः कदाचित्कुतश्चित्क्वचिदप्यननुभूतचरः प्रमोदस्तदायत्तीभूतं हृदयं यथा भवति तथेति दर्शनक्रियाविशेषणम्। किञ्च अनङ्गविकासमङ्गविकासरहितम्। मायिकतनुभुवनभ्रान्तिप्रशान्तिकरमित्यर्थः। एतत् क्रियाविशेषणत्वेन हरिविशेषणत्वेन वा योज्यम्। हरति दुःखजातं सनिदानमिति हरिशब्देन परं ब्रह्म प्रत्याय्यते। दर्शनं साक्षात्कार एव। एवं शृङ्गाराद्वैतविषयमर्थद्वयमप्रयासेन महाकविना क्रोडीकृत्य गुम्भितमिदं गीतमुपनिषदर्थविदां भक्तानां विषयैषिणामप्युत्सवावहं मन्तव्यम्। वराकैरस्माभिस्तु तन्माहात्म्यमविद्वद्भिः स्वल्पमेव शक्यते विवरीतुमिति विरम्यते। कीदृशं हरिं राधा ददर्शेत्याशङ्कायामाद्यपादेन तात्कालिकं विशेषमाह — वदनविलोकने राधाननस्य प्रसन्नस्याभिमुखदर्शनसमये विकसिताः प्रचुरतया प्रकाशमाना विविधा नानाविधा विकारविभङ्गाः स्तम्भस्वेदरोमाञ्चादयस्सात्त्विकभेदा यस्य। तत्प्रकाराणां सहृदयहृदयावगाहावहामुपमामाह—'विधुमण्डलस्य पूर्णचन्द्रबिम्बस्य दर्शनेन तरलितास्तरलीकृतास्तुङ्गा उन्नतास्तरङ्गा ऊर्मयो येन तादृशं जलनिधिं समुद्रमिव स्थितम्'। एवं शृङ्गारपरोऽर्थः। अद्वैतपरस्तु किञ्चिदेव सूच्यते। वदनविलोकनशब्दोऽत्र आपातदर्शनपरः। प्रथमदर्शनसमये गुरुमुखादुपदेशश्रवणकाल इत्यर्थः। विकसिताः प्रादुर्भावं प्राप्ता विविधा बहुप्रकारा विकारविभङ्गास्सन्देहाङ्कुरा यस्मिन्। ते च निरीहस्य जगत्स्रष्टृत्वादयो बोध्याः। किञ्च पश्चाद्दृष्टगुरुसमुपदिष्टवर्त्मना नित्य एकोऽयमात्मेति श्रवणानन्तरमाविमननदशायां समुद्रवदेकीभूयाभासमानमपि समनन्तरकार्यनिदिध्यासनविघ्नमाह—विधुनन्ति विक्षिपन्ति हृदयमिति विधवो विषयाः तन्मण्डलं तत्समुदायः तद्दर्शनं तस्य सतान्तिस्तेन तरलिताः क्षोभितास्तुङ्गा अलङ्घ्यास्तरङ्गाः कर्मफलभूतस्वर्गादिभोगाभिलापादिरूपाः स्वभागा येन। अयमप्यामुखावभासनप्रकार एव। 'स्तोकस्ते भाग एवाखिलभुवनतया दृश्यते व्यंशकल्पं भूयिष्ठं सान्द्रमोदात्मकमुपरि ततो भाति तस्मै नमस्ते', इत्युक्तवदित्यवगन्तव्यम्। एवं परमयोगिसुलभपरब्रह्मसाक्षात्काररूपो वस्तुध्वनिरयं शब्दशक्त्या प्रतीयते। तेन च दिष्ट्या राधाया धन्यतरत्वम्, 'आसामहो चरणरेणुजुषामहं स्यां वृन्दावने किमपि गुल्मलतौषधीनाम्' इति श्रीभागवत

-भिलिपादितं गम्यते। ततश्च भगवतो भक्ताभिमतफलप्रदानबद्धकक्षत्वं यथाकथञ्चिदपि चरितचिन्तनादिभिः क्षपितसमयानां विषयिणामपि श्रेयसामैहिकपारलौकिकाणां सिद्धेरवश्यम्भाविता च बोध्येति ॥ १ ॥

इतः परं पादषट्केन तात्कालिकं श्रीकृष्णस्य रूपसौन्दर्यं प्रकृतमेव वर्ण्यते—हारमित्यादि ॥ अमलतरोऽतिनिर्मलतरोऽसौ तारोऽत्युज्ज्वलश्च तादृशं हारमुरसि विदूरं परिलम्ब्य दधतं धारयन्तं हरिं श्रीकृष्णं सा राधा ददर्श। तत्रोऽयमाह—स्फुटतरैः फेनकदम्बैः करम्बितं व्याप्तं यमुनाजलपूरमिव। पावनत्वगाम्भीर्यप्रसादतापहरत्वादयस्सामान्यधर्माः गम्याः ॥ २ ॥

श्यामलेति ॥ श्यामलकोमलं प्रभामण्डलशालित्वाद्वृत्ताकारञ्च कलेवरं यस्य तम्। किञ्च अधिगतं प्राप्तम्। परिगृहीतमिति यावत्। गौरदुकूलं पीतकौशेयं येन तम्। पश्यद्भक्तजनहृदयानन्दसन्दोहकरणार्थं परिगृहीतशुद्धसत्त्वमयविग्रहस्य भगवतः श्रीकृष्णस्य नीलनलिनेनाचेतनेनोपमितत्वान्नात्र न्यूनत्वमुपमायाश्शङ्क्यम्। प्रभापटलपरिगतत्वान्मण्डलाकारत्वं, श्यामलकोमलसर्वाङ्गत्वं पीतकौशेयपरिधानरमणीयमध्यत्वात्प्रासन्नभागत्वमित्यादीनां सामान्यधर्माणां सहृदयहृदयावगाहित्वेन श्रीहरिरूपानुस्मरणोपयोगित्वात्, तदर्थमेव महाकवेः काव्यरचनासंरम्भाच्चेति मन्तव्यम्। पीतेन हरिद्राभावर्णेन आत्मीयेनैव परागपटलभरेण वलयितं मण्डलितं परिवेषवत्परितो वेष्टितं मूलं वृन्तप्रान्तभागो यस्य तादृशं नीलनलिनमिन्दीवरमिव। अनेन भगवतोऽपि स्वविग्रहसहजतया गृहीतत्वात्पीतदुकूलस्यापि शुद्धसत्त्वमयत्वं द्योत्यते। ततश्च रेणुलेपादिभिर्म्लानशोभत्वादिकमसम्भवीति गम्यम्। अनयैव रीत्या हारममलतरतारमिति पूर्वोक्तस्य हारस्यापि सहजत्वमवगन्तव्यम्। तत्प्रतिबिम्बतया चोपमाने यमुनाजलपूरे नान्यसिद्धस्य फेनकदम्बस्योपात्तत्वात्। अत्र च महार्हवैडूर्यकिरीटकुण्डलेति उद्दामकाञ्च्यङ्गदकङ्कणादिभिरिति पीताम्बरं सान्द्रपयोदसौभगमिति च व्यासवचनं प्रमाणम् ॥ ३ ॥

तरलेति ॥ कलेवरे मुखस्य तत्र च नेत्रयोः प्रधानाङ्गत्वात्तद्वर्णनम्। तरलत्वं राधावदनस्तनादिदर्शनौत्सुक्यादिति वेद्यम्। तच्च तृष्णावत्त्वमेव। अतो न पुनरुक्तिगन्धः। तरलयोर्दृगञ्चलयोश्चलनेन स्वाङ्गाभिमुखं मुहुरापतनेन स्वदर्शनौत्सुक्यनिश्चयाद्राधाया मनोहरं यद्वदनं तेन जनितो रतिरागस्सुरतोत्कण्ठा राधाया येन तम्। अत एव स्फुटे विकचे कमले यदुदरमन्तर्भागः तत्र

खेलितं विहरत्। गत्यर्थाकर्मकेत्यादिना कर्तरि क्तः। खञ्जनयुगं खञ्जरीटाख्यजलपक्षिमिथुनं यत्र तादृशं तटाकं कासारं शरदीव। शरदि गन्तृणामातपवशात्पिपासायां सत्यान्तादृशतटाकदर्शनाद्यथा तथा राधायाः प्रीत्यतिशयो जात इति भावः ॥ ४ ॥

वदनेति॥ वदनरूपं यत्कमलं पद्मं तस्य परितः शीलनाय परिचरणाय मिलितेन। द्विमूर्तिधारिणेत्यर्थाद्गम्यम्। उभयतः सन्निहितेन मिहिरेण सूर्येण समे सादृश्यात्सम्भावनीये ये कुण्डले शुद्धसत्त्वमये दिव्यजाम्बूनदमहार्घदिव्यरत्नघटिते मकराकारे कर्णभूषणे ताभ्यां शोभा यस्य। किञ्च स्मितरुच्या मन्दहासशोभया कर्त्र्या रुचिरं मनोहरं यथा भवति तथा समुज्ज्वलितं प्रदीपितं यदधरपल्लवं नेन कृतः सम्पादितो रतिलोभो राधायास्सुरताभिलाषपरिपोषो येन तादृशश्च ॥ ५ ॥

शशीति॥ शशिकिरणैश्चन्द्ररश्मिभिः छुरितं सम्पृक्तमुदरमन्तर्भागो यस्य तादृशो यो जलधरो नीलमेघस्तद्वत्सुन्दराः सकुसुमाः केशा यस्य तम्। तिमिरे अन्धतमसपुञ्जे उदितं यद्विधुमण्डलं तद्वन्निर्मलः प्रकृष्टप्रकाशः मलयजतिलकस्य चन्दनकृतवर्तुळविशेषकस्य निवेशस्संस्थानं यस्य तादृशश्च। अत्राप्यभूतोपमा भगवदङ्गस्य सहृदयहृदयसुगमतार्थमेवोपात्ता ॥ ६ ॥

विपुलेति॥ विपुला विस्तीर्णा ये पुळका रोमहर्षास्तेषां भरेणातिशयेन दन्तुरितं दन्तुरीकृतं निम्नोन्नतीकृतम्। राधागमनजनितहर्षानुभावसात्त्विकोदयवशादिति गम्यम्। 'दन्त उन्नत उरच्' इत्युरजन्ताद्दन्तुरशब्दात्तत्करोतीति णिचि कर्मणि क्तः। किञ्च रतिकेळ्यर्था या कला कामकला पूर्वोक्ता अङ्गुष्ठपदगुल्फेत्यादिका रतिरहस्योक्ता तस्यामधिकधीर्मतिनिपुणम्। 'धीरो मनिषी'इत्यभिधानात्। विपुलपुळकेत्यादिपदं क्रियाविशेषणत्वेनापि योज्यम्। अतो हरेः कळाचातुर्यफलभूतं राधानिष्ठमिदं बोध्यम्। मणिगणानां किरणसमूहैः प्रभासन्दोहैः सम्यगुज्ज्वलानि यानि भूषणानि प्रागुक्तप्रकाराणि हारकेयूरादीन्याभरणानि तैस्सुभगं स्पृहणीयं शरीरं यस्य तादृशम्। अनेन तमःपुञ्जसञ्छन्नदृष्टिप्रसरेऽपि निकुञ्जोदरे प्रव्यक्तावयवमिति गम्यते। ततश्च दर्शनक्रियाया असम्भवशङ्का निरस्तेति ध्येयम्। एवम्भूतं हरिं सा राधा ददर्शेति पल्लवेनान्वयः ॥ ७ ॥

श्रीजयदेवेति ॥ श्रीजयदेवस्य भणितविभवाद्वाग्विस्तराद्‌द्विगुणीकृतः स्वबुद्ध्या परिकल्पितो भूषणभारोऽलङ्कारातिशयो यथा भवति तथा हरिं हृदि विनिधाय ध्यात्वा तस्मै प्रणमत नमस्कुरुत। हे जना यदि वः परमपुरुषार्थलिप्सा, तर्हि हरिप्रणामः कर्तव्यः। तत्र युष्मदुपकाराय मया स्ववाग्विभवानुगुण्येन यत्किञ्चिद्यथाकथञ्चिदनुवर्णितं हरिरूपम्। केवलमिदमियदिति मा स्म मन्यध्वम्। इतोऽपि बहुगुणं महार्हवैडूर्यकिरीटेत्यादि साक्षान्मन्मथमन्मथेत्यादि च व्यासवचनं स्वबुद्धिविभवमप्यनुसृत्य श्रीहरिं हृदये सम्यङ्निधाय प्रतिसमयं भगवते नमस्कुरुत। ननु यद्येवं किमर्थं जयदेवेन किञ्चिद्भणितमित्याशङ्क्याह—रुचिरं मनोज्ञम्। मनोज्ञत्वात्स्वगुरूपदिष्टत्वाच्च श्रीहरिस्मृतिसमये तल्लीनमनसो मम मुखाद्गीतरूपेण कापि वाणीयमुदिता। श्रीहरिरूपस्य रुचिरत्वं मया ज्ञायते। न पुनरस्याः। तत्र यूयमेव प्रमाणम्। युष्माकं प्रमाणीभवितुमियन्नार्हतीति भावः। सुकृतोदयः पुण्यकर्मापूर्वाविर्भावस्सार उपादेयांशो यथा भवति तथेति प्रणमनक्रियाविशेषणम्। सुकृतोदयस्सारो यस्मिन्निति हरिविशेषणं वा। तदा सर्वप्रकारेणापि हरिप्रणामः कर्तव्य इत्यपर्याप्तिशङ्का स्ववर्णनस्य निरस्यत इति मन्तव्यम् ॥ ८ ॥

हरिदर्शनानन्तरं राधायास्सात्त्विकाविर्भावं भङ्ग्यन्तरेणाह—अतिक्रम्येति ॥ अपाङ्गमपाङ्गदेशमतिक्रम्य श्रवणपथपर्यन्तगमनप्रयासेन कर्त्रा तरळतरभावमत्यन्तालस्यं गमितयोः प्रापितयोः राधायाः अक्ष्णोर्नयनयोः तदानीं प्रियतमालोकसमये श्रीकृष्णदर्शनक्षणे स्वेदाम्भःप्रकरः श्रमजलशीकरपटल इव हर्षाश्रुनिकरः पपात। यथा घर्मकाले कार्यान्तरेण दुर्गमं कञ्चिद्देशमतिक्रम्य पुनरपि दूरदेशमुद्दिश्य महान्तं मार्गमटित्वा प्रयासापनोदनाय शीतळं प्रपामण्डपादिकमाश्रयतामध्वगानां तदानीं स्वेदाविर्भावः स्यात्तथा राधानयनयोरपि स्वेदाविर्भाव उत्प्रेक्ष्यते। वस्तुतस्तु हरिदर्शनजन्यसात्त्विकोदय एव वेदितव्यः ॥ ८ ॥

अथ विप्रलम्भोद्दीपितरिरंसयोर्नायकयोस्तदुचितसामग्रीमाह—भजन्त्य इति ॥ तल्पान्तं कुसुमकिसलयकल्पितकेळिशयनीयोपान्तं भजन्त्याः प्राप्नुवत्याः प्रियास्यं श्रीकृष्णमुखपद्मं साभिलाषमालोकयन्त्यस्तस्या मृगदृशो राधाया अवहिते तरमज्जनघटनसावधानमनस्के आळिरूपे परिजने परिचारकवर्गे। एकाकिन्या आळ्या एव परिचारकवर्गत्वारोपादवहितपदेन विशेषणाच्च तस्या आळ्या बहुजनकरणीयपरिचरणकौशलं तन्मुखैक-

तात्पर्यमपि व्यञ्जयति। कृतया कपटकण्डूत्या पिहितमाच्छादितं स्मितं प्रहर्षोदितं हसितं यथा भवति तथा गेहान्निकुञ्जगृहाद्बहिर्याते सति लज्जापि। कदाचिदप्यमुक्तपार्श्वत्वं सख्या इव लज्जायाश्च द्योतयितुं समुच्चयार्थोऽपिशब्दः। सलज्जा सती अतिदूरं व्यगमत् विमुच्य गता। लज्जाया अपि लज्जासम्भवे हेतुं प्रियस्य विशेषणमाह—स्मरसमरः सुरतं तदर्थं साकूतमाकूतसहितमत एव सुभगमतिलोभनीयम्। अत एव तद्दर्शनादनिवृत्तिः प्रियायाश्च द्योत्या। ततश्च लज्जाया लज्जाभिभाव उत्प्रेक्षितः। मिथः स्निग्धयोर्दम्पत्योः मिथोविहृतिपूर्वरङ्गे प्रियतराणामपि परिवाराणां लज्जाहेतुकं दूरगमनं विश्वासादिभिरिति लोकसिद्धो ह्ययमर्थ इति भावः ॥ ९ ॥

जयश्रीति ॥ सुगमार्थोऽयमाशीःश्लोकः ॥ १० ॥

इत्यखिलविद्यापरिवारश्रीमद्दक्षिणामूर्तिमहादेवप्रसादलब्धसाङ्गवेदशब्द-
तर्कपूर्वोत्तरमीमांसासाहित्यसार्वभौमचरकुरुकोण्डुभट्टमहोपा-
ध्यायानुजेन सर्वाम्बिकागर्भशुक्तिमुक्तामणिना लक्ष्मी-
धरसूरिणा विरचितायां श्रुतिरञ्जिन्याख्यायां
श्रीमद्गीतगोविन्दव्याख्यायां मुग्धमधु-
सूदनाख्यस्यैकादशसर्गस्य भावार्थ-
विमर्शः सम्पूर्णः

1 एतत्पद्यस्य पूर्वमेकं परश्चैकमिति मुद्रितपुस्तके दृश्यमानं पद्यद्वयं व्याख्यातृपाठे नास्ति।

द्वादशः सर्गः ।

सरससरसीरुहाक्षः[1] ।

अथ विजनविहृतिप्रकारान् सूचयितुमारभते—गतवतीति ॥ सखीवृन्द इत्येकस्या एव निर्देशः पूर्ववदेव ध्येयः । परिचरणातिचतुरायां सख्यां गतवत्यां निर्जनीभूते निकुञ्जे मन्दत्रपाभरां निर्भरेण पूर्णेन स्मरेण परवशानि तत्परतन्त्राणि यान्याकूतानि मनोरथाः । अभिप्राया इति यावत् । तैः स्यूतं समन्तात्सम्बद्धं यत्स्मितं तेन स्नपितः सिक्तोऽधरो यस्याः । त्रपाभरस्य मन्दत्वेन स्मरस्य निर्भरत्वेन च तावन्तं समयं लज्जाविजितमन्मथत्वं तदानीं मन्मथविजितलज्जात्वञ्चावगन्तव्यम् । आकूतैः स्यूतत्वेन स्मितस्यार्द्रत्वं व्यज्यते । तेनैव स्नपितत्वोपपत्तिः । सरसं सरागमलसञ्च यथा भवति तथा । दृष्ट्वा दृष्ट्वेत्यनेन दर्शनानलम्भावः प्रत्याय्यते । मुहुः पुनः पुनः नवे नूतने पल्लवप्रसवमये शयने निक्षिप्ते अक्षिणी यया । तल्पाक्षिनिक्षेपेण रिरंसा द्योत्यते । तस्य च पौनःपुन्ये मन्दाया अपि त्रपायाश्शक्तिर्हेतुतया वेदितव्या । अत एव हरेर्वचनावसर इति ध्येयम् । तादृशीं प्रियां राधां हरिः श्रीकृष्ण उवाच उक्तवान् । गळितशेषामपि शक्तिमतीन्त्रपामपाकृत्य तां रमयितुमिति शेषः ॥१॥

गीतम्—२३

तदुक्तिं गीतेन प्रपञ्चयति—किसलयशयनेति ॥ रामाळीरागेण गीयत इति । नादरामाग्रीरागेणेत्यर्थः । 'व्योमार्गे सुरवनितासमानवेषा क्षौमाग्र्यं परीदधती मनोज्ञभूषा । रामाग्री चरति वसन्तरागपत्नी प्रेमोद्ग्रीवितनयना प्रियाननाब्जे ॥' इति तच्चिन्तनमार्गः । एकताळः प्रागुक्तलक्षणः । क्षणमित्यादि राधे इत्यन्तं पल्लवानुपल्लवौ । हे राधे अधुना क्षणं नारायणमनुभज । मामिति शेषः । अहं नारायणो विष्णुरेवास्मि । त्वं महालक्ष्मीरेवासि । राधेति सर्वैरुच्यसे । त्वं तत्प्रत्ययान्निजमहिमानं नावबुद्ध्यसे, मानुषीभावसुलभान्मायामोहात् ! अहन्तु स्वाधीनमायत्वान्मानुषभावेऽप्यात्मज्ञानमखण्डमेव बिभर्मीतीयानावयोर्भेदः ।

---

1) सुप्रीतपीताम्बर इति मुद्रितपाठः ।

ममावतारस्य बहुकार्यतया चावयोस्सहासिकावसरः स्वल्प एव। मिथःप्रेमा त्वनपायश्च। एवं बुद्ध्वा त्यक्तकालुष्या सती त्वमधुना नारायणं मामनुभज। नान्यगोपीवन्नन्दसुतबुद्ध्येत्यर्थः। अहं त्वामन्यगोपीवन्न भजामि। अपि त्वसाधारणप्रणयोऽहं त्वयि। तद्वत्त्वमपि मामनुभजेत्यर्थः। क्षणमित्यनेन, क्षणान्तरे विरहदुःखञ्च नौ जायते, अतोऽधुनैव मामनुभजेत्यर्थो गम्यते। ननु मायालुप्ततत्त्वबोधत्वात्त्वद्विरहदुःखितायाम्मयि भवानखण्डज्ञानी न दुःखितोऽभूत्। तदसमानमनसोरावयोरन्योन्यभजनमपि नीरसमेवेति चेन्मैवम्। त्वयि दुःखितायां तदधिकम्मे दुःखं तज्ज्ञानादेव भवति। अत एव तत्त्वमवबुद्ध्यस्व। अधुना क्षणं मामनुभज चेत्यर्थः। यदि क्षणान्तरे विरहो निश्चितकल्पस्तर्हि किमर्थमिदानीं भजनमित्याशङ्कायामाह—अनुगतम्। सर्वभूतेष्विति शेषः। सर्वात्मानं मामवबुद्ध्य त्वदात्मन्यपि स्थितमनुसन्धाय परस्ताद्विरहव्यथान्न प्राप्स्यसीति भावः। केन प्रकारेणानुभजामीत्याशङ्कायां श्रीकृष्णः स्वयमेव तां तत्प्रकारानादित उपदिशति—हे कामिनि प्रगाढकामे राधे त्वं किसलयशयनतले पल्लवशयनस्योपरि चरणनलिनयोः पादपद्मयोः विनिवेशं विन्यासं कुरु। त्वया प्रयासेनापचितैः पल्लवैः परिकल्पितस्योपरि चरणन्यासो मया कृतश्चेन्महानेव ममापराधस्स्यादिति मा स्म शङ्केथाः, एतदर्थमेव मया कल्पितत्वात्। प्रत्युतेदमुचितमेव भविष्यतीत्याह—इदं पराभवमनुभवतु। इदमिति सर्वनाम्ना वृत्तिच्छन्नपल्लवमनुसन्धीयते। अङ्गुल्या निर्देशायेदंशब्दः। इदं परिदृश्यमानं किसलयं पराभवमवमानमनुभवतु। यतस्तव पदपल्लवयोर्वैरि मार्दवारुण्यादिभिर्मत्सरि। बलवद्विग्रहस्यावमानाकीर्त्यादिफलत्वादस्येदमुचितमेवेति भावः। ननु पदपल्लववैरित्वे सत्यपि यत्किञ्चिदपकर्तृत्वमदृष्ट्वा तत्पराभवो न युक्त इति चेन्मैवम्। वैरित्वनिश्चये सति प्रतिक्रिया युक्तैवेति द्योतयितुमाह—सुवेषं। शोभनो वेषो यस्य तादृशमिदम्। बलवद्विरोधे सत्यपि स्वप्रभावप्रकाशनादौद्धत्यमस्य सिद्धम्। अत इदमिदानीमेव तत्फलमनुभवतु। न चेदितः परमपि दृप्यतोऽस्य अशक्यप्रतिक्रियत्वमपि भावीति यावत् ॥ २ ॥

करेति॥ हे राधे अहन्तव चरणं करकमलेन मम पाणिपद्मेन करोमि संवाहयामि। करणमत्र संवाहनं विवक्षितम्। करोतेर्बह्वर्थत्वात्। तत्रौचित्यमाह—विदूरमार्गमितासि। मया निर्दयेनेत्यर्थात्। अतः स्वापराधशान्तये इदं संवाहयामि। किञ्च त्वं मालिव नूपुरं क्षणं शयनोपरि उप समीपे कुरु

स्थापय। अत्र कृञः स्थापनमर्थः। आत्मनो नूपुरस्य च साधर्म्यमाह—अनुगतिशूरमिति। अनुगमने शूरं विक्रान्तम्। अत्र शौर्यं जल्पाकत्वं नूपुरस्य बोध्यम्। त्वद्गमनभङ्गिमनुसृत्य मञ्जु शिञ्जानमित्यर्थः। स्वस्यानुगतिशूरत्वमनुवर्तनचातुर्यपरम्। अनुवृत्तिर्मतानुरोध एव। 'इदं कृष्णं कृष्णं प्रियतमतनुश्चेत्तमथ किं गमिष्यामो यामो न भवतु गतिर्नैव भवतु।' इत्येवंप्रकारेण त्वन्मतादभिन्नमतमित्यर्थः। तादृशोऽहं त्वया शयनोपरि करणीय एव। तदर्थमेव तवेहागमनात्। तथेदं नूपुरमपि क्षणमपि शयनप्रान्ते निवेशयेति स्वकरिष्यमाणसंबाहनसमये तद्विनाभावस्यैव सुखदत्वादुक्तिः। एवं भगवन्तं मामनुभजेति पल्लवेनान्वयः॥ ॥ २ ॥

वदनेति॥ हे राधे वदनसुधानिधेस्त्वदीयमुखेन्दोर्गलितममृतमिव मदनुकूलं वचनं रचय कुरु। ब्रूहीत्यर्थः। अनुकूलशब्देन स्वस्य श्रवणयोश्चकोरमिथुनत्वारोप आर्थोऽनुसन्धेयः। अतश्चैकदेशविवर्ति सावयवरूपकं सहोपमया संसृष्टम्। ततश्च अदृष्टे त्वन्मुखेन्दावन्धकारितमिदं जगत्। तदानीं मन्नयने चकोरमिथुनवत्तृषिते स्थिते। दृष्टे त्वस्मिन्नयनचकोरयुगळमिदं कान्तिसुधापारणलाभपरितृप्तमववुद्ध्य श्रोत्रे चकोरतां प्राप्य वचनसुधामभिलषतः। तदभिलाषोऽपि पूरणीय इति वस्तुध्वनिः। तदनुसारेण पञ्चेन्द्रियभोग्यममृतं त्वदाननेन्दावस्तीति सुधानिधिशब्दशक्त्यनुगृहीतोऽनुरणितध्वनिश्च। विविधसुधारसनिधानभूतत्वदीयवदनाज्जनितममृतमिव स्थितं वचनमनुकूलं यथा भवति तथा रचय व्याप्रियस्व इति वा व्याख्येयम्। उभयथापि तुल्योऽर्थः। अथवा वचनरचनमेव विधेयम्। तस्यानुकूल्यन्तु सर्वथा सिद्धमेव। अव्यभिचारात्। प्रतिकूलस्यापि मा मेत्यादिप्रतिषेधजल्पितस्यापि सुखदत्वादिति द्रष्टव्यम्। किञ्च आस्तामिदं सर्वं त्वत्कर्तृकम्। यत्किञ्चिदहं स्वातन्त्र्यं चेष्टितुमुद्यतोऽस्मि। तत्र मा स्म कुप्य इत्याह—पयोधररोधकमुरसि वर्तमानं दुकूलमपनयामि। पयोधरयोः कुचयोरावरणकर्तृत्वमपनयने हेतुः। पयोधरमात्ररोधकस्य दुकूलस्य महादुःखावहत्वमुपमयाह—विरहमिव। अनुमतिलाभसौकर्यार्था चेयमुक्तिः। विरहस्यापनेयत्वं तवाप्यनुमतमेव। उभयोरप्यावयोर्दुःखापहसहासिकारासिक्याधिवयसाम्यादिति भावः। इहाप्युपमालङ्कारः ॥ ३ ॥

प्रियेति॥ उक्तार्थे मौनानुवादेनानुष्ठिते लज्जायां मज्जतीं प्रत्याह—हे राधे मा मा विवशा भूः। त्वं त्वदीयं कुचकलशं मदुरसि विनिवेशय। निरा-

वरणत्वनिरासायेति शेषः। कीदृशं कुचकलशम्—पुळकितं रोमाञ्चकञ्चुकच्छन्नम्। अनेन अपनीतेऽपि दुकूले सावरणत्वान्न मे नयनसाफल्यं सम्पन्नम्, तथापि त्वं मा विषीदेत्यनुनयचातुर्यनिर्वाहाय स्वायाससहत्वं द्योत्यते। किञ्च प्रियमभिमतं यत्परिरम्भणमालिङ्गनं तदर्थं यो रभसस्त्वरातिशयस्तेन वलितं संवलितम्। मिश्रितमिति यावत्। तादृशमिवेति सम्भावनामात्रद्योतक इवशब्दः। दूरे तिष्ठन् देवदत्त इवाभातीतिवत्। न तूत्प्रेक्षाद्योतकः। 'वस्तुनः कस्यचिद्वस्त्वन्तरतादात्म्यसम्भावनमफलस्य फलात्मना अहेतोर्हेतुभावेन च सम्भावनमुत्प्रेक्षा' इत्यालङ्कारिकसिद्धान्तात्। इह तु हेतोरेव प्रियपरिरम्भणरभसस्यैव सात्त्विकभावभूतरोमाञ्चरूपेऽनुभावे प्रतिपादनाच्च। तर्हि न स्वरसमिति चेन्मैवम्, प्रियत्वविशेषणात्परिरम्भणक्रियायाम्। न वैलोम्यमाचरणीयमित्यनुनयपूर्वकमालिङ्गनोपक्रमस्यैव रमणीयत्वादि यलमस्थानवर्तनेन। प्रकृतमनुसरामः। ननु सिद्धमावरणं निरस्य कृत्रिममस्थिरमावरणं किमर्थं प्रदर्श्य विलोभयसि। नेदं मम हृदयङ्गमम्। अलमिदानीमविनयेन इति दृष्टिसृष्टं भावं दृष्ट्वा स्पष्टमिष्टमर्थं दृष्टान्तमभिधाय सान्त्वपूर्वमर्थयते—नाशय मनसिजतापमिति। तापनाशनस्य सामान्यस्यापि पुण्यत्वान्मनसिजतापस्यापि तद्विशेषतया तन्निर्विशेषत्वात्, मम च त्वदतिरिक्तजनैरस्याकर्तव्यतया चावश्यं प्रसाद्य तदिदं कर्तुमर्हस्येवेति भावः। मदुरसि कुचकलशं विनिवेशय नाशय मनसिजतापमिति वाक्यद्वयेन कान्तिझरीपरीवाहपूरितकुचकलशविनिवेशनं विना मम हृदये मदनतापो न प्रतिविधेयः। तदर्थमेव मया दुकूलन्निरस्तमित्यभिप्रायः सूचित इत्येवं व्याख्येयम्। अनुमतिलाभायैव विनिवेशयेति प्रार्थने लोट्। अतिदुरवापमिति कुचकलशविशेषणं प्रार्थने हेतुः। एतदर्थमेव तपस्यता मया इदानीमपि न सम्यक् लभ्यमानमिति भावः ॥ ४ ॥

एवमनुप्रार्थ्य गाढालिङ्गनं मुहुरपि लब्ध्वा पश्चात्, 'मनोरथानामगतिर्न विद्यते' इति न्यायेनानन्तरकृत्यमर्थयते—अधरेति ॥ हे भामिनि राधे तवाधरे यस्सुधारसो वर्तते तमुपनय देहि। मृतमिव स्थितं दासं मामित्यर्थात्, जीवय। प्राणदानपुण्ये लभ्ये कथमुपेक्षस इति शेषः। कस्ते मरणहेतुरित्याशङ्कायामाह—विरहानलेन त्वद्विरहाग्निना दग्धवपुषं प्लुष्टदेहम्। अत एव अविलासं निश्चेष्टम्। उज्जीवनस्यावश्यकत्वमाह—त्वयि विनिहितमनसमिति। अत्र गृहे दह्यमाने तत्रत्यं सारं वस्तु यथा सर्वैरन्यत्र नीयते तद्वन्मया मन्मनस्त्वयि विनिहितमिति गम्यम्। स्वायत्ते सत्यप्यमृते तद्व्ययासहिष्णुतया मृतस्वदासानुज्जीवनान्महान्दोषोऽपि

स्यादिति भेदोपन्यासः ततो जीवयेति प्राप्तकाले लोट् । तेन मृतमिव निश्चेष्टं स्थितं मां जीवयितुमयमेव काल इति दर्शितम् । इदानीमुपेक्षणे मृतिरेवावश्यम्भाविनीति सूच्यते । अथवा प्रैषे लोट् । ज्ञातस्य ज्ञापनं हि प्रैषः । अमृतेन मृतस्य जीवन ज्ञातमपि सम्भ्रमादिना विस्मृतमनुस्मारयितुमधरसुधारसमुपनय दासं जीवयेति ज्ञापयति । इदमपि अनुपदं तत्प्रसादादासाद्य रतोत्सवापाषाडम्बरार्थम् ॥ ५ ॥

उत्सन्नलज्जामुत्साहयति—शशीति ॥ हे शशिमुखि चन्द्रसुन्दरानने राधे त्वमनुगुणोऽनुरूपः कण्ठनिनादः परभृतपारावतारावप्रभृतिप्रतिनिधिमणितविशेषनिर्गमो यस्य तादृशं मणिरशनागुणं रत्नमेखलाकलापं मुखरय वाचालीकुरु । मा स्म मध्ये लज्जावशीभूय सङ्कोचयेत्यर्थः । अतिप्रसङ्गशङ्कया सम्भविनो लज्जोदयस्य निरासार्थमप्ययमेवोपाय इति चानुगुणेत्यादिपदेन द्योत्यते । प्रयोजनान्तरञ्चापरिहार्यमर्थयते पिकरुतविकले त्वद्वियोगकालानुभूतदुःसहकोकिलकुलालापरूपकामहुङ्कारोपतापितत्वात्प्रतिहतशब्दग्रहणशक्तिनि मम श्रुतियुगळे कर्णशष्कुलीद्वये चिराद्बहुकालानुबन्धिनमवसादं खेदं शमय निर्वापय । अत्र विकलपदेन 'पित्तेन दूने रसने सितापि तिक्तायते' इतिवत्प्रतिहतस्वविषयग्रहणशक्तिशा श्रुतियुगवर्तिनी दीपनरोचनौषधदानन्यायेन त्वया मधुरमणितमणिकाञ्चीरणितश्रावणसमुद्दीपितस्वोचितपाटवापादनेन हरणीयेति द्योत्यते । चिरादित्यनेन दयार्हता सूच्यते ॥ ६ ॥

मामिति ॥ हे राधे त्वमतिविफलयात्यन्तनिष्फलया रुषा प्रणयकलहेन विकलीकृतं विवशीकृतं मामवलोकितुं द्रष्टुमधुना इदानीं मीलितलज्जितं मीलितेन पक्ष्मळवर्त्मावरणतिरोधानेन । भावे क्तः । लज्जितं सञ्जातलज्जमिदन्तव नयनं विरम विरमय । अन्तर्गतण्यर्थाद्रमेः व्याङ्परिभ्यो रम इति परस्मैपदम् । त्रपासङ्कोचं विना विलासविकासशालिन्या दृशा मां पश्येति तात्पर्यम् । किञ्च रतिखेदं रतौ क्रीडायां विषये खेदं दुःखम् । रतिदुःखशीलतामित्यर्थः । विसृज त्यज । इहेदमिङ्गितम् । पिशुनवत् कोऽपि कोपः प्राप्यासतो दोषान् सत इव प्रकाश्य तव हृदयं कलुषीकृत्य मयि विमुखतां कृतवान् । स चेदानीमस्मद्दैवानुकूल्यादलमिति मत्वा निवृत्तः ततो वृथा विवशीकृतं मां द्रष्टुं तव नयनं लज्जते । तस्य लज्जाविनिवार्य सम्यग्विशालेन तेन मामिदानीमप्यशान्तवैवश्यं पश्य । तदा मद्दशादर्शनवशात्तव मयि दयोदयः स्यात् । ततो मदनरसं ज्ञास्यसि । ततश्च ते

रतिदुःखशीलता पलायत इति। एवमत्र पूर्वं पूर्वं बहुधा प्रपञ्चितस्य विप्रलम्भस्याधुनातनसम्भोगशृङ्गाराङ्गता नायकमुखेन ख्यापितेति मन्तव्यम्। मामनुभजेत्यन्वयः ॥ ७ ॥

श्रीजयदेवेति॥ अनुपदं वीप्सार्थेऽव्ययीभावः। पदे पद इत्यर्थः। निगदितः प्रकाशितः मधुरिपोः श्रीकृष्णस्य मोदो राधाप्रीणनार्थस्सन्तोषो यत्र तादृशं श्रीजयदेवकथितमिदम्। गीतमित्यर्थात्। रसिकजनेषु रसज्ञेषु सहृदयेषु विषये मनोरमो हृदयानन्ददायी यो रतिरसभारः परिपुष्टशृङ्गाररसास्वादधुरीणता तद्रूपं विनोदं वृथाकालयापनोपायं जनयतु सम्पादयतु। श्रीकृष्णविषयस्य शृङ्गारस्य पुण्ड्रेक्षुभक्षणाद्वेतनविलाभवदुभयलोकोपयोगित्वादिति भावः ॥ ८ ॥

एवं गीतं समाप्य तत्प्रतिपादिताया राधाभिमुख्यप्रार्थनायाः फलमनन्तरश्लोकेन वर्णयति—प्रत्यूहेति॥ स्वरूपेण स्वभावेन ललितो रम्यः स चासावारम्भश्च चेष्टाविशेषश्च सुरतक्रीडाविशेष उद्भूत इत्यर्थः। कीदृशः — प्रियम्भावुकः प्रियो भवन्। उभयोरपि तयोः रतिचिरकाङ्क्षितत्वाद्दुर्लभत्वाच्चातीव प्रियम्मन्नित्यर्थः। यत्प्राप्तिप्रत्याशया प्रागतिदुस्सहान्यपि तानि तानि विरहवेदनाविजृम्भितानि स्तम्भिततनुत्यागसाहसं सोढानि तादृश इति यावत्। उक्तमपि निसर्गलालित्यं न केवलमारम्भस्यैव। अपि त्वारब्धायाः क्रीडाया आनिर्वाहं सर्वावयवानामपीत्याह वाक्यचतुष्टयेन। यस्मिन् स्वरूपललिते आरम्भे क्रीडाप्रवृत्तिविशेषे आदित एवानुष्ठेये निबिडाश्लेषे गाढालिङ्गनरूपे कर्मणि विषये पुलकाङ्कुरेण रोमहर्षप्ररोहेण हेतुना प्रत्यूहोऽभूत्। 'विघ्नोऽन्तरायः प्रत्यूहः' इत्यमरः। श्रेयस्त्वेनाभिमतस्यारम्भस्य विघ्ने सति कथं प्रियम्भावुकत्वमिति चेदुच्यते। अत्राश्लेषस्य नीरन्ध्रत्वं हीष्टम्। तत्र रोमहर्षेण विघ्ने कृते नीरन्ध्रत्वं यद्यपि न सिद्धम्, तथापि स आरम्भः प्रियम्भावुकोऽभूत्। अनुभावमुखेन मिथोऽनुरागवेगनिश्चयादिति भावः। किञ्च क्रीडायां यद्यदाकूतं तस्य तस्यान्योन्यं विलोकने विषये निमेषेण नियतभाविना नेत्रवर्त्ममेळनेन मनुष्यभावचिह्नेन अपरिहार्येण च हेतुना प्रत्यूहोऽभूत्। तन्मात्रकृतत्वात्तस्य च परिहार्यत्वनिश्चयात्प्रियम्भावुकत्वं वेद्यम्। अधरसुधापाने विषये कथानर्मभिः प्रत्यूहोऽभूत्। कथानर्माणि नर्मकथाः। तेषामपि मिथोरत्युद्दीपकत्वात्प्रियम्भावुकत्वं सिद्धम्। 'किमपि किमपि मन्दं मन्दमासक्तियोगादविचलितकपोलं जल्पतोरक्रमेण' इतिवत्। अपिच मन्मथकलायुद्धे कामकलाभिः प्रवृत्ते कलहे क्रमेण प्रवृत्ते अक्रमेणाप्यनुष्ठीयमाने रतिचक्रे विषये आनन्दाधिगमेन

भावप्राप्त्या हेतुना प्रत्यूहोऽभूत्। विघ्नकरस्य नन्दाधिगमस्य स्पृहणीयतरत्वा-त्प्रियम्भावुकत्वमनुक्तसिद्धमेव बोध्यम्। एवं सर्वत्र प्रत्यूहेषु सत्स्वपि,'विघ्नैः पुनः पुनरपि प्रतिहन्यमानाः प्रारब्धमुत्तमगुणा न परित्यजन्ति' इति नीत्यनुसारेण कृतादविरामत्वमुत्तमगुणयोर्नायकयोः प्रत्येयम् ॥ २ ॥

अत्र नायकस्य कृतकृत्यम्मन्यतामन्यवैधर्म्येण प्रतिपादयति—दोर्भ्यामिति॥ लोके हि स्वाम्यादावनुरक्तः पुमान् पाशैर्बद्धः द्रुघणेन ताडितः क्रकचैर्दारितः कुन्तैः प्रहृतः शिलयाहतः यन्त्रेण वक्रीकृतः प्रवाहे मज्जितश्च तत्र न पुनः स्निह्यति। सापराधोऽपि सुतरां तादृशे विरज्यति च। एतद्विलक्षणा हि कामदेवस्य दण्ड-नीतिः। यतस्सर्वोऽपि दण्डो मोदहेतुर्जायत इति भावः। अर्थान्तरन्यासः। यस्मादेवं दृश्यते, तस्मात्कारणादहो आश्चर्यमिदमिति योजना। सामान्येन विशेषो गम्यः। कामगतेर्वामत्वं विपरीतरतप्रवर्तकत्वाच्च द्योतितम् ॥ ३ ॥

स्पष्टमेव निर्दिशति—माराङ्क इति॥ मारस्य मन्मथस्याङ्कश्चिह्नं मदन-महाराजाज्ञया प्रवृत्तं तत्प्रतापमानकञ्चेत्यर्थः। तादृशे। रतिकेलयः कामक्रीडाविशेषाः तद्रूपे सङ्कुले रणानामारम्भे तुमुलसमराणां प्रवर्तने। प्रस्तूयमान इति शेषः। तया राधया कर्त्र्या कान्तस्य श्रीकृष्णस्य जयाय वशीकरणाय। अत्र, 'यद्यदेव रुरुचे रुचितेभ्यस्सुभ्रुवो रहसि तत्तदकुर्वन्। आनुकूलिकतयैव हि यूनामाक्षिपन्ति हृदयानि रमण्यः॥' इति माघवचनानुसारेणेति बोध्यम्। रणे प्रतियोगिजयार्थमवश्यं यतनीयमिति च ध्वन्यते। सम्भ्रमात्त्वरावशात्। अनेन रतिचक्रप्रवर्तनावश्य-म्भाविशास्त्रविधिक्रमलङ्घनं गम्यम्। ततश्चामन्दरसत्वं प्रत्येयम्। तदुक्तम्— 'शास्त्राणां विषयस्तावद्यावन्मन्दरसा नराः। रतिचक्रे प्रवृत्ते तु नैव शास्त्रं न च क्रमः॥' इति। अमन्दरसत्वजनितादाटोपाद्धेतोरित्यर्थः। साहसप्रायं किञ्चिद्य-त्कार्यमुपरि कान्तस्योपरिभागे प्रारम्भि प्रारब्धम्। रमेः कर्मणि लुङ्। रभेरशब्लिटोरिति नुम्। तत्र कृत्ये तस्या इति पदत्रयमध्याहर्तव्यम्। तत्र कार्ये तस्या राधायाः जघनस्थली निष्पन्दा। अभूदिति शेषः। अत्र समरस-त्वप्रयुक्तप्रीत्यतिशयानुभावः स्तम्भो व्यङ्ग्यः। तस्या दोर्वल्लिर्बाहुलता शिथिलि-ताभूत् निश्चेष्टा समपद्यत। अत्र प्रळयो हेतुः। वक्ष उरःस्थलं पृथुस्तन-भरवहनक्लान्तं सदुत्कम्पितमभूत्। अत्र हेतुर्वेपथुः। अक्षि नयनद्वयं मीलितं निर्मीलितं प्राप्तम्। अत्र भावप्राप्तिर्गम्या। स्वयमेव सा भावमधिगता। न तु कान्तोत्तेजितेति यावत्। इति भगवतः श्रीकृष्णस्य नित्यब्रह्मचारिता 'आत्मा-

रानोऽप्यरीरमत्' इति, 'आत्मन्यवरुद्धसौरत' इत्यादि च व्यासवचनानुसारेण कथितेति मन्तव्यम्। उक्तमर्थमर्थान्तरेण समर्थयति—साहसरसः स्त्रीणां कुतस्सिद्ध्यति। न कुतोऽपीत्यर्थः। पौरुषरस इति वा पाठः। साहसिकत्वमध्यवसायान्तगामित्वञ्च पुरुषस्य स्वभावः। तदेव पौरुषं तस्य रसोऽतिशयः स स्त्रीणान्न सिद्ध्यतीत्यर्थः। विशेषस्य सामान्येन समर्थनरूपोऽर्थान्तरन्यासः ॥ ४ ॥

एवं पुरुषायितमुपवर्ण्य तदन्तं वर्णयति—तस्या इति ॥ तस्या राधायाः पाटलैः श्वेतरक्तैः श्रीकृष्णस्य पाणिजैर्नखैरङ्कितं चिह्नितमुरो वक्षस्तटम्। स्तनतटमिति यावत्। तदेकम्। तथा निद्राकषाये निद्रया, अवशिष्टयेत्यर्थात्, कलुषे दृशौ नयने। इदं द्वितीयम्। तथा निर्धौतः क्षालितः अधरस्य शोणिमा आरुण्यम्। ताम्बूलरागापगमस्स्वाभाविकरागकैवल्यश्लाघनीयमधरारुण्यमित्यर्थः। एतत्तृतीयम्। तथा विलुठिता व्याकुलीभूताः स्रस्ताश्शिथिलाश्च स्रजः कुसुमदामानि येषु तादृशा मूर्धजाः कुन्तलाः। अदश्चतुर्थम्। पुनरीदृश्श्लथमीषच्छिथिलमञ्चलं प्रान्तभागो यस्य तादृशं काञ्चीदाम मणिमेखलाकलापश्चेत्येवम्भकरैः पञ्चभिः कामशरैरेभिः दृशोः श्रीकृष्णनेत्रयोः। निखातैरित्यनेन दूरावगाहितत्वं लक्ष्यम्। तेन चातितृष्णावहत्वं व्यज्यते। प्रातरित्यनेनाकालत्वमुक्तम्। तेन च 'कालदेशविषयासहात्स्मरादुत्सुकम्' इति श्रीहर्षसूक्तिमनुस्मारयति। एभिः कामशरैरिति करणानः कर्तृत्ववचनेन कार्यसौकर्यं व्यज्यते। स्थाली पचतीत्यादिवत्। पत्युः श्रीकृष्णस्य मनः कीलितं सञ्जातकीलमभूत्। पुनरपि सपदि रिरंसामांसलमासीदित्यर्थः। तदद्भुतमाश्चर्यम्। नयनद्वये बाणेषु निखातेषु मनसस्सञ्जातकीलत्वं दद्भुतत्वम्, 'यवनैरपि नो दृष्टं यन्त्वमीदृशमद्भुतम्। कनकेन करस्थेन जिह्वा विवरिवर्तते ॥' इतिवद्वसेयम्। अत्रासङ्गतिरलङ्कारः। 'विरुद्धं भिन्नदेशत्वं कार्यहेत्वोरसङ्गतिः' इति लक्षणात्। अत्र राधायाः महालक्ष्म्यंशभूतत्वमेव सूच्यते। 'उत्तिष्ठन्त्या रतान्ते भरमुरगपतौ पाणिनैकेन कृत्वा धृत्वा चान्येन वासः श्लथमथ कबरीभारमंसे वहन्त्याः। भूयस्तत्कालकान्तिद्विगुणितसुरतप्रीतिना शौरिणा वश्शय्यामालिङ्ग्य नीतं वपुरलसलसद्बाहु लक्ष्म्याः पुनातु ॥' इत्युक्तनयेन पत्युर्मनः कीलितमिति सुरतोत्कण्ठितत्ववचनादित्यवगन्तव्यम्। तच्च त्वामप्येति श्लोकेनाग्रे स्पष्टीकरिष्यते ॥ ५ ॥

अथ 'शुद्धान्तसम्भोगनितान्ततान्ते न नैषधे कार्यमिदन्निगाद्यम्'। 'अपां हि तृप्ताय न वारिधारा स्वादुः सुगन्धिस्स्वदते तुषारम्' 'श्मशानान्ते पुराणान्ते रतेरन्ते च या मतिः। सा मतिस्सततं यस्य तस्य मुक्तिः करे स्थिता ॥' इत्यादिभिः

सुरतान्तसमये रागिणां पुनर्झटिति रिरंसनुदयप्रसिद्ध्यां सत्यामपि 'क्षणे क्षणे यन्नव-तामुपैति तदेव रूपं रमणीयतायाः' इति न्यायेन राधावपुषो रमणीयरूपेक्षणहेतुकं श्रीकृष्णस्य रिरंसोदयं प्रतिपाद्य तत्कृतां प्रवृत्तिं महदयहृदयगोचरीकर्तुं सामान्यभूत-मर्थं प्रशंसति—ईषदिति। धन्यो भाग्यशाली पुमान् कुरङ्गीदृशस्सुन्दर्याः निज-प्रियतमाया आननम्मुखं धयति पिबति। धेट् पान इत्यस्माद्धातोर्लट्। 'अनुकूलां विमलाङ्गीं कुलजां कुशलां सुशीलसम्पन्नाम्। पञ्चलकारां नारीं पुरुषः पुण्याधिको लभते'॥ इति वचनात्पुण्यसञ्चयशालिन एव पुंसस्तस्या मुखसारभूतः प्रकृष्टगुणेष्ट-वल्लभासम्भोगलाभ इति भावः। 'तत्राविशेषः पशूनां रसः' इति न्यायेन, 'परीरम्भः कुम्भप्रतिभटकुचानां मृगदृशा म्' इति वचनानुसारेणाभ्यन्तररत इति वाह्यरतविशेषा णामालिङ्गनचुम्बनादीनामेव परमप्रीतिप्रदत्वमित्यवगन्तव्यम्। अत एव 'यैश्चुम्बित प्रेयसी प्रासन्तैरमृतं श्रमाय मथितं मूढैस्सुरैस्सागरः' इत्यमरुकोक्तिः। धन्यस्यापि रसिकाग्रेसरत्वापेक्षामाह—श्वासैस्सुरतश्रमजन्यतृष्णयोच्छ्वसितसङ्गैरुत्तप्तयोरूष्मळीकृतयोः पयो-धरयोः कुचयोः उपरि ऊर्ध्वभागे परिष्वङ्गी प्रशस्तपरिष्वङ्गव्यापृत इत्यर्थः। इनिना मत्वर्थीयेन प्रशस्तत्वम्। प्राशस्त्यञ्च परिष्वङ्गस्यान्तरान्तरा गाढत्वं बोध्यम्, कुचकुम्भकम्पजृम्भितस्य शमयितव्यत्वात्। एतदेव कुरङ्गीदृग्विशेषणेन द्योतयति। हर्षेण चिराभिलषितमनोरथलाभजनितेन हेतुना उत्कम्पिनी विजृम्भितकम्पसम्पद्रूपसात्त्विकभावपर्यवस्थापनाचतुरा विमुक्ता वल्लभाय समर्पिता निस्सहा अस्ववशा च तनुर्गात्रयष्टिर्यस्यास्तादृश्याः। अनेन त्रपावरणव्यपाय-वशान्नायकाधीनता कृत्यशेषस्य प्रकाशिता। अत एव धन्य इति निर्देशः। तादृशदशानुगुण्येन चतुर्भिर्विशेषणैराननं विशिनष्टि—ईषन्मीलिता दृष्टिर्यत्र। यथैकाकिनी पुरन्ध्री स्वगृहकवाटं घटयित्वा कार्यवशाद्बहिर्गच्छति, तथा नयने मीलयित्वा त्रपायां व्यपगतायां प्रियतमेङ्गितचेष्टितादिदर्शनौत्सुक्येन दरोन्मीलित-नयनयुगळमित्यर्थः। किञ्च सीत्कारबाधावशान्मुग्धरसित रसवशात्स्वयमुदितस्य सीत्कारस्य प्रियकर्तृकेणाधरधयनेन बाधायां सत्यां तद्वशान्मुग्धमतिमधुरं रसितं मणितविशेषो यत्र। किञ्च केळिभिः नायकाश्रयरिरंसारिरमयिषादिभिः कारणैः काकवः ध्वनिविकाराः केळिकाकवः। अव्यक्ता अविस्पष्टाक्षराः आकुला अन्योन्यसम्बन्धरहिताश्च केळिकाकवो यत्र तत्। अपिच विलसद्भिः प्रकाशमानै-र्दन्तांशुभिः दशनकिरणैः धौतः धवळीकृतः अधरो यत्र तत्तथा। त्रिभिर्वैलोम्यशङ्का, अन्तिमेन विशेषणेनानुलोम्यनिश्चयश्चावगन्तव्यः। एवंविधमाननं धन्यो धयतीत्य-नेन सामान्यवचनेन विशेषरूपो राधामाधवविहृतिप्रकार एव विवृत इत्यवसेयम्।

तत्र 'विस्तृतं जघनमेतिनितान्तं कामिनी हृतदुकूलमाकुला। अक्षमा पुनरमुष्य गोपने प्रेयसे मदनसाक्षिकन्ददौ ॥' इति चावगन्तव्यम् ॥ ॥ ७ ॥

गीतम् २४

अथेति ॥ अथ अभिमतविहारानन्तरं मुग्धा मोहनगात्री स्वाधीनभर्तृका स्वायत्तीकृतप्रिया राधा रतिश्रान्तं कान्तं माधवं जगाद। रतिश्रान्तमित्यनेन पूर्वन्तदर्पितसर्वकृत्यत्वेन नायकारब्धत्वं रतेस्तन्निरूढत्वमपि सूच्यते। कान्तमित्युभयार्थम्। श्रान्तत्वेऽपि कान्तिमत्त्वं प्रियतमञ्चेति। अभिमण्डनवाञ्छयेति जगादेत्यस्य हेतुः। अभितस्सर्वाङ्गेषु मण्डनस्य पूर्वकृतस्य गम्यम्। श्रान्तस्य मण्डनकृत्ये नियोजनस्यानौचित्यं विचारयितुमसमर्थत्वं मुग्धेत्यनेन गम्यते। जगाद नियुयुजेत्यर्थः ॥ ८ ॥

तन्नियोगं गीतेनाह—कुर्वित्यादि ॥ मङ्गळकौशिकीरागेण गीयत इति अस्य गीतगानस्यानुगुणत्वात्तस्या इति भावः। 'मणिभूषणभूषिताङ्गवल्ली मदरक्तान्तविलोचनारविन्दा। मदनीयगुणा महेशभक्ता मधुरा मङ्गळकौशिकी मनोज्ञा ॥' इति तदुपासनाविधिः। एकताळलक्षणं प्रागुक्तम्। निजगादेत्यादि हृदयानन्दन इत्यन्तं ध्रुवपदमनुपल्लवञ्च। हृदयानन्दने सर्वप्रकारेणापि मनस्सन्तोषपरीपोषके यदुनन्दने श्रीकृष्णे क्रीडति विहरमाणे सति सा राधा निजगाद गदितवती। अत्र गीते प्रतिपाद्यान्तमिति शब्दोऽर्थादूह्यः। किं जगादेत्याकाङ्क्षायामाह—कुर्विति। हे यदुनन्दन श्रीकृष्ण त्वमत्रास्मिन् पयोधरे मदीये कुचमण्डले चन्दनशिशिरतरेण करेण अतिशीतलमृदुस्पर्शेन स्वपाणिना मृगमदपत्रकं कस्तूरिकापत्रकं कुरु रचय। त्वया हठालिङ्गनादिना लुप्तं पत्रकं त्वयैव पूर्ववद्रचनीयम्। नो चेदावयोः स्वैरविहारप्रकारा मम सखीभिरनुमीयेरन्निति भावः। चन्दनवच्छिशिरतरेणेत्यनेन तात्कालिकं स्पर्शसुखमनुभूयमानमतः परमपि भावितं त्वद्विरहे वेदनानिरासं प्रादुर्भावमनुसन्धानेन कुर्यादिति चाभिप्रायः। किञ्च निर्मृष्टमण्डनत्वं मत्पयोधरस्य मम तवापि भाविभव्यविभवनिवारकमिति मन्यामि न लौदार्यसौभाग्यमुचितम्। अत एवादावेदमेवान्येष्वपि सत्सु कृत्येष्वनुष्ठेयमिति प्रकाशयितुं पयोधरं विशिनष्टि--मनोभवस्य मदनस्य यो मङ्गळकलशः स्वजन्ममन्दिरे बहिरलिन्दे आयुर्यशःप्रकर्षादिविभूत्यपरिक्षयार्थं स्थापितः तत्सहोदरे तत्समाने। इति निजगादेत्यध्याहारेण ध्रुवपदान्वयः ॥ १ ॥

अळिकुलेति ॥ हे प्रिय वल्लभ त्वं लोचने मम नयनयुगे अञ्जनकम् । स्वार्थे कः । अञ्जनमुज्ज्वलय । सम्यङ्निधेहीत्यर्थः । कीदृशमञ्जनम् — अलिकुलस्य भ्रमरनिकरस्य भञ्जनं रुचिभारनिरासकम् । ततोऽप्यतिमेचकमित्यर्थः । निसर्गनीले पूर्वमञ्जनलिप्ते विलोचने किमिदानीमञ्जनमञ्जनप्रयासेनेति मा संस्थाः इत्याह — स्वत्कृतेनाधरकरणकेन चुम्बनेन हेतुना लम्भितं सङ्क्रामितम् । गळितैकदेशमिति यावत् । कज्जळं यस्मात् । अत्र कज्जळशब्देन काळिमा लक्ष्यते । त्वत्कर्तृकेण मन्नयनचुम्बनेन हेतुना त्वदधरे सङ्क्रामितकाळिमत्वादञ्जनं पूर्वलिप्तं लुप्तप्रायप्रकाशं वर्तत इत्यर्थः । अत एवोज्ज्वलयेति नातिप्रयासत्वं द्योत्यते । इदमप्यवश्यमनुष्ठेयमिति द्योतयितुं लोचनं विशिनष्टि—रतिनायकस्य मन्मथस्य सायकमोचनं शरप्रयोगो यस्मात्तादृशे । मद्दृष्टिसूचिते लक्ष्य एव मदनशरान्मुञ्चति नान्यत्र मनानभिमते क्वचित् । अतः कामविकारनियामकमिदं मल्लोचनं सम्यगेव मण्डनीयमित्यभिप्रायः । इति निजगाद सेत्यन्वयः ॥ २ ॥

नयनेति ॥ नयने कुरङ्गाविव नयनकुरङ्गौ । चञ्चलप्रकृतित्वं सामान्यधर्मो गम्यः । तयोस्तरङ्गवत्प्रसरणं तरङ्गस्तस्य विलासलीला । अथवा तयोस्तरङ्गविलास ऊर्मिवद्गतप्रत्यागतशैली तस्य निरासकं तद्रोधकञ्च तच्छ्रुतिमण्डलं श्रवणप्रदेशश्चेति कर्मधारयः । तस्मिन्विषये कुण्डले कर्णभूषणे कर्मभूते विनिवेशय सम्यङ्निवेशय । अत्रापि तथाविधमाह — मनसिजस्य कामस्य यः पाशो रागिजनहृदयबन्धनकरणभूता रज्जुस्तत्क्रियाकारितया तत्साहश्येन सुभगे श्लाघनीये । सुभगस्य कुण्डलार्पणं वशङ्करमित्यतस्त्वयेदमवश्यं करणीयमिति भावः । इति निजगाद सेति सर्वत्रान्वयः ॥ ॥ ३ ॥

भ्रमरेति ॥ मम सम्मुखे उपरि मदीयमस्तकोपरिभागे रुचिरं मनोज्ञं भ्रमरचयमळिवृन्दं सुचिरं बहुकालं रचयन्तं स्वकान्त्या निर्मिमाणमळकं चूर्णकुन्तळप्रकरं मम मुखे परिकर्मय अलङ्कुरु । 'परिकर्माङ्गसंस्कारः' इत्यमरः । परिकर्मशब्दात्तत्करोतीति णिच् । 'परिकर्मयतेर्लोटि सेर्हिः । अतो हेरिति हिलोपः । त्वं मम मुखे अळकं परिकर्मयेत्यन्वयः । त्वत्करवाग्रैर्मदीये मुखे रतिव्यतिकरकीर्णानामळकानां परिष्कारं कुर्वित्यर्थः । कीदृशमळकमित्याह — नर्मजनकं नर्मणः खेलनस्य जनकम् । अत्र नर्मात्मीयं बाध्यम् । कृतपरिष्कारस्य विशेषणमिदम् । विपरीतेष्वळकप्रकृतपरिष्कारेषु स्वस्था नर्मोद्यमासम्भवात् । सखीकृत्यमिदं सखीसन्निधानात्त्वया कर्तव्यमिति स्वाधीनभर्तृकायास्स्वाभाव्यादियमुक्तिः ।

त्पत्रचनां रचयन्तमुपरि रुचिरं सुचिरं मम सम्मुख इत्यपि कृतपरिष्कारस्यैव विशेषणम्। न चात्र स्वश्लाघारूपो दोषशङ्कनीयः। पूर्वं सखाय संस्कृतेष्वळकेषु खेलन्त्य. मन भ्रमरचयस्यानिमुख म्य. भ्रमादन्तरान्तरा भयेन सम्भ्रमश्चापलयश्चाभवदेव। एवमिदानीमपि स्यादेव। तथापीदं कर्तव्यमित्यभिप्रायाचस्य च वास्तववान्मौग्ध्यहेतुकमिदं वचनम्। अतश्च 'स्वगुणाविष्क्रिया दोषो नात्र भूतार्थशंसिनः' इति समाहितत्वात ॥ ४ ॥

मृगमदेति॥ हे कमलनन श्रीकृष्ण त्वं ममालिकरजनीकरे ललाटात्मके अर्धचन्द्रे विहिता कृत कळङ्ककला लक्ष्मलेशो येन तादृशम्। अर्धचन्द्रे कळङ्कार्धसम्भवस्यापरिहार्यत्वात्तद्भ्रान्तिकरमित्यर्थ तथाविधं तिलकं कुरु कल्पय। कीदृशस्तिलकः कार्य इत्याह—मृगमदः कस्तूरिका तद्रसेन तद्द्रवेण वलितं सम्मिश्रं ललितं मनोज्ञञ्च। कीदृशे अळिके विश्रमित श्रमसुखेन पर्यविदशोऽवस्थिताः श्रमशीकराः स्वेदबिन्दवो यत्र। अतस्तदलिके तिलकेनापि भाव्यमिति भावः। अत्र स्नानमण्डपसमाचिरळिकस्य गम्यते। आस्थान्यां सचिवेषु मिळितेषु राज्ञा गन्तव्यम्। तदानीमेव तच्छोभापोष्कल्याविर्भाव इति। अथवा विश्रमितशब्देन ससम्भ्रमनिर्गमाभाव एव विवक्षितः। ततश्च प्रशमितश्रमशीकरोद्गम इति पर्यवस्यति। श्रमशीकरशमनमादौ कार्यम्। ततस्तिलकनिर्माणञ्चेत्यर्थः। नो चेत्कृतस्यापि तिलकस्य गजस्नानकल्पता स्यादिति भावः ॥ ५ ॥

घनेति॥ मनं रिपूणामभिमानं द्यति खण्डयतीति वा, मानं मादृशीनप्रणयकलहं द्यति खण्डयतीति वा, मानं सज्जनानां पूजां ददातीति वा मानदः। तस्य सम्बुद्धिः हे मानद श्रीकृष्ण त्वं घनवन्नवमेघवद्रुचिरे हृद्ये। घनश्च निबिडश्चासौ तथा रुचिरो मनोज्ञश्च घनरुचिरस्तादृग इति वा। किञ्च मानसजस्य मनोभवस्य ध्वज तुदण्डस्तदलङ्करभूते च गे मेचक न रीवाले। किञ्च, शिखण्डिशिखण्डकवत्केकिपिञ्छमण्डलवद्वापरे आभोगशालिन ळके प्रियदर्शने रतिगळिते सुरतव्यतिकरशिथिलीभूते चिकुर मदीयकुन्तळभारे कुसुमानि पुष्पाणि कुरु निधेहि ॥ ६ ॥

सरसेति॥ शुभः सर्वभूतानुकम्पी आशयो हृदयं यस्य तस्य सम्बुद्धिः हे शुभाशय सरसाग्रेसर हे श्रीकृष्ण त्वं घने पृथुके शरारं शम्बरासुरं वारयतीति

शम्बरवारणः कामः स एव वारणो गजस्तस्य कन्दरे वासकुहरे सुन्दरे सौन्दर्यशालिनि मम जघने श्रोणिमण्डले मणिरशना रत्नकाञ्ची वसनमंशुकम्। आभरणान्युक्तव्यतिरिक्तानि किङ्किणीदामादीनि च। तेषां द्वन्द्वः। तानि वासय सम्यङ्निवेशय। इति सा निजगादेत्यन्वयः ॥ ७ ॥

श्रीजयदेवेति ॥ हे देव श्रीकृष्ण त्वं सज्जनानाम्मण्डने भूषणभूते श्रीजयदेवकवेर्वचसि भणिते विषये सदयं दयासहितं हृदयं कुरु। कीदृशे वचसि —हरिचरणस्मरणामृतेन श्रीमहाविष्णुपादस्मरणेनामृतेन निर्मितं कलियुगसुलभकलुषरूपो यो ज्वरस्तस्य खण्डनमुन्मूलनं येन तादृशे। अथवा, सज्जनेति सम्बुद्धिः। हे सज्जन मण्डने युष्माकं भूषणभूत इति वा योजना। अस्मिन्नेव पक्षे हरिचरणेत्याद्यर्थः सुयोजः। हरिचरणस्मरणस्यामृतत्वारोपाज्ज्वरखण्डनसौकर्यं सिद्धम्। यद्वा, हरिचरणस्मरणेन सर्वदानुष्ठितेन हेतुना अमृतं मुक्तिर्यस्य स तथा। तस्य सम्बुद्धिः हे हरिचरणस्मरणामृत हे सज्जन तादृशस्य तव मण्डनमिदं श्रीजयदेववचः। यतो निर्मितकलिकलुषखण्डनमिदं ततो हृदयमस्मिन् सदयं कुरु। 'शृण्वन्ति गायन्ति गृणन्ति साधवः' इति श्रीभागवतवचनात्पठनार्थानुसन्धानगानश्रवणाद्युपयोगिगीतनिरन्तरमिदं श्रीजयदेववचः युष्मद्भूषणार्थमेव कल्पितम्। ततो हृदयमिह सदयं क्रियतामिति भावः ॥ ८ ॥

अथ गीतोदितार्थसङ्कोचेन प्रमेयमपि समापयति श्लोकेन - रचयेति ॥ इति एवम्प्रकारेण निगदितः स्वाधीनपतिकास्वाभाव्यात्स्वसौभाग्यप्रकाशनमात्रपरया राधया नियुक्तः पीताम्बरः श्रीकृष्णोऽपि प्रीतस्सन् तथा सर्वमकरोत् कृतवान्। अनेनान्योन्यरागदार्ढ्यं द्योत्यते। एवं साङ्गस्य शृङ्गारस्य सम्यङ्निर्व्यूढत्वात् 'यदि हरिस्मरणे सरसं मनो यदि विलासकलासु कुतूहलम्' इति प्रबन्धमुखप्रतिपादितस्य प्रतिज्ञावाक्यस्य प्रयोजनप्रकाशनस्य च निर्वृत्तत्वात्प्रमेयमपि परिसमाप्यत इति भावः ॥ ९ ॥

अथ कविः स्वप्रबन्धस्याभिनेयगीतात्मकत्वान्नाटककल्पत्वाच्च भरतवाक्यन्यायेन प्रबन्धमहावाक्यार्थसङ्क्षेपसारभूताभिधेयामाशिषं प्रयुज्य सामाजिकानिव सहृदयानानन्दयति—त्वमिति ॥ हरिः श्रीकृष्णः वो युष्मानस्मान् प्रबन्धस्य श्रोतॄन्गातॄन् व्याख्यातॄंश्च पातु रक्षतु। कीदृशो हरिरित्याकाङ्क्षायामाह—हे कामिनि प्रशस्तकामे राधे पुरा मृडानीपतिश्शिवः क्षीरोदस्य क्षीरार्णवस्य यत्तीरं तटं तदुदरे तदन्तर्भागे। उदरशब्देन तत्र बहुतरजनतापरिवृतत्वं द्योत्यते। धृतस्वयंवरो-

द्यमां त्वामप्राप्य अलब्ध्वा मूढो भूत्वा कर्तव्यान्तरमज्ञात्वा कालकूटं विषमपिबत्पीतवान् शङ्के एवमहं सम्भावयामि। जीवितनैरपेक्ष्यं विना कालकूटपानयोगाज्जीवितनैरपेक्ष्यस्य च त्वदलाभनिश्चयसम्भाव्यत्वादिति भावः। इत्थमनेन प्रकारेण पूर्वकथाभिरन्यमनसः अतीतचिन्तनव्यापृतचित्ताया राधाया वक्षोंशुकं विक्षिप्य गलितकञ्चुलीकं सम्पाद्य स्तनकोरकयोः कुचकुड्मलयोरुपरि लसती नेत्रे यस्य तादृशस्सन्। सम्यगेव राधाकुचयुगसन्निवेशसौभाग्यं पश्यन्नित्यर्थः। अनेन राधाया महालक्ष्म्यंशावतारत्वं प्रकाशितम् ॥ ९॥

अथ स्वप्रबन्धस्य प्रमेयप्रकृतिभूतं लक्ष्मीनारायणविहारमेव मिथोऽनुरागदार्ढ्येन शृङ्गाररसाधिष्ठानमनुस्मारयति—**पर्यङ्कीकृतेति**॥ पर्यङ्कीकृतस्य कल्पिततल्पभावस्य नागनायकस्यानन्तस्य या फणश्रेणी फणासहस्रं तत्र ये मणयः फणारत्नानि तेषां गणे समूहे सङ्क्रान्तानि यानि प्रतिबिम्बानि तेषां सङ्कलनया पुञ्जीभावेन हेतुना वपुषः प्रक्रियां प्रपञ्चनं बिभ्रद्धारयन् सन् यः पादाम्भोजयोः स्वपादपद्मयोर्विहारिणीं परिचर्याधुर्यतया क्रीडन्तीं वारिधिसुतां लक्ष्मीमक्ष्णां शतैर्नयनसहस्रेण द्विगुणेन दिदृक्षुः द्रष्टुमिच्छुरिव कायव्यूहं देहसमूहमकरोत्कृतवान्। धृतवानित्यर्थः। अत्र हेतुः—उर्वी मुत् सन्तोष उरुमुत्। तया हेतुना। सौन्दर्यसौभाग्यातिशयसहकृतया परिचर्याचातुर्या सर्वदा स्वचरणपरिसरममुञ्चतीं महालक्ष्मीं प्रति तदनुगुणेन सन्तोषेण हेतुना तद्दर्शने नयनद्वयेन नालम्, नयनसहस्रद्वयेन भाव्यम्, तच्च देहसहस्रसद्भाव एव सुलभमिति मत्वैव देहसहस्रं धृतवानित्यर्थः। य एवङ्कृतवान् सोऽसौ हरिः श्रीनारायणो युष्मान् पात्विति। अत्र लक्ष्मीनारायणयोर्मिथोऽनुरागदार्ढ्यवर्णनं द्राधामाधवविषयशृङ्गारप्रबन्धस्य स्वकृतस्य भगवति महाविष्णावर्पणमेव कविहृदयं वेदितव्यम् ॥ १०॥

एवञ्चिकीर्षितं प्रबन्धं परिसमाप्य गर्वपरिहाराय स्वप्रबन्धस्योपादेयताङ्गीकाराय च सज्जनानर्थयते—**यदिति**॥ गान्धर्वो गान्धर्ववेदः। स च सामवेदस्योपवेदः। तत्र याः कलाः विद्याः नृत्तगीतवाद्यरूपाः तासु सर्वासु प्रत्येकं यत्कौशलं नैपुण्यं वैष्णवं विष्णुसम्बन्धि अनुध्यानं श्रवणानन्तरभाविमननरूपञ्च यत् शृङ्गारस्य सम्भोगविप्रलम्भात्मना द्विविधस्य ब्रह्मानन्दादभिन्नस्य रसस्य यो विवेको विवेचनम्। स्वरूपानुसन्धानमिति यावत्। तस्य यत्तत्त्वं याथार्थ्यम्। अपिस्समुच्चये। काव्येषु ध्वनिगुणीभूतव्यङ्ग्यचित्राख्येषूत्तममध्यमाधमरूपेषु लीलायितं विलासशैली। तदपि यत् तत्सर्वं कर्मभूतं जयदेवस्य पण्डितस्य विदुषः कवेस्सम्बन्धिनः। गीतो

गोविन्दो येन तद्गीतगोविन्दमिति स्वकाव्यस्य कृता संज्ञा ख्याप्यते। ततो हेतोः सुधियः पण्डिताः कर्तारः सानन्दास्ससन्तोषास्सन्तः परिशोधयन्तु परिशोधितं कुर्वन्तु। 'विद्वांस एव जानन्ति विद्वज्जनपरिश्रमम्। नहि वन्ध्या विजानाति गुर्वीं प्रसववेदनाम्' इति न्यायेन गान्धर्वकलादिषु कौशलवन्तः पण्डिता एतस्माद्गीतगोविन्दाख्यकाव्यात्सकाशाज्जयदेवाख्यस्य पण्डितकवेः गान्धर्वकलाकौशलादिकं सर्वं परिशोध्य परीक्ष्य अस्यैतस्यां विद्यायामियान् परिश्रमोऽस्तीति विजानन्त्वित्यर्थः। सानन्दा इत्यनेन तेषां निर्मत्सरत्वरसिकत्वादिकमयुतसिद्धमेवेति द्योत्यते। ततश्च 'आपरितोषाद्विदुषान्न साधु मन्ये प्रयोगविज्ञानम्। बलवदपि शिक्षितानामात्मन्यप्रत्ययश्चेतः' इति कालिदाससूक्त्यनुसारेण विद्वत्प्रीतिलाभलोभादेवेदं निर्मितमिति सेत्स्यति। विद्वत्प्रीतिलाभश्च न केवलं प्रयासेन प्रत्याशया वा लब्धुमिष्यते। अपित्वव्यभिचारिणा कारणान्तरेणापीति विशेषणेनाह—कृष्णैकतानात्मन इति। कृष्णे 'कृषिर्भूवाचकश्शब्दो णश्च निर्वृतिवाचकः। सत्तानन्दात्मकं तेजः कृष्ण इत्यभिधीयते॥' इति निरुक्त्यनुसारेण परमानन्दमूर्तौ भगवति श्रीकृष्णे एकतान एकाग्र आत्मा मनो यस्य तादृशस्य पण्डितश्चासौ कविश्च पण्डितकविः। सत्यपि पाण्डित्ये कवित्वाभावः केषुचिद्दृश्यते। तेषान्न विद्वत्प्रीतिस्सुलभा। सत्यपि कवित्वे पाण्डित्याभावे परिहास्यतैव फलं सुलभम्। तदुक्तम् – 'या केवलं रसिकता तदपण्डितत्वं पाण्डित्यमेव यदि तद्विरसत्वमेति। योगस्तयोर्घुसृणपाककुरङ्गनाभिसम्मेळवत्परिमळं कमपि प्रसूते॥' इति। तदुभयमेळनं श्रीकृष्णभक्तिश्च जातेति जयदेवकवेर्विद्वत्प्रीतिलाभतनुग्रहतत्प्रशंसादिफललाभावश्यम्भावान्न व्यभिचरतीति भावः॥

अथ कविस्स्वप्रबन्धसन्दर्भस्य प्राशस्त्यं सूचयन् पारलौकिकस्यापि सुखस्य हेतुत्वं द्योतयति—**यन्नित्यैरिति**॥ मुहुः पुनः पुनः नानाकाराणां विचाराणां बहुप्रकाराणां विवेचनानां सारः स्थिरोंऽशः तत्र चतुरैस्तत्प्राप्तिनिपुणैः विरिञ्चो ब्रह्मा गिरिजाप्राणेशः गौरीपतिश्च मुख्यौ प्रधानौ येषान्ते तन्मुख्यास्सनकादयस्तैः कर्तृभिः यद्वस्तु नित्यैर्वचनैरुपनिषद्वाक्यैः करणभूतैरद्यापि न निश्चीयते निश्चेतुन्न शक्यते तत्तादृशं दुर्बोधमाद्यं सर्वकारणभूतं वस्तु। परं ब्रह्मेत्यर्थः। जयदेवकाव्ये गीतगोविन्दे घटितैर्योजितैस्सर्वैरखिलैः। नित्यैर्वचनैरित्यनुषङ्गः। परं केवलं सारस्यसीमां शृङ्गाररसमयश्रीकृष्णलीलानुसन्धानजन्यां विगलितवेद्यान्तरां दशामानन्दमयीभावरूपां जुषन्ते सेवन्त इति तज्जुषस्तेषाम्। सहृदयानामित्यर्थः। चेतसि हृदये चकास्तु प्रकाशताम्। कीदृशैर्नित्यवचनैरित्याह—

सद्भिरुत्कृष्टप्रतिभैस्सूरिभिर्विद्वद्भिस्सम्यगेव शोधितैः परीक्षणेन कृतशोधनैः। उपनिषदर्थोदाहरणरूपता काव्यस्यास्य भवति वा न वेति परीक्षणे कृते उपनिषद एव शोधितास्स्युरित्यभिप्रायः। अत्रेऽदमाकूतम्--'जयति तेऽधिकं जन्मना व्रजः श्रयत इन्दिरा शश्वदत्र हि। दयित दृश्यतां दिक्षु तावकास्त्वयि धृतासवस्त्वां विचिन्वते॥' इत्यादौ, 'न खलु गोपिकानन्दनो भवानखिलदेहिनामन्तरात्मदृक्। विखनसार्थितो विश्वगुप्तये सख उदेयिवान् सात्वतां कुले॥' इत्यादौ च गोपिकानामविदितवेदान्तवचनानामपि भगवत्तत्त्वचुम्बिमनस्तारमूलवचननिर्गमादिप्रामाण्यादेतिह्यादप्युपनिषदेवतावतारत्वं न दुर्ज्ञातम्। किञ्च' 'विक्रीडितं व्रजवधूभिरिदं च विष्णो श्रद्धान्वितोऽनुशृणुयादथ कीर्तयेद्यः। भक्तिं परां भगवति प्रतिपद्य कामं हृद्रोगमाश्वपहिनोत्यचिरेण धीरः॥' इति वेदान्तसूत्रकारस्य व्यासमुनेर्वचनमपि न निर्मूलम्। अतः सर्वं प्रयासमपास्य शृङ्गाररसद्वारा श्रीकृष्णलीलाशीलनादेव हरिभक्तिरवश्यं सेत्स्यति। सिद्धायान्तु तस्यां निष्प्रयासमुपनिषदर्थतत्त्वलब्धिनिमित्तकं ब्रह्मैवाहमिति ज्ञानमपि मानुषाणामवश्यं भविष्यत्येव। ब्रह्मशङ्करसनन्दकसनन्दादिकानां तु तत्तद्रूपेणैव सुचिरमवस्थानं तत्त्वानिश्चयात्। मानुषास्तु भक्तिसिद्ध्या स्वयमनुभूततत्त्वा मुक्ता एव झटिति भवेयुरिति सर्वमपि श्रीकृष्णायत्तमिति तदर्पितप्रयासत्वं प्रार्थनार्थेन श्लोटा स्फुटीकृतम्। एवं श्रीजयदेवकाव्यविवृतौ मयापि केन चित् पद्येन तत्कवितामाधुर्यं प्रशस्य विरम्यते—

साध्वी माध्वीक चिन्ता न भवति भवतः
शर्करे कर्करासि
द्राक्षे द्रक्ष्यन्ति के त्वाममृत मृतमसि
क्षीर नीरत्वमेषि।
मोचे मा जीव जायाधर धरकुहरे
मज्ज युष्मज्जयायै-
वाकल्पं कल्पिताज्ञ्या यदिह भुवि गिरा
स्थीयते जायदेव्या॥

हे माध्वीक भवतश्चिन्ता साध्वी न भवति। हे शर्करे सिते त्वं कर्करासि कठिनासि। हे द्राक्षे मृद्वीके इतः परं के त्वां द्रक्ष्यन्ति। न केऽपीति भावः। हे अमृत पीयूष त्वं मृतमसि। जीवन्मृतिरेव तवाभूदित्यर्थः। हे क्षीर धेनुदुग्ध त्वं

नीरत्वमेषि जलत्वं प्राप्नोषि। यथा नीरस्य तदेकीभावेऽपि परिपाके क्षयः तथा तवापि तदेकीभावे समाश्रितेऽपि क्षयः स्यादित्यर्थः। हे मोचे रम्भाफल त्वं मा जीव। किं निष्फलजीवितेन। अतो म्रियस्वेत्यर्थः। हे जाथाधर प्रियतमाधरोष्ठ त्वं धरस्य पर्वतस्य कुहरे दर्यां मज्ज। मज्जनं निलीयावस्थानं लक्षणया बोध्यम्। अहो किमस्माकमीदृशं कदनं जातमिति चेत्तत्राह—युष्माकं जयायैव कल्पितमङ्गं यस्यास्तादृश्या जयदेवप्रोक्तया गिरा वाचा श्रीगीतगोविन्दाख्यकाव्यरूपया इह भुवि अस्यां भूमौ आकल्पं कल्पकालपर्यन्तं स्थीयते यत्। आकल्पमवस्थातरि जेतरि सति युष्माकं जीवितं निष्फलमिति निश्चितत्वादित्यर्थः। एवमविज्ञेयसाराणां जयदेवगिरां विवरणापराधक्षमापणमेव मया कृतमिति॥

श्रीकृष्णार्पणमस्तु।

इत्यखिलविद्यापरिवारश्रीमद्दक्षिणामूर्तिमहादेवप्रसादलब्ध-
साङ्गवेदपूर्वोत्तरमीमांसाशब्दतर्कसाहित्यसार्वभौम-
चरकुरुकोण्डुभट्टमहोपाध्यायानुजेन सर्वाम्बिका-
गर्भशुक्तिमुक्तामणिना लक्ष्मीधरसूरिणा
विरचितायां गीतगोविन्दव्याख्यायां
श्रुतिरञ्जिन्याख्यायां सरस-
सरसीरुहाक्षनामक-
द्वादशसर्गभावार्थ-
विमर्शः समाप्तः